VOLUME 1

THE

PRINCESS OF WALES

SARASWATĪ BHAVANA TEXTS

No. 45

(PART I)

—o—

EDITED BY

GOPI NĀTH KAVIRAJ, M. A.

THE

KIRAṆĀVALĪ PRĀKAS'A

(PART I)

Printed by Jai Krishna Das Gupta
Vidya Vilas Press, Benares City.

1933

किरणावलीप्रकाशः

लक्ष्मणपुरविश्वविद्यालयस्य न्यायवेदान्तादिशास्त्राध्यापकेन
'एम. ए.' इत्युपाधिधारिणा 'न्यायशास्त्रि'-
पदवीसमलङ्कृतेन श्रीबदरीनाथ-
शर्म्मणा संशोधितः ।

THE

KIRAṆĀVALĪ PRĀKAS'A

By

VARDHAMĀNA UPĀDHYĀYA

(PART I)

EDITED BY

PANDIT BADRI NATHA S'ĀSTRI, M. A.,
Lecturer in Sanskrit, Lucknow
University Lucknow.

1933.

FOREWORD.

The reputation of Vardhamāna Upadhyaya as a commentator on Udayana Āchārya's philosophical works is universally recognised in the circle of teachers of early Nyāya and Vaiśeṣika systems. Udayana's Kiraṇāvalī, which is the most learned and yet popular exposition of the Padārthadharma Saṇgraha of Praśastapādāchārya is one of the most important works belonging to the Vaiśeṣika School. Padmanābha Miśra's commentary on the Dravya Section of the work, entitled Kiraṇāvalībhāskara, and Vādīndra's commentary on the Guṇa Section, have already appeared in this series (Nos. 1 and 5). The following pages by Vardhamāna, embody another commentary on the Guṇa section. It is hoped that in view of the importance of the original work and the intrinsic merit of Vardhamāna's annotations no apology is needed for bringing out the present edition.

The text of the Commentary will be completed in the second part, which will contain the general Introduction to the edition embodying the editor's notes on the author, his time and his literary productions.

Government Sanskrit College, Benares } Gopinath Kaviraj.

किरणावलीप्रकाशः ।

गुणनिरूपणम् ।

एकत्र संनिपतितासितकण्ठबिम्ब-
मन्यत्र चन्द्रकिरणाहितशुभ्रभावम् ।
सन्ध्याजलाञ्जलिमनङ्गरिपोर्नमामि
हस्तप्रविष्टमिव पुण्यतमं प्रयागम् ॥ १ ॥

नतिबन्नुतेरपि प्रारिप्सितविघ्नविघातकत्वात्तामादौ कृतां निबध्नाति तुष्टेरिति । तुष्टिः अनुरक्तिः, अतुष्टिः द्वेषः, तदुभयमपि मोचनीययोरीश्वरविषयकमेव । 'परात्परतरं यान्ति नारायणपरायणाः । न ते तत्र गमिष्यन्ति ये द्विषन्ति महेश्वरम्' इति स्मृतेः । यद्वा मोचनेच्छाबन्धनेच्छे तुष्ट्यतुष्टी ईश्वरस्यैव । तदिच्छाया एकत्वेऽपि तत्तत्फलोपधानात् सिसृक्षासञ्जिहीर्षावदौपचारिको भेदः, सहकारिभेदसमवधानात् तस्याः कार्यभेदजनकत्वाच्च । अत्र बध्नतः पुनरित्यनेन बन्धस्यावृत्त्या मोक्षानन्तरं बन्ध इत्यर्थे विरोधाददतुष्टः पुनरिति योजना । तथाच व्यवच्छेदार्थः पुनःशब्दो नावृत्त्यर्थ इति नोक्तदोषः । यद्वा बध्नतः पुनरित्यनेन बन्धस्य निरन्तरावृत्तिरुच्यते न मोक्षोत्तरेति नोक्तदोषः । मुक्तिबन्धौ दुःखसंततेरत्यन्तोच्छेदतदनुवृत्ती तयोश्च शरीरावच्छेद्यत्वात् । विश्वपदेन भोगायतनं शरीरमेव कारागारत्वेन निरु-

प्यते । न च तयोः सादृश्यप्रतिपादनार्थं तयोरेव विशेषणं युक्तम् । (१)अन्यत्र हि कारागृहे प्रभोरेव तोषातोषाभ्यां मोक्षबन्धदर्शनात्प्रकृतेऽपीश्वरव्यापारायत्तत्वात्तत्साम्याय तद्विशेषणस्यैवोचितत्वात् ।

"कारो वधे निश्चये च बलौ यत्ने पशावपि ।
तुषारशैले च पुमान् स्त्रियां भूतिप्रसेवके ।
सुवर्णकारिकायां च बन्धनागारबन्धयोः ।" इति मेदिनीकारः ।

अतः(२) कारा बन्धनं तदर्थं गृहं कारागृहं यथा "कारागृहे निर्जितवासवेन" इत्यत्र । काराख्पं गृहं कारागृहम् । विशेषमुपादाय (३)सामान्यपदोपादानं विशेषगतातिशयं प्रतिपादयतीति व्युत्पत्तेरत्रापि विशेषप्रतिपत्तये गृहपदमित्यन्ये ।

अत्र द्रव्ये धर्मिणि निरूपिते धर्मा रूपादयो निरूप्यन्त इति द्रव्यगुणनिरूपणयोर्हेतुहेतुमद्भावं दर्शयितुं वृत्तवर्तिष्यमाणे कीर्तयति-साधर्म्येति । यद्वा प्रतिबन्धकप्रधानीभूतद्रव्यतत्त्व(४)-जिज्ञासानिवृत्तिकथनेनावसरलक्षणैव संगतिरनेनोक्ता । प्रकारे तृतीया । निरूपणं तु(५) सजातीयविजातीयव्यावृत्तत्वेन ज्ञानम् । ननु गुणानामित्यत एव रूपादिप्राप्तौ रूपादीनामिति व्य-

(१) उचितम्--इति (क) पुस्तके ।
(२) मेदिनीकारकोषात्—इति (क) पुस्तके ।
(३) च—इति (क) पुस्तकेऽधिकम् ।
(४) निरूपण—इति (क) पुस्तकेऽधिकम् ।
(५) च इति (क) पुस्तके ।

र्थमित्यत आह—गुणशब्देनेति । ननु गुणशब्दवद्रूपादिशब्दसर्वशब्दौ नानार्थौ ततोऽपि कथं शङ्कापनयः । न च प्रकरणसाचिव्यात् तथा । गुणपदमात्रो(१)पादानेऽपि तत्सम्भवात् । न च रूपादीत्यादिशब्दो व्यवस्थावाची व्यवस्था च वैशेषिकप्रसिद्धेति रूपादिपदं चतुर्विंशतिगुणपरमिति युक्तम् । तथापि गुणपद(२) वैयर्थ्यापत्तेः । न चादिपदस्य व्यवस्थावाचित्वं गुणपदसमभिव्याहारादेवेति वाच्यम् । एकपदेनैव तदुपदर्शनसंभवेनेतरपदस्य वैयर्थ्यापत्तेः ।

अत्राहुः । रूपादिपदं चतुर्विंशतिमात्रपरं रूपत्वादीनां जातिरूपतया शीघ्रोपस्थितिकत्वात्(३) उपाधेश्च विलम्बो(४)पस्थितिकत्वात् । एतच्छास्त्रप्रसिद्धेर्वा । गुणपदं चाप्राधान्यार्थम्(५) । अप्राधान्यं च द्रव्यापेक्षया (६)रूपादीनां द्रव्यधर्मत्वेनाप्रधानत्वात् द्रव्यस्य च धर्मितया प्रधानत्वात् । तदुपदर्शनं च धर्मिनिरूपणं धर्मनिरूपणहेतुरिति संगतिप्रदर्शनपरम् ।

तथापि रूपत्वरसत्वादिनोपस्थिते धर्मिणि प्रत्येकमन्वये

(१) मात्रपदो—इति (क) पुस्तके ।
(२) पदस्य—इति (क) (ख) पुस्तकयोः ।
(३) उपस्थितत्वात्—इति (क) पुस्तके ।
(४) विलम्बितो—इति (क) पुस्तके ।
(५) अप्रधानार्थम्—इति (क) पुस्तके ।
(६) द्रव्यापेक्षम्—इति (क) पुस्तके ।

वाक्यभेदापत्तिः । अथ गुणत्वेनोपस्थितिस्तदा(१) तत्र(२) गुणत्वाविधानादुद्देश्यविधेयतावच्छेदकप्रकारयोरभेदानुपपत्तिः ।

मैवम् । गुणत्वसंबन्धस्य तल्लक्षणत्वस्य वा विधेयत्वात् । यद्वा । रूपादिपदगुणपदयोरुभयोरपि चतुर्विंशतिपरत्वे रूपादीनां गुणत्वाभिसंबन्धो गुणानां द्रव्याश्रितत्वमिति प्रत्येकमनादृत्यैवान्वयः । अत्र तु रूपादीनां निष्क्रियत्वं गुणानामगुणत्वमित्येकावृत्त्यैवान्वयः अन्यथा त्वनेकावृत्तिकल्पना स्यात् ।

तथापीति । ननु रूपादीनां गुणत्वसम्बन्धे विहिते संकोचकाभावात् सर्वेषामिति प्राप्यत एवेति सर्वेषामिति व्यर्थम् ।

अत्राहुः । यद्रूपावच्छिन्ने गुणत्वसंबन्धो विधीयते तद्रूपसामानाधिकरण्यमात्रेणापि तत्पर्यवसानात्तद्रूपव्यापकत्वं गुणत्वसंबन्धस्य न प्राप्तमिति तद्बोधनार्थं सर्वपदम् ।

यद्वा । कपिञ्जलन्याया(३)द्बहुवचनं न त्रित्वमात्रपरमिति बोधनार्थं सर्वेषामित्युक्तम् ।

सामान्यविशेषो रूपादिचतुर्विंशतिमात्रवृत्तिजातिविशेषः । नन्वभिसबन्ध इत्यत्राभिपदं व्यर्थम् अभेः(४)सर्वपदेनैव दर्शितत्वादित्यत आह—अभिमत इति । एकार्थसमवायित्वेना-

(१) तदा—इति (ख) पुस्तके नास्ति ।
(२) तत्र—इति (क) पुस्तके नास्ति ।
(३) न्यायेन—इति (क) पुस्तके ।
(४) अभिव्याप्तेः—इति (क) (ख) पुस्तकयोः ।

भिमत(१) इत्यर्थः । तेनेति । तच्छब्देन गुणत्वमात्रं परामृश्यते न तु समवायोऽपि । तावन्मात्रस्यैव गमकत्वे तस्य व्यर्थत्वात् । न चैवं समवायपदवैयर्थ्यम्(२) । समवायेन सबन्धेन गुणत्वं(३) हेतुरित्युपदर्शनार्थत्वात् । उक्तामिति । केवलव्यतिरेकानुमानरूपामित्यर्थः । गुणत्वमिति ।

नन्वत्रानुमानपरतायामाश्रयासिद्धिः सिद्धौ वा बाधः साध्यसाधनविकलश्च दृष्टान्तः, अत एव नानुपलम्भमात्रपरत्वमपि ।

मैवम् । गुणत्वं तावदुभयसिद्धम् । तज्जातिरुपाधिर्वेति विवादः । तत्र गुणत्वं न जातिः अनुगतत्वेनाप्रत्यक्षत्वात् व्यतिरेके(४) गोत्वादिवदित्यर्थात् ।

रूपं न रूपत्वतद्व्याप्यभिन्नसत्ताव्याप्यजातिमत् तत्त्वेनाप्रतीयमानत्वात् गोत्वादिवदित्यन्ये ।

तन्न । गुणत्ववत् सत्तारूपत्वादिजातिरपि तैरनङ्गीकृतेति तदसिद्धेस्तादवस्थ्यात् ।

व्यवस्थापकेति । ननु व्यवस्थापकं व्यञ्जकं तस्य चाननुगमेऽपि गोत्वादिजातिसत्त्वान्नानुगतो व्यञ्जको जातिव्यवस्थापकः । प्रत्युत व्यञ्जकस्यानुगतत्वे(५) जातिरेव न सिध्येत् तत

(१) समवायादिस्त्वनभिमत—इति (क) (ख) पुस्तकयोः ।
(२) समवायादिपदं व्यर्थम्—इति (क) पुस्तके ।
(३) हि—इति (ख) पुस्तकेऽधिकम् ।
(४) व्यतिरेकेण—इति (क) पुस्तके ।
(५) व्यञ्जकानुगमे—इति (क) पुस्तके ।

एवानुगतबुद्ध्यापत्तेः(१) । अननुगतं च व्यञ्जकं रूपत्वादि प्रकृतेऽस्त्येव ।

अत्राहुः । गुणत्वे व्यञ्जकं भवदननुगतमनुगतं वा जातिसमनियतं स्यात् । आद्ये गुणत्वमसिद्धमित्युक्तम् । व्यञ्जकाननुगमेऽपि गोत्वमनुगतप्रतीत्या सिध्यति । रूपादिषु गुणत्वप्रकारिका जातिविषयानुगतधीर्नास्तीत्यर्थः । अन्त्ये व्यवस्थापकाभावादिति । कर्मव्यावृत्तस्यानुगतस्य व्यञ्जकस्याभावादित्यर्थः। गुणत्वे प्रत्यक्षं वा मानम्(२) अनुमानं वा । आद्ये गुणत्वमसिद्धमित्युक्तम् । गोत्वादिवदिति व्यतिरेकदृष्टान्तः । यथा गोत्व(३)मनुगताकाराध्यक्षसिद्धं न तथा गुणत्वमित्यर्थः। अन्त्ये व्यवस्थापकाभावादित्यन्ये ।

पूर्वं गुणत्वे बाधकमुक्तम् इदानीं साधकमपि नास्तीत्युच्यते इत्यपरे । इतरेतराश्रयेति । वस्तुतः कर्मण्यतिव्याप्तत्वान्नेदं गुणत्वसमनियतं व्यञ्जकम् । अत एव सामान्यवान् संयोगानाश्रय इत्यपि । इतरेतराश्रयाभावेऽपि कर्मण्यतिव्याप्तमिति भावः ।

अतिव्यापकमिति । लक्षणपक्षे दूषणमिदम् । यदा तु रूपादौ रूपत्वादितद्व्याप्येतरसत्ताव्याप्यजातिमत्त्वे साध्ये तल्लिङ्गं तदा तत्र स्पर्शरहितत्वं व्यर्थं विशेषणम् । सामान्यवत्त्वमात्रं

(१) बुद्ध्युपपत्तेः--इति (क) पुस्तके ।
(२) स्यात् इति (क) पुस्तकेऽधिकम् ।
(३) गोत्वादिक—इति (क) पुस्तके ।

तु विपक्ष(१)बाधकाभावादप्रयोजकम् । अन्यथा कर्मण्यपि तत एव कर्मत्वतद्व्याप्येतरसत्ताव्याप्यजातिमत्त्वं स्यात् । न च द्रव्यावृत्तित्वजातिसिद्धौ तदुपयोगः । तथापि कर्मावृत्तितायास्तत्रासिद्धेरिति दूषणं द्रष्टव्यम् । न च कर्मान्यत्वेन लक्षणविशेषणान्नैष दोष इत्यत आह—कर्मान्यत्वे सतीति ।

ननु नैतत्प्रक्रियामात्रं कर्मान्यत्वे सतीत्यकृते कर्मण्यतिव्याप्तेः । रूपान्यत्वे रसान्यत्वे सतीत्यत्र च रूपरसा(२)दावव्याप्तेः । अथान्योन्याभावोऽनुयोगितावच्छेदकरूपेणानुयोग्युपस्थितौ प्रतीयते, प्रतियोग्यवृत्तिश्च धर्मोऽनुयोगितावच्छेदकः, अत्र चानुयोगितावच्छेदकं नास्ति, न च(३) रूपत्वादिजातिस्तथा, तदसिद्धेः । तन्न । जात्यभावेऽपि चक्षुर्मात्रग्राह्यगुणत्वाद्युपाधीनामेव तथात्वात् । कर्मणो विपक्षत्वनिश्चय एव कर्मान्यत्वं विशेषणम् । अत्र(४) स नास्तीति चेन्न । कर्मावृत्तिव्यवस्थापकबलेन रूपादौ कर्मव्यावृत्त(५)जातिसिद्धौ तन्निश्चयात् । न च सामान्यवत्त्वकार्यानाश्रयत्वमात्रस्य जातिव्यवस्थापकत्वे कर्मसाधारणी जातिः सिध्यतीति (६)कर्मणो विपक्षत्वानिश्चयः । न हि

(१) विपक्षे--इति (ख) पुस्तके ।
(२) रूपादा--इति [क] पुस्तके ।
(३) च--इति (क) पुस्तके नास्ति ।
(४) तु—इति (क) पुस्तकेऽधिकम् ।
(५) कर्मावृत्ति—इति (क) पुस्तके ।
(६) सिद्ध्येदिति--(क) पुस्तके ।

निमित्तान्तरेण रूपादौ कर्मसाधारणजात्यन्तरासिद्धिरुक्तव्यवस्थापकबलेन कर्मव्यावृत्तजातिसिद्धौ विरोधिनी । एकत्रोभयतादृशजातिसिद्धौ विरोधाभावात् ।

अत्राहुः—न धर्ममात्रं जातिव्यवस्थापकम् अपि तु जातिनियतम्, अन्यत्वं च न तथा, तथात्वे वा रूपान्यत्वेन रसादौ रसान्यत्वेन वा रूपादौ तत्कल्पनेति संकरापत्तिः । यद्वा अन्यत्वं व्यभिचारिजातीयतया व्याप्यत्वेन व्यवहारादौ न निश्चेतुं शक्यते । रूपान्यत्वादिना रसान्यत्वादिना च व्यभिचारिजातीयत्वमेव दर्शितम् ।

किमत्रेति । व्यवस्थापकेन लिङ्गेनेत्यर्थः । रत्नतत्त्वमिति । यथा रत्नतत्त्वव्याप्यजातिरिन्द्रियसंनिकर्षमात्रवेद्यापि रूपप्रभाविशेषवान् मणिः पद्मरागपदवाच्य इति जातिविशेषनियतधर्मोपदेशजसंस्कारसध्रीचीनेनेन्द्रियेणानुभूयते तथा गुणत्वसामान्यमपि सामान्यवान् कार्यानाश्रयः कर्मान्यो गुणपदवाच्य इत्युपदेशजसंस्कारसहकृतेन्द्रियवेद्यमित्यर्थः ।

निमित्तमिति । सामान्यनियतधर्मान्तर्भावेनोपदेशो जातिग्राहको न च प्रकृते सोऽस्तीत्यर्थः ।

ननूक्तोपाधिरूपमेव सामान्यमादायोपदेशः प्रत्यक्षेण जातिग्रहे सहकारी स्यात् । न वा सामान्यनियत(१)धर्मोपदेशः प्रत्यक्षसहकारीति नियमः । अनतिप्रसक्तधर्मोपदेशस्यैव तत्सहकारि-

(१) नियत एव—इति (क) पुस्तके ।

त्वसंभवात् लाघवाच्च । अथाध्यक्षज्ञाने जनयितव्ये नेन्द्रियाणां शब्दः सहकारी साक्षात्त्वशाब्दत्वजात्योः संकरापत्तेः । किन्तु शाब्दं ज्ञानमिन्द्रियसहकारि धर्मविशेषज्ञानव्यङ्ग्यत्वाद्रत्नजातिविशेषाणाम् । शब्दस्यापि परिचायकधर्मोपदर्शनद्वारा सहकारित्वं वाच्यम् । तथा च धर्मविशेषज्ञानमेवेन्द्रियसहकार्यस्तु ।

तन्न । प्रकृते(१) गुणत्वप्रतीताविन्द्रियाणामुक्तव्यवस्थापकज्ञानस्यैवेन्द्रियसहकारित्वापत्तेः ।

वस्तुतो रत्नगत(२)जातिविशेषज्ञानेऽपि नोपदेशस्येन्द्रियसहकारित्वम् । उपदेशं विनाप्यनुगतमतेर्जातिविषयायाः सत्त्वात् । उपदेशस्य तु जातिविशिष्टस्य शब्दविशेषवाच्यताप्रतिपादनेनो(३)पयोगित्वं प्रथममनेकधर्मदर्शने किंधर्मविशिष्टो धर्मी शब्दविशेषवाच्य इति परिच्छेत्तुमशक्यत्वात् । तदिहापि कर्मान्यत्वाद्युपाधिना व्यावृत्तो धर्मी गुणपदवाच्य इत्युपदेशजज्ञानसापेक्षमिन्द्रियं गुणत्वं गमयिष्यति ।

अत्राहुः—रत्नविशेषेऽनतिप्रसक्तो धर्मविशेषो रूपादिविशेष एव वाच्यः, तस्य च कार्यस्य कारणतावच्छेदकः(४) सामान्यविशेषोऽवश्यं वाच्यः, स च योग्यव्यक्तिवृत्तितया प्रत्यक्षः । गुणत्वे तु प्रमाणान्तरानवतारदशायामुक्तव्यवस्थापकेनो-

(१) प्रकृतेऽपि—इति (क) पुस्तके ।
(२) गत—इति (क) पुस्तके नास्ति ।
(३) प्रतिपादनो—इति (क) पुस्तके ।
(४) कार्यकारणतावच्छेदकः—इति (क) पुस्तके ।

पदेशेन वा विप्रतिपन्नं प्रति प्रत्यक्षमसिद्धं सिद्धौ वा रसादावपि रूपान्यत्वोपाधिसहकारेण सामान्यमेकं प्रत्यक्षं सिध्येत् । न चैतच्छास्त्रं रत्नशास्त्रवदागमतया गुणत्वे मानम् । युक्तिप्रणयनवैयर्थ्यात् । परं प्रत्याप्तोक्तत्वासिद्धेश्च प्रामाण्यासिद्धौ चागममात्रं न प्रत्यक्षसहकारि ।

तस्मादिति । कर्मव्यावृत्तव्यवस्थापकस्योक्तस्यातिप्रसञ्जकत्वात्सामान्यवत्त्वकार्यानाश्रयत्वमात्रेण जातिसिद्धौ च(१) कर्मसाधारण्यमित्यर्थः ।

तस्मादिति । स्वोत्पत्त्युत्तरकालभाविभावभूतानपेक्षत्वमात्रमत्रानपेक्षत्वं विवक्षितम् । तेन कर्मणो द्रव्यपूर्वदेशसंयोगनाशापेक्षित्वेऽपि नासिद्धिः ।

नन्वेकजातीयकार्यकारित्वेनैकजातीयत्वं साध्यते कर्मविलक्षणकार्यकारित्वेन विजातीयत्वं वा ?

नाद्यः, व्यभिचारात् द्रव्यकर्मणोस्तथात्वेऽप्यतथात्वात् सत्तया सिद्धसाधनाच्च ।

द्वितीये चाप्रकृतत्वम् ,(२) एकजातीयत्वासिद्धेः । अपि च परस्परविरुद्धसंयोगविभागरूपकार्यकारित्वमसमवायिकारणत्वमत्राभिमतं कारणत्वमात्रं वा । नाद्यः । अकर्मत्वेनैव तदभावसम्भवात् । न हि द्रव्ये संयोगविभागोभयासमवायिकारणत्वमस्ति ।

(१) च—इति (क) पुस्तके नास्ति ।

(२) अप्रयोजकत्वम्—इति (ख) पुस्तके ।

नान्त्यः, धर्मादौ परमेश्वरज्ञानादौ च विरुद्धकार्यकारितया गुणत्वाभावापत्तेः । किञ्च विरुद्धकार्यान्यकार्यजनकत्वं(१) रूपादौ कर्मव्यावृत्तजातिव्यवस्थापकं(२) विरुद्धकार्याजनकत्वं(३) वा । आद्ये यदि जनकत्वमात्रेण तदा द्रव्यकर्मसाधारणी जातिः स्यात् असमवायिकारणत्वेऽपि(४) कर्मसाधारणी स्यात् अदृष्टज्ञानसाधारणी च न स्यात् । अन्त्ये सामान्यादिसाधारण्यम् । न च सामान्यवत्त्वेन विशेष्यम्(५) । अदृष्टेश्वरज्ञानादौ गुणत्वासिद्धिप्रसङ्गात् । न च विरुद्धकार्यासमवायिकारणत्वव्यतिरेको विवक्षितः । द्रव्यसाधारण्यापत्तेः ।

अत्राहुः—रूपादौ संयोगविभागसमवायिकारणत्वासमवायिकारणत्वशून्ये जातिमति यत्कारणत्वं तन्न रूपत्वाद्यवच्छेद्यं मिथो व्यभिचारत् सत्तायाश्चातिप्रसक्तत्वा(६)दित्यनुगतधर्मावच्छेद्यं तदेव गुणत्वम् । न चैवं तद्विलक्षणकारतणया द्रव्यकर्मसाधारणी जातिः सिध्येत् । संयोगविभागसमवायिकारणत्वेन द्रव्यत्वस्य तदुभयासमवायिकारणत्वेन च कर्मत्वस्य सिद्धावविरोधात् ।

(१) विरुद्धकार्याजनकत्वम्—इति (क) पुस्तके ।

(२) साधकं—इति (क) पुस्तके ।

(३) विरुद्धकार्यातिरिक्तकार्यजनकत्वं-इति (क) पुस्तके ।

(४) असमवायिकारणत्वेन तु—इति (क) पुस्तके ।

(५) तद्विशेष्यम्-इति (क) पुस्तके ।

(६) अतिप्रसञ्जकत्वात्—इति (क) पुस्तके नास्ति ।

यद्वा—रूपादयो रूपत्वादिभिन्नसत्ताव्याप्यजातिमन्तः सामान्यवत्त्वात् कर्मवत् । न च रूपाद्यवृत्तिजातिमत्त्वमुपाधिः । साध्यव्यापकताग्राहकमानाभावात् । अत एव न कर्मत्वमुपाधिः । द्रव्ये साध्याव्यापकत्वाच्च । न चैवं द्रव्यमात्रे द्रव्यगुणयोर्वा द्रव्यत्वादि(१)तद्व्याप्यान्यसत्ताव्याप्यसामान्यवत्त्वमपि सामान्यवत्त्वादनुमीयेतेति वाच्यम्(२) । विपक्षे बाधकाभावात् । प्रकृते च तादृशकार्यस्याकस्मिकतापत्तेरेव(३) विपक्षबाधकत्वात् ।

यद्वा—रूपत्वं सत्ताव्याप्यजातिव्याप्यं रूपमात्रवृत्तिजातित्वात् शुक्लत्ववत् । न च रूपत्वव्याप्यत्वमुपाधिः । पृथिवीत्वादौ साध्याव्यापकत्वात् निमित्तकारणतातिरिक्ता या(४) संयोगविभागोभय(५)कारणता तद्विरोधिनी सामान्यसमानाधिकरणा या कारणता सा गुणत्वव्यवस्थापिका । द्रव्ये हि तादृशकारणताविरोधिनी कारणता क्वचित् द्रव्यस्य तन्निमित्तकारणत्वेन समावेशात् । सामान्यस्य तु तादृश्यपि कारणता न सामान्यसमानाधिकरणा । न च निमित्तकारणत्वातिरिक्तत्वेन रूपेण यत्तौ प्रति कारणत्वं तेन द्रव्यकर्मसाधारणी जातिः स्यात् । तौ प्रति कारणान्तरसाधारणं यदसमवायिकारणत्वं तस्य जात्यव्यवस्थापक-

(१) आदि—इति (क) पुस्तके नास्ति ।

(२) जातिमत्त्वमपि जातिमत्त्वादनुमीयेत—इति (क) पुस्तके ।

(३) जातिकार्यस्याकस्मिकत्वप्रसक्तेरेव—इति (क) पुस्तके ।

(४) निमित्तकारणतातिरिक्तेन रूपेण—इति (क) पुस्तक ।

(५) संयोगविभागौ प्रति—इति (क) पुस्तके ।

त्वात् । अन्यथा तौ प्रति समवायिकारणत्वातिरिक्तं यत्कारणत्वं तेन संयोगमन्तर्भाव्य जातिसिद्धौ सांकर्य(१) स्यात् । विभागपूर्वकसंयोगासाधारणकारणत्वाभावश्च गुणत्वव्यञ्जकः । तेन संयोगादृष्टेश्वरज्ञानानामुभय(२)जनकत्वेऽपि न तत्र गुणत्वाभावः ।

स्वोक्ते सूत्रकारसंमति(३)माह—सोऽयमिति । द्रव्याश्रितत्वस्य द्रव्यादिपञ्चकेऽतिव्याप्तिं निराकर्तुमाह—अनाश्रितत्वेति । उक्तम् । साधर्म्यप्रस्तावे प्रशस्तपादाचार्येणेति शेषः । समवायवदिति व्यतिरेके दृष्टान्तः(४) । तेन यथा समवायो न वर्तते तथा गुणा न वर्तन्त इति नास्ति, यथा वा द्रव्याणि कानिचिन्न वर्तन्ते तथा केचिद्गुणा न वर्तन्ते इति नास्ति, यथा च कर्मणि विशेषाः केषुचिदेव द्रव्येषु वर्तन्ते न तथा गुणाः, यथा सामान्यमद्रव्येऽपि वर्तन्ते न तथा गुणाः, किन्तु पदार्थत्वावान्तरविभाजकोपाधिना सकलद्रव्यवृत्तय इत्यर्थः ।

ननु गुणरूपेणेति यदि गुणत्वं सामान्यं विवक्षितं तदा स्वरूपासिद्धिः, गुणत्वस्य द्रव्यावृत्तित्वात् । अथ गुणव्यक्तय एव विवक्षितास्तथापि स एव दोषः गुणव्यक्तीनामेकैकद्रव्यवृत्तित्वेन

(१) जातिसांकर्य—इति क पुस्तके ।

(२) ज्ञानादौ उभय—इति (क) पुस्तके ।

(३) अनुमति—इति (क) पुस्तके ।

(४) व्यतिरेकदृष्टान्तः—इति (क) पुस्तके ।

सकलद्रव्यावृत्तित्वात्(१) ।

मैवम् । द्रव्यत्वावच्छिन्नव्याप्यताप्रतियोगिकव्यापकतावच्छेदकसत्तासाक्षाद्व्याप्यजातिमत्त्वस्य(२) विभुसमवेतवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वस्य वा विवक्षितत्वात् ।

निष्क्रियत्वागुणत्वयोः कर्मादावतिव्याप्तिरिति पूर्वसाधर्म्यद्वयोपपादकतया द्वे व्याचष्टे—तदेतदिति । पूर्वसाधर्म्यद्वयमित्यर्थः । द्रव्यलक्षणेति । रूपादिभ्यो द्रव्यत्वस्य व्यावृत्त्येत्यर्थः । न हीति । रूपादिषु द्रव्यत्वे सतीत्यर्थः ।

जातिसंकरेति । यद्यपि द्रव्यत्वव्याप्यत्वे गुणत्वस्य(३) न जातिसांकर्यं तथापि सर्वत्र(४)गुणेषु यद्यनित्यगुणाः स्युस्तर्ह्यनिर्मोक्षापत्तिरिति । यत्र गुणे गुणो नाङ्गीकार्यस्तत्र केवलं गुणत्वं वर्तते घटादौ च केवलं द्रव्यत्वमित्यन्यत्र तयोः संकरः स्यात् । गुणेषु गुणस्य नित्यत्वे च(५) जातित्वापत्त्या गुणत्वव्याघात इत्यर्थः । वस्तुतो गुणे द्रव्यत्वसत्त्वे तदविनाभूतसंयोगादेरप्यावश्यकत्वान्न तत्र गुणत्वं वर्तेत । संयोगाद्यसमवायिकारणतासमवायिकारणताविरोधिकारणतया(६) गुणत्वकल्पनात् ।

(१) द्रव्यवृत्तित्वाभावात—इति (क) पुस्तके ।

(२) व्याप्यावान्तरजातिमत्त्वस्य—इति (क) पुस्तके ।

(३) द्रव्यत्वव्याप्यगुणत्वे— (क) पुस्तके ।

(४) सर्वत्र—इति (क) पुस्तके नास्ति ।

(५) नित्यत्वेन—इति (क) पुस्तके ।

(६) संयोगादिसमवाय्यसमवायिकारणताविरोधितया—इति (क) पुस्तके ।

यश्च धर्मो यत्र नास्ति तत्रापि तेन धर्मेण जातिकल्पनेऽतिप्रसङ्गः । न वा गुणेषु द्रव्यत्ववृत्तौ मानमस्ति । मानाभावेऽपि जातिकल्पने सर्वं सर्वजातीयं स्यादित्यर्थः(१) । नाप्यभिव्याप्त्येति । जातिसंकराद्गुणे गुणत्वानभ्युपगमे गुणत्वरूपेण सर्वद्रव्यवृत्तित्वं यद् द्रव्याश्रितत्वमुक्तं तदपि न स्यादित्यर्थः ।

ननु निष्क्रियत्वं स्वरूपासिद्धं धात्वर्थात्मिकायाः क्रियाया गुणेष्वपि सत्त्वादित्यत आह—चलनेति । एतत् निष्क्रियत्वम् । क्रियाया इति । मूर्तत्वस्य क्रियासमवायिकारणतावच्छेदकत्वादित्यर्थः । समानदेशत्वादिति । एतत्पटाश्रित(२)तन्तुरूपं यदि मूर्तं स्यात् एतत्तन्तावेतत्पटस्य समानदेशं न स्यादिति क्रमेणापादनम् । निष्क्रियत्वं च यद्यपि निष्क्रियाविनष्टद्रव्येऽतिव्याप्तं तथापि क्रियां प्रति समवायिकारणतावच्छेदकरूपाभाववत्त्वं च साधर्म्य(३)मभिप्रेतम् ।

ननु न विद्यन्ते गुणा यस्येति बहुव्रीहिणैव विवक्षितार्थलाभे नञ्तत्पुरुषान्मतुब् व्यर्थः कर्मधारयमत्वर्थीयाद्बहुव्रीहिरेवेष्टो लाघवादिति न्यायात् प्रत्युत पर्युदासनञा गुणेतरत्वं ततः(४)प्रतीयेत तच्च विवक्षितं नेत्यत आह—गुणा येष्विति । अनवस्थेति । यद्यप्यनवस्थाधर्मिणोऽग्रिमाग्रिमस्याप्रसिद्ध्या वाश्रयासिद्धिस्त-

(१) इति भावः—इति(क) पुस्तके ।

(२) पटाश्रय—इति (क) पुस्तके ।

(३) च साधर्म्यम्—इति (क) पुस्तके नास्ति ।

(४) गुणेतरवत्त्वं—इति (क) पुस्तके ।

थापि रूपादीनां रूपादिमत्त्वे रूपादिमत्त्वमेव न स्यादित्यव्यव-
स्थैवानवस्थार्थः । योग्यानुपलब्धिबाध इत्यपि द्रष्टव्यम् ।

गुणेष्विति । यद्यपि रूपादीनां गुणवत्त्ववादिनो द्रव्यत्व-
समवायिकारणत्वे इष्टे एव, तथापि रूपादीनां द्रव्यत्वे तदवि-
नाभूतपरिमाणमपि मन्तव्यम् । तद्यद्यवच्छिन्नं तदा मूर्तत्वं तच्च
निराकृतमेव । अथानवच्छिन्नं तदा विभुत्वापत्तौ बाह्येन्द्रियाप्र-
त्यक्षत्वापत्तिः अकार्यत्वापत्तिश्चेति भावः । यद्वा पूर्वापरितोषेणा-
ह-रूपावयवीति । नन्वत्रापाद्यापादकयोर्वैयधिकरण्यं रूपेष्वेव
वर्तत इति वापादकमासिद्धं घटादावपि रूपं वर्ततां रूपे च रूपान्तर-
मस्त्विति कथं घटादेर्नीरूपत्वं रूपस्यावयवित्वे चापादकाभावः ।

अत्राहुः--रूपं यदि कार्यं सद्रूपवत्स्यात् अवयवि स्यात्,
यदि चावयवि स्याद् घटावृत्ति स्यात्; किंच रूपस्य रूपवत्त्वे
घटरूपयोरुभयोरपि समवायिकारणत्वेनानुगमात् यदि रूपं स-
मवायिकारणं तदा घटादेर्नीरूपत्वप्रसङ्गः । आदिपदग्राह्यं च रू-
परसयो रूपरसवत्त्वे मूर्त्तत्वापत्तौ घटादे रसवत्त्वे नीरूपत्वप्रसङ्गः
रूपवत्त्वेऽपि(१) नीरसत्वप्रसङ्ग इत्यपि(२) ।

नन्विदमासिद्धं गुणानां चलनप्रतीतेः संख्यादिगुणप्रतीते-
श्चेत्यत आह--एवमिति ।

यद्यपि गौणी वृत्तिः शब्दधर्म इति शब्दप्रयागरूपव्यवहार-

(१) रूपवत्त्वे च—इति (क) पुस्तके ।
(२) इत्यादि-इति (क) पुस्तके ।

समर्थनेऽपि प्रतीतिर्नैव(१) समर्थिता तत्र गुणवत्त्वाभावात्(२) त-
थापि संख्यादिप्रतीतौ साक्षात्सम्बन्धे बाधकात् परम्परासम्बन्धे-
नाप्युपपत्तेरन्यथासिद्धिः ।

यद्वा परम्परासम्बन्धेन दोषेण प्रतीतिरियमारोपरूपा । न
चैवं शब्दे महत्तमादि(३)धीर्न स्यादाकाशमहत्त्वस्यै(४)करूपत्वे-
नाविशेषादिति वाच्यम् । अत एवानुपपत्तेस्तस्यास्तारतम्यादि-
रूपावान्तरसामान्याधीनत्वात् महत्त्वैकार्थसमवायस्यातन्त्रत्वात् ।

चशब्दसमुच्चयान्तरस्य स्वशब्देनोपात्तत्वादनुक्तसमुच्चयमा-
ह(५)—चकारादिति । एतच्च रूपादीनां द्रव्यत्वाभावसा-
धनायोक्तं न तु साधर्म्यं कर्मादावतिव्याप्तेः । समवायिकारण-
त्वाभावमेवोपपादयति-यदा हीति । तस्यापि कार्यद्रव्यस्या-
पीत्यर्थः(६) । कार्यद्रव्यगुणे कारणगुणानामसमवायिकार-
णत्वादिति भावः । ननु मूर्तगुणत्वं संख्यादावतिव्याप्तं मूर्तमात्र-
गुणत्वमपि मूर्तमात्रवृत्तिसंख्यादौ गतमित्यत आह-एते मूर्ति-
(७)मिति । मूर्तिवृत्तितावच्छेदकगुणत्वव्याप्यजातिमन्त इत्यर्थः ।

(१) न-इति (क) पुस्तके ।
(२) गौणत्वाभावात् -इति (क) पुस्तके ।
(३) महत्तरमहत्तमादि—इति (क) पुस्तके ।
(४) आकाशरूपस्याश्रयस्य—इति (क) पुस्तके ।
(५) समुच्चयमर्थमाह—इति (क) पुस्तके ।
(६) इत्यर्थः—इति (क) पुस्तके नास्ति ।
(७) मूर्त—इति (क) पुस्तके ।

ननु सा जातिर्यदि गुणत्वसाक्षाद्व्याप्या विवक्षिता तदा वेगास्थितिस्थापकयोरव्याप्तिः तदवृत्तिसंस्कारत्वजातेरमूर्तवृत्ति-भावनावृत्तित्वात् । अथ गुणत्वव्याप्यमात्रजातिर्मता तदा निबिडादि(१)संयोगभेदे परिमाणभेदे चातिव्याप्तिः । अत एव अमूर्तवृत्त्यवृत्तिगुणत्वसाक्षा(२)द्व्याप्यजातिमत्त्वमित्यपास्तम् ।

मैवम् । संस्कारत्वान्यविभुगुणत्वव्याप्यजातिशून्यगुणत्वस्य भावनान्यत्वे सति कालगुणवृत्तिमूर्तगुणवृत्तिगुणत्वसाक्षाद्व्याप्य-जातिमत्त्वस्य वा विवक्षितत्वात् ।

वेगस्य गुणे विभागाभावादाह—वेग इति । उपलक्षण-मिति । भावनातिरिक्तसंस्कारत्वेन शक्यलक्ष्यसाधारणरूपेण जहत्स्वार्थलक्षणयेत्यर्थः ।

ननु चामूर्तगुणत्वं संख्यादावतिव्याप्तम् अमूर्तमात्रगुणत्व-ममूर्तमात्रवृत्तिसंख्यादावपि गतमित्यत आह—एते मूर्तीति । मूर्तिविरोधितावच्छेदकगुणवृत्तिजातिमन्त इत्यर्थः । ननु तत्रा-पि(३) जातिर्यदि गुणत्वसाक्षाद्व्याप्या मता तदा भावनायाम-व्याप्तिः । तद्वृत्तिसंस्कारत्वजातेर्मूर्तगुणवेगादिवृत्तेः । अथ गुण-त्वव्याप्यमात्रं तदा परममहत्त्वेऽतिव्याप्तिः । अत एव मूर्तवृत्त्य-वृत्तिगुणत्वव्याप्यजातिमत्त्वं तत्त्वमित्यपि हेयम् ।

(१) निबिडत्वादि—इति (क) पुस्तके ।

(२) साक्षात्—इति (क) पुस्तके नास्ति ।

(३) नन्वत्रापि सा—इति (क) पुस्तके ।

मैवम् । संस्कारत्वान्यमूर्तगुणवृत्तिगुणत्वव्याप्यजातिशून्य-गुणत्वस्य मूर्त्यसमवायिकारण(१)विशेषगुणत्वस्य वा विव-क्षितत्वात् ।

ननु भावनायाः प्रयत्नविशेषतया प्रयत्नपदादेव तल्लाभ इत्यत आह--भावनेति । विशेषः स्मृतिहेतुत्वम् । ननूभय-गुणत्वं मूर्तामूर्तवृत्तिगुणत्वं तच्च मूर्तमात्रवृत्ति अमूर्तमात्रवृत्ति-संख्याव्यक्तावव्याप्तम् । न च संख्याजातीये तथात्वम् । संख्या-जातीयं हि न संख्याव्यक्तिः । एकस्याः संख्याव्यक्तेर्मूर्तामूर्त-वृत्त्यभावात्(२) । नापि संख्यात्वं जातिः । तस्या द्रव्यावृत्तेः । न च मूर्तगुणवृत्त्यमूर्तगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वम् । संस्का-रेऽतिव्याप्तेरित्यत आह--द्रव्यमात्रस्येति । द्रव्यत्वावच्छिन्न-व्याप्यताप्रतियोगिकव्यापकतावच्छेदकगुणत्वव्याप्यजातिमत्त्वं सं-स्कारत्वान्यमूर्तगुणवृत्तिविभुगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वं वा विवक्षितमित्यर्थः । एकेति । यद्यपि द्विशब्देन द्वित्वाधार उ-च्यते तद्वृत्तित्वं रूपादावप्यस्ति । तथापि द्व्याश्रयान्योन्याभाव-व्यापकात्यन्ताभावाप्रतियोगिगुणत्वमेकत्वान्यव्याप्यगुणत्वं वा वि-वक्षितम् । आदिग्रहणादिति । एकत्वान्यसंख्या एकपृथ-क्त्वान्यपृथक्त्वं वात्र गृह्यत इत्यर्थः । एकस्यामिति ।

(१) मूर्त्यसमानाधिकरण—इति (क) पुस्तके ।

(२) वृत्तित्वाभावात—इति (क) पुस्तके ।

यद्यप्येकत्वाश्रयवृत्तित्वं(१) द्वित्वादावपि अनेकावृत्तित्वं(२) चावृत्तावपि गतम् । तथापि स्वाश्रयान्योन्याभावव्याप्यधर्मनिरूपितवैयधिकरण्याधिकरणत्वम्(३) अन्योन्याभावव्यापकात्यन्ताभावप्रतियोगित्वं(४) स्वाश्रयान्योन्याभावात्यन्ताभावव्याप्यगुणत्वमेकैकवृत्तित्वमभिप्रेतम्(५) ।

ननु शास्त्रान्तरे(६) रूपादयो गुणाः प्रसिद्धा(७) एवेत्यत आह—**विशेषा एवेति** । विनयादिभ्यष्ठगिति स्वार्थिकः प्रत्यय इत्यर्थः । **स्वाश्रयेति** । यद्यप्येतत्संयोगभेदादावप्यस्ति तथापि पृथिवीवृत्तिवृत्तिजलवृत्तिवृत्तीतरसंयोगावृत्तिगुणत्वव्याप्यजातिमत्त्वम् । अत्र परममहत्त्वे तादृशी जातिर्नेति न तत्रातिव्याप्तिः । यद्वा परममहत्त्वावृत्तीति विशेषणं देयम् । भावनान्यत्वविशिष्टमनोवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वानाश्रयत्वे सति गुरुत्वपाकजद्रवत्वान्यगुणत्वं वा वैशेषिकगुणत्वं न तु द्रव्यत्वव्याप्यविभक्तोपाध्यवच्छिन्नेतरभेदप्रयोजकगुणत्वव्याप्यजातिमत्त्वम् ।

---

(१) व्यक्तिवृत्तित्वं—इति (क) पुस्तके ।

(२) अनेकवृत्त्यन्यत्वं—इति (क) पुस्तके ।

(३) अधिकरणगुणत्वम्—इति (क) पुस्तके ।

(४) प्रतियोगिगुणत्वं वा—इति (क) पुस्तके ।

(५) गुणत्वं वैकवृत्तित्वमाभिमतम्—इति (क) पुस्तके ।

(६) अपि इत्यधिकं (क) पुस्तके ।

(७) प्रसिद्धा—इति (क) पुस्तके नास्ति ।

यदि(१) विभक्तोपाधिव्याप्यत्वमात्रं (२)विवक्षितं तदा निबिडसंयोगस्य पृथिवीमात्रवृत्तित्वादतिव्याप्तिः । अथ तत्समनियतं(३) तदा सुखादावव्याप्तिः । तस्येश्वरात्मावृत्तित्वेनात्मत्वावच्छिन्नेतरभेदप्रयोजकत्वाभावात् । नापि संस्कारत्वान्यमनोगुणवृत्तिगुणत्वव्याप्यजातिशून्यगुरुत्वनैमित्तिकद्रवत्वान्यगुणत्वं स्थितिस्थापकेऽतिव्यापकत्वात् । तस्य स्पर्शवन्मात्रवृत्तित्वात् ।

न स्वाश्रयेति । पूर्वनिरुक्तविशेषगुणान्यगुणत्वमात्रं(४) विवक्षितम् । यथोक्तस्यासंभवित्वात् । **एकैकेनैवेति** । यद्यप्येकैकत्वमेकत्वसंख्याधिकरणत्वं तच्च द्वयोरप्यस्ति तथापि द्रव्यग्राहकयावदिन्द्रियाग्राह्यबहिरिन्द्रियग्राह्यगुणत्वव्याप्यजातिमत्त्वमात्रमभिप्रेतम्(५) । योग्या इत्यतीन्द्रियाव्याप्तिनिवृत्त्यर्थम् । ननु शब्दादीनामपि मनःसहकृतेन्द्रियवेद्यत्वात् द्वीन्द्रियग्राह्यत्वमित्यत आह—**बाह्येतीति** । **चक्षुःस्पर्शनेति** । यद्यप्येतत्संस्कारत्वमादाय भावनायामप्यस्ति तथापि संस्कारत्वान्यद्रव्यग्राहकयावदिन्द्रियग्राह्यगुणत्वव्याप्यजातिमत्त्वं विवक्षितम् । नन्वन्तःकरणग्राह्यत्वं प्रत्यक्षमात्रेऽतिव्याप्तं बहिरि-

---

(१) हि—इत्यधिकं (क) पुस्तके ।

(२) त्व—इति (क) पुस्तके नास्ति ।

(३) नियतत्वं—इति (क) पुस्तके ।

(४) मत्र—इति (क) पुस्तके ।

(५) मत्राभिप्रेतम्—इति (क) पुस्तके ।

न्द्रियेष्वपि तत्सहकारित्वादित्यत आह—अन्तःकरणेनैवेति । योग्या इत्यनेन चरमज्ञानादावव्याप्तिर्निरस्ता । तत्रापि योग्यतावच्छेदकरूपसत्त्वात्(१) ।

ननु चादृष्टाद्यपि योगजधर्मादिजन्या(२)ध्यक्षस्यानुव्यवसायस्य च विषय इति तत्रातिव्याप्तिः ईश्वरबुद्ध्याद्यव्याप्तिः । न च बहिरिन्द्रियाजन्यनिर्विकल्पककारणेन्द्रियसन्निकर्षाश्रयगुणत्वव्याप्यजातिमत्त्वं तत्त्वम् । आत्मसंख्यापारिमाणयोरातिव्याप्तेः । तयोर्द्रव्ययोग्यता(३)न्तर्भूतयोग्यताकत्वेन मनोजन्यानिर्विकल्पकाविषयत्वात् ।

मैवम् । अदृष्टभावनाभिन्नात्मविशेषगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य बहिरिन्द्रियजन्यसाक्षात्काराविषययोगजधर्माजन्यजन्यसविकल्पकाजन्यसाक्षात्कार(४)विषयगुणत्वव्याप्यजातिमत्त्वस्य वा विवक्षितत्वात् ।

न केनचिदिति । यद्यप्येतत्परमाणुगुणेष्वीश्वरबुद्ध्यादिषु चातिव्याप्तम् । तथापि संस्कारत्वान्यानिर्विकल्पकाविषयगुणत्वव्याप्यजातिशून्यगुणत्वं वेगान्यत्वे सति वेगेतरप्रत्यक्षगुणावृत्ति-

(१) वत्त्वात्—इति (क) पुस्तके ।

(२) धर्मजन्या—इति (क) पुस्तके ।

(३) ग्रहणयोग्यता—इति (ख) पुस्तके ।

(४) ०सविकज्पकाजन्यजन्यसाक्षात्कार०—इति (क) पु० । ०सविकल्पकाजन्यसामान्यलक्षणप्रत्यासत्त्यजन्यसाक्षात्कार०—इति (ख) पु० ।

गुणत्वसाक्षाद्व्याप्यजातिमत्त्वं वाभिप्रेतम् (१) । ननु स्वकारणगुणपूर्वकत्वमेव नास्तीत्यत आह--स्वाश्रयस्येति । द्रवत्वेत्यत्रेति । परिमाणादावयोग्यत्वान्नानुषङ्गो द्रवत्वे तु योग्यतावशात्स इत्यर्थः । क्वचिदिति । यत्र कारणद्वयसंयोगविभागाभ्यां कार्ये तावित्यर्थः । एष्वेवेति । यद्यपि सम्भावनायोग्यता तदवच्छेदकत्वं न गुणत्वसाक्षाद्व्याप्यजातेः अपाकजेत्यस्य व्यर्थतापत्तेः द्वित्वादावतिव्याप्तेश्च । तथापि गुणत्वसाक्षाद्व्याप्यव्याप्यजातेस्तत्त्वम् । न च परिमाणगुरुत्वद्रवत्वस्नेहाव्याप्तिस्तत्रापि परिमाणत्वादिव्याप्यजातेः(२) सत्वात् । यद्वा पाकजभावनाद्विष्टगुणान्यत्वे सति स्वाश्रयसमवायिसजातीयगुणासमवायिकारणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं तत्वम् । एत इति ।

ननु व्यक्तिविशेषस्याननुगततया नित्यमात्रवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वं तत्त्वं वाच्यम् । तत्र यदि गुणत्वसाक्षाद्व्याप्यजातिर्विवक्षिता तदा भावनायामव्याप्तिः । अथ जातिमात्रं(३) विवक्षितं तदा परमहत्त्वेऽतिव्याप्तिः ।

मैवम् । विभुविशेषगुणत्वस्य विवक्षितत्वात् । शब्दविशेष इति । शब्दविभागाजन्यः शब्द इत्यर्थः । तूलेतीति । प्रचयाख्यसंयोगवन्मात्रोपलक्षणमित्यर्थः । न च परिमाणाव्याप्तिः । सङ्ख्यापरिमाणोभयान्यतरमात्रजन्यजन्यपरिमाणस्य विवक्षित-

(१) अभिमतम्--इति (क) पु० ।

(२) अवान्तरजातेः—इति (क) पु० ।

(३) जातिमत्त्वमात्रं—इति (क) पुस्तके ।

त्वात् । **उत्तर इति** । कर्माजन्यः संयोग इत्यर्थः । संयोगजत्वमत्रसंयोगासमवायिकारणकत्वं न तु तज्जन्यत्वमात्रमिति न विभागेऽतिव्याप्तिः । **कर्मजा इति** । कर्मासमवायिकारणका इत्यर्थः । **आद्याविति** । संयोगविभागासमवायिकारणकौ यौ न भवत इत्यर्थः । **अवेगवदिति** । वेगाजन्यो वेगोऽत्र विवक्षितः । वेगवद्द्रव्यारब्धवेगस्य वेगजन्यत्वादेवेत्यर्थः । **शब्दाविशेष इति** । शब्दसंयोगाजन्यः शब्द इत्यर्थः । बुद्ध्यपेक्षत्वं सुखादावतिव्याप्तं मत्वा व्याचष्टे—**अपेक्षाबुद्धीति** । अपेक्षाबुद्धित्वं जातिविशेषः । यद्यप्येतत्संस्काराद्यतिव्याप्तम् । तथापि मनोगुणवृत्तिकर्मजन्यजातीयावृत्तिनित्यावृत्तिगुणत्वव्याप्यजातिमत्त्वं तत्त्वम् । **द्वयस्येति** । उष्णस्पर्शस्य स्नेहस्य चेत्यर्थः । तथा च स्पर्शेऽनुष्णत्वं विशेषणमुपादेयमेव । स्नेहोपादानं तु न कर्त्तव्यमेवेति भावः । द्वयस्याप्यवर्जनमुष्णस्पर्शस्य स्नेहस्य चेत्यर्थः । तथा चानुष्णपदं त्यक्त्वा स्पर्शमात्रमेवोपादेयम् । **स्नेहेति** । कर्तव्यमेवेति भावः । एतदेव स्पष्टयति । **रूपरसेति** । यद्यप्येतत्संयोगजात्यारम्भक(१)संयोगादिव्यक्तिष्वप्यस्ति । तथापि स्वनिष्ठगुणत्वव्याप्यजातिशून्यसमवायिकारणवृत्तित्वे सति असमवायिकारणानिष्ठैकवृत्तिमात्रवृत्ति(२)गुणत्वव्याप्यजातिमत्त्वमत्राभिप्रेतम् ।

(१) जातिमात्रारम्भक—इति (क) पु० ।

(२) ०निष्ठैकमात्रवृत्तिवृत्ति०—इति (ख) पु० ।

एत एवेति । अनात्मधर्मेति विशेषणं रूपादीनामपि ज्ञानसुखादिविजातीयजनकत्वात् स्वरूपासिद्धिनिरासार्थम् । ज्ञानेतरस्वनिष्ठगुणत्वव्याप्यजातिविजातीयाकारणमात्रस्यैकवृत्तिमात्रवृत्तिगुणत्वव्याप्यजातिमत्त्वं तत्त्वमित्यर्थः । विजातीयमेवेत्यवधारणमुभयारम्भकव्युदासाय ।

यद्यपीश्वरेच्छायत्नयोरस्मदादीच्छायत्नजनकत्वात्तत्राव्याप्तिः बुद्धिजनकत्वाद् द्वित्वादावतिव्याप्तिश्च । तथापि ज्ञानेतरास्मदादिप्रत्यक्षात्मविशेषगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वं तत्त्वमत्र विवक्षितम् ।

सुखमिति । सुखविषयमिति शेषः । **दुःखमिति** । दुःखविषयं द्वेषमित्यर्थः । विषयमात्रत्वादिति । सुखदुःखयोः स्वरूपसतोः ज्ञाना(१)पेक्षणावश्यकत्वे तेनैवान्यथासिद्धिरित्यर्थः । **विषयत्वेऽपीति** । स्वविषयकज्ञानं तयोर्व्यापारो व्यापारेण च व्यापारो नान्यथासिद्धोऽतिप्रसङ्गादित्यर्थः । **भविष्यतोरपीति** । अनागतयोः सुखदुःखयोर्ज्ञानं न व्यापार इति तयोर्ज्ञानमेव तद्धेतुरित्यन्यथासिद्धिरेवेत्यर्थः ।

ननु सुखादिमात्रं प्रति व्यभिचारेऽपि चन्दनादि(२)वैषयिकसुखादिकं प्रति सुखादीनां कारणत्वं स्यादन्यथाऽनागतचन्दनादिज्ञानादपि सुखोत्पत्तेस्तेषामपि सुखहेतुत्वं न स्यात् ।

मैवम् । वैषयिकसुखस्येन्द्रियार्थसन्निकर्षजन्यत्वात् ।

(१) स्वरूपसतोरकारणत्वात्तज्ज्ञाना—इति (क) पु० ।

(२) चन्दनादिवत्—इति (क) पु० ।

पुत्रादिसुखादेश्च पित्राद्यतीन्द्रियत्वेन तदजनकत्वात् ।

वस्तुतः (१)सुखदुःखविषयत्वेन ज्ञानस्य(२) सुखाद्युत्पादकत्वमिति विषयतया तस्य कारणतावच्छेदकत्वं न तु(३) कारणत्वम् ।

नन्वेवं सुखदुःखयोरपि इच्छाद्वेषजनकत्वं न स्यात् तज्ज्ञानयोरेव तत्त्वादित्यत आह—साक्षादिति । स्वज्ञानद्वारा पुत्रादिसुखादेः पित्रादिसुखादिजनकत्वेऽपि प्रकृते स्वविषयकप्रत्यक्षजननसमकालमिच्छादिजनकत्वं विवक्षितं सुखाद्यनन्तरं तज्ज्ञानं विना तदुत्पत्तौ विलम्बाभावेन तस्येच्छाद्य(४)जनकत्वात् । अत्रेच्छाद्वेषयोरुपादानपरिहारफलकत्वात्तयोश्चानागतमात्रविषयकत्वादनागतयोश्चाजनकत्वात् । सुखदुःखज्ञानमेवेच्छाद्वेषजनकमित्यतीन्द्रियमात्रावृत्तिज्ञानान्यात्मविशेषगुणमात्रवृत्तिगुणत्वव्याप्यजातिमत्त्वं तत्त्वं पारिभाषिकमेवेत्याहुः । संयोगेतीति(५) ।

नन्वेतस्य व्यक्तिपरतायामजनकव्यक्तावव्याप्तिर्जातिपरत्वे चानुष्णस्पर्शे इच्छाप्रयत्नयो(६)श्चातिव्याप्तिः । ईश्वरे-

(१) वस्तुतस्तु—इति (ख) पु० ।
(२) विषयज्ञानस्य—इति (क) पु० ।
(३) तु—इति (क) पुस्तके नास्ति ।
(४) तस्य सुखाद्य—इति (क) पु० ।
(५) संयोगादिति—इति (क) पु० ।
(६) इच्छाद्वेषयो—इति (ख) पु० ।

च्छाप्रयत्नयोः समानासमानजातीयारम्भकत्वात् ।

मैवम् । ज्ञानभिन्नेश्वरविशेषगुणानुष्णस्पर्शान्यत्वे सति स्वसमानजातीयज्ञानेतरस्वविजातीयकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ।

स्वाश्रयेति । यथाश्रुतस्योभयत्रारम्भकेऽतिव्याप्तेः स्वाश्रयसमवेतमात्रारम्भकत्वं साधर्म्यमत्राभिमतम् ।(१)

नन्वेतस्य व्यक्तिपरतायामजनकव्यक्तावव्याप्तिः । जातिपरत्वे च वेगस्थितिस्थापकयोरतिव्याप्तिस्ताभ्यां स्वाश्रयकर्मजननात् । बुद्धिशब्दयोरव्याप्तिश्च । ईश्वरज्ञानस्यास्मदादिज्ञानजनकत्वात् । शब्दस्य च व्यधिकरणज्ञानजनकत्वात् ।

मैवम् । व्यधिकरणज्ञानाभिन्नविशेषगुणजनकानिखगुणावृत्तित्वे सति ज्ञानभिन्नविशेषगुणजनकवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य यत्नेतरप्रत्यक्षगुणत्वव्याप्यजातिमद्विभुविशेषगुणत्वस्य वा विवक्षितत्वात् ।

स्नेह इति । द्रव्यान्तर इव जलेऽपि स्नेहः संग्रहाख्यं संयोगं जनयतीत्यर्थः । परिमाणान्ता इति । परत्रैवेत्युभयत्रारम्भकव्यवच्छेदाय । यद्यप्येतदजनकव्यक्तावव्यापकं तथापि समानाधिकरणाजनकमात्रवृत्तिज्ञानान्यजनकवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वमत्र विवक्षितम् । स्नेहान्ता इति । समानाधिकरणसजातीयजनकावृत्तिसजातीयजनकवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः । प्रयत्नान्ता इति । स्वसमानाश्रयैकवृ-

(१) साधर्म्यमभिप्रेतम्—इति (क) पु० ।

त्तिजनकावृत्तिज्ञानेतरैकाश्रितजनकवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः । विहितानिषिद्धगोचरयत्नेऽतिव्याप्तिं (१)निरस्यति । प्रयत्नशब्देनेति । अकारणत्वेति । स्वध्वंसज्ञानभिन्नं कार्यं प्रतीत्यर्थः । संयोगविशेषेणेति । न चैवं संयोगाद्यन्वयो न स्यात् शक्योपलक्ष्यसाधारणैकरूपाभावेनाजहत्स्वार्थलक्षणाया अभावादिति वाच्यम् । स्नेहसंयोगमात्रगुणविषयबुद्धिविषयत्वप्रयत्नादृष्टकार्यकारणभावबुद्धिविषयगुणत्वयोर्द्वयोः क्रमेण सत्त्वात् ।

नन्वेतदजनकव्यक्ताव्याप्तेरीश्वरज्ञानादावतिव्याप्तेर्न व्यक्तिपरम् । नापि जातिपरं द्वित्वे द्विपृथक्त्वे भावनायां ज्ञानादौ चातिव्याप्तेः ।

मैवम् । समानाधिकरणज्ञानेन जनकानित्यवृत्ति(२)स्वव्यधिकरणज्ञानान्यकार्यजनकवृत्तीश्वरविशेषगुणावृत्तिसंस्कारत्वपृथक्त्वान्यगुणत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ।

गुरुत्वेतीति । संस्कारत्वान्यत्वे सति संयोगत्वान्यकर्मासाधारणकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः । अतो नाजनकव्यक्ताव्याप्तिर्भावनादौ चातिव्याप्तिः । अवच्छिन्नपरिमाणं न क्रियाकारणं किन्तु कारणतावच्छेदकमिति न तत्रातिव्याप्तिः । नोदनाभिघातादिति ।(३) शब्दासमवायिकार-

(१) अव्याप्तिं—इति (ख) पु० ।

(२) जनकवृत्ति—इति (क) पु० ।

(३) नोदनाभिघातेति—इति (क) पु० ।

णावृत्तिसंयोगत्वव्याप्यजातिमत्त्वं नोदनत्वम् । शब्दासमवायिकारणवृत्तिसंयोगत्वव्याप्यजातिमत्त्वमभिघातत्वम् । तल्लक्षणमिति । कार्यकारणभावनिरूपकधर्मिनिरूपितकारणताश्रयत्वं कारणैकार्थसमवायकार्यैकार्थसमवायान्यतरप्रत्यासत्त्या आत्मविशेषगुणान्यकारणत्वं वा असमवायिकारणत्वमित्यर्थः । समवायिकारणप्रत्यासत्त्यविशेषेऽपि नादृष्टादावात्मविशेषगुणेऽसमवायिकारणत्वव्यवहारः शिष्टानामिति न विशेषणासिद्धिः । अरुणयेति । आरुण्यं नाश्रयावच्छेदकत्वेनोपलक्षणं विशेषणतायां बाधके सत्येवोपलक्षणत्वमिति व्युत्पत्ते(१)रित्यर्थः । एकाश्रितेति । ज्ञानादृष्टजीवनादिभिन्नैकवृत्तिकार्यं प्रति निमित्तकारणतावच्छेदकरूपशून्यत्वे सत्यसमवायिकारणतावच्छेदकरूपवत् स्थितिस्थापकान्यगुणत्वमित्यर्थः । निमित्तकारणत्वमेवेति । असमवायिकारणावृत्तिनिमित्तकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वमाकाशेतरविभुविशेषगुणत्वं वेत्यर्थः । पूर्वोक्तासमवायिकारणलक्षणे विशेषणासिद्धिं निराकर्तुमाह—यथा चेति—विभुविशेषगुणत्वात् शब्दवन्मूर्तसंयोगासमवायिकारणकवृत्ति(२)गुणत्वव्याप्यजातिमत्त्वावश्यंभावादात्मविशेषगुणानामात्ममनःसंयोगासमवायिकारणकत्वव्यवस्थितावसमवायिकारणान्तरकल्पनायां मानाभावात् प्रागुक्तयुक्तेश्चेत्यर्थः । उभयथेति । पूर्वोक्तबुद्ध्यदृष्टादिभिन्नकार्यनिमित्तकारणवृत्त्य-

(१) व्युत्पत्तेर्विशेषणत्वव्यवस्थिते—इति (क) पु० ।

(२) कारणवृति—इति (क) पु० ।

समवायिकारणवृत्तिस्पर्शत्वसंस्कारत्वान्यगुणत्वव्याप्यजातिमत्त्वं तत्त्वमित्यर्थः । अकारणत्वमिति । स्वध्वंसज्ञानान्याजनकमात्रवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः । प्रदेशवृत्तित्वमिति । स्वात्यन्ताभावसामानाधिकरण्यमित्यर्थः । भावाभावान्तरवैधर्म्यं प्रमाणयन्नाह—अत्रेति । महति वृक्षादौ शाखायां कपिसंयोगोपलम्भान्मूले च तदनुपलम्भाद् भावाभावान्तरयोरदृष्टमपि सामानाधिकरण्यमनन्यथासिद्धप्रत्यक्षबलादाद्रियत इत्यर्थः । तर्हि यत्र न प्रत्यक्षं तत्र कथं तत्सिद्धिरित्यत आह--धर्मेति ।

ननु कार्येति विशेषणं व्याप्यवृत्तावीश्वरज्ञानादौ (१)व्यभिचारवारणार्थं न युक्तं(२) सामान्यत एवात्मविशेषगुणानां प्रदेशवृत्तित्वस्य मूलेऽभिधानात्तस्याप्यव्याप्यवृत्तित्वात् । युक्तं चैतत् । ज्ञानत्वं न व्याप्यवृत्तिवृत्ति अव्याप्यवृत्तिवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातित्वात् संयोगत्ववत् इति मानात् । न च मूर्तगुणजातित्वमुपाधिः । शब्दत्वे साध्याव्यापकत्वात् । नापि कार्यमात्रवृत्तित्वमुपाधिः । आकाशत्वादौ साध्याव्यापकत्वात् । न च विपक्षे बाधकाभावः । ईश्वरज्ञानादीनां व्याप्यवृत्तित्वेऽस्मदादिज्ञानानामव्याप्यवृत्तित्वे व्याप्याव्याप्यवृत्तिजातीयताविरोधात् ।

अत्राहुः—ईश्वरज्ञानादीनां व्याप्यवृत्तित्वे मूलग्रन्थस्याव्याप्यवृत्तिवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिमत्त्वे तात्पर्यान्न विरोधः । अनुमाने च पक्षधर्मगुणवृत्तित्वावच्छिन्नसाध्यव्यापकं कार्यमात्रवृत्तित्वमुपाधिः । न चोक्तविपक्षबाधकाद्धेतोः साध्यव्याप्यतया तदव्यापकत्वेनानुपाधित्वम् । मूर्तगुणानामेव तथा विरोधात् । तत्रैव प्रमाणप्रसरात् ।

(१) व्याप्यवृत्तीश्वरज्ञानादौ—इति (क) (ख) पु० ।
(२) वारणायायुक्तं—इति (क) पु० ।

विपक्षे बाधकमाह--अन्यथेति । अविरोधायेति । एतत्तात्पर्यं संयोगे विवेचयिष्यामः । कालनिष्ठनित्यगुणवृत्तिगुणत्वव्याप्यजातिशून्यविभुगुणवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिमत्त्वं पारिभाषिकमेव प्रादेशिकत्वमित्यप्याहुः ।

आश्रयेति । स्वात्यन्ताभावासमानाधिकरणगुणत्वं प्रदेशवृत्तिगुणान्यगुणत्वं वेत्यर्थः । आश्रयनाशादेवेति । यद्यपि विनश्यदवस्थसंयोगेऽतिव्याप्तिः नित्यरूपापादाव्याप्तिश्च तथापि स्वाश्रयसमानकालीन(१)ध्वंसाप्रतियोगिमात्रवृत्तिगुणत्वव्याप्यजातिमत्त्वम् (२) । पाकजानामिति । वेगोऽप्यत्रोपसंख्येयः । तस्यापि समानाधिकरणध्वंसप्रतियोगित्वात् । अयावद्द्रव्यभावित्वं च पूर्वनिरुक्तरूपरहितगुणत्वम् । मूर्त्तेति । मूर्त्तिव्याप्यतावच्छेदकविशेषगुणवृत्तिजातिमत्त्वमित्यर्थः । स्पर्शव्याप्यत्वमिति । स्पर्शसमानाधिकरणमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वमित्यर्थः । जलवृत्तित्वं जलवृत्तिमात्रवृत्तिगुणत्व-

(१) तथाप्याश्रयसमकाल—इति (क) पु० ।
(२) तत्त्वम्--इति (क) पुस्तकेऽधिकम् ।

व्याप्यजातिमत्त्वम् (१)। एवमग्रेऽपि निर्वाच्यम्। जलावनीति। जलावनिवृत्तिवृत्तितदन्यवृत्त्यवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः। पृथिवीमात्रेति—पृथिवीवृत्तिविशेषगुणमात्रवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः। इत्थमग्रेऽपि। पाकजत्वमिति। तेजःसंयोगासमवायिकारणकैकवृत्तिगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः। अतो न तेजोऽवयवसंयोगजन्यतेजोऽवयविसंयोगेऽतिव्याप्तिः। नापि विनश्यदवस्थपृथिवीरूपादावव्याप्तिः। परिमाणेति। परिमाणासमवायिकारणवृत्तिसंयोगत्वान्यगुणत्वव्याप्यजातिमत्त्वमित्यर्थः। शब्दकारणत्वं शब्दासमवायिकारणत्वमित्यर्थः। अभिघातेति—अभिघातनिमित्तकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः। अनेकाश्रितेति। अनेकाश्रितगुणासमवायिकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः। दिक्कालेति। दिक्कालसंयोगासमवायिकारणकैकवृत्तिगुणत्वमित्यर्थः। अतो न दिकालसंयोगजसंयोगेऽतिव्याप्तिः। परत्वापरत्वेति।

ननु चरमज्ञानं भोगरूपमन्त्योपान्त्यशब्दवत् स्वविषयसुखदुःखाभ्यामेव नाश्यम्। न च विनिगमकाभावः। कार्यविभुविशेषगुणत्वेन शब्दवत् समानाधिकरणगुणनाश्यत्वानुमानात्।

अत्राहुः—ज्ञायतेऽनेनेति व्युत्पत्त्या ज्ञानं चरमः संस्कार एवात्र विवक्षितः। यद्वा। अन्त्यशब्दस्य नोपान्त्यशब्दनाश्यत्वं क्षणिकत्वापत्तेः। किन्तूपान्त्यशब्दध्वंसस्यैवान्त्यशब्दध्वंसकत्वम्। अनुमानं(१) चरमसंस्कारेऽनैकान्तिकमप्रयोजकं च। किञ्च। ये विशेषगुणानाश्या विभुविशेषगुणास्ते स्वानन्तरोत्पत्तिकविरोधिगुणनाश्या एवेति नियमः। अन्यथा प्राक्तनसंस्कारेण ज्ञानाद्युत्पत्त्यग्रिमक्षण एव तेषां नाशादप्रत्यक्षत्वापत्तिः। निमित्तनाशनाश्यत्वं चात्र मूर्तवृत्तिमात्रवृत्तिगुणत्वव्याप्यजातिशून्यत्वे सति संयोगान्यनिमित्तनाशनाश्यत्वं विवक्षितमतो न चरमपार्थिवपरमाणुरूपादेः(२)परमाण्वाकाशसंयोगस्य च निमित्तनाशनाश्यत्वादतिव्याप्तिः।

गुणान्तरेति। पूर्वनिरुक्तान्यगुणत्वमित्यर्थः। कार्यगुणानामिति(३)। अत्र विशेष्यसमभिव्याहारादेवकारस्यान्ययोगव्यवच्छेदो विवक्षितः नायोगव्यवच्छेदः। तेनाकार्यगुणानां नाश्रयनाशनाश्यत्वमित्यर्थान्न विरोधिगुणनाश्यकार्यगुणाव्याप्तिः। अपार्थिवेति। अत्र पार्थिवपरमाणुवृत्तिस्थितिस्थापकादेरपि नित्यत्वात् स्नेहपर्यन्तमेवापार्थिवत्वं परमाणोर्विवक्षितम्—उत्तरत्र परमाणुमात्रमेव विवक्षितमित्याहुः। नित्यत्वमत्र ध्वंसाप्रतियोगिगुणत्वम् अकार्यत्वं च प्रागभावाप्रतियोगिगुणत्वम् एतदन्यगुणत्वं चानित्यत्वादि। आदिपदसंग्राह्यं च परत्वापरत्वगुरुत्वद्रवत्ववेगस्थितिस्थापकानां मूर्त्तमात्रसा-

(१) इत्यर्थः—इति (क) पुस्तकेऽधिकम्।

(१) च—इति (क) पुस्तकेऽधिकम्।

(२) रूपादेश्चरम—इति (क) पु०।

(३) कार्यगुणानामेवेति—इति (क) पु०।

मान्यगुणत्वं(१) धर्माधर्मभावनानामतीन्द्रियात्मविशेषगुणत्वमित्यादि ।

ननूद्देशक्रमप्राप्ततया रूपस्यैव निरूपणे कर्तव्ये रसादिनिरूपणमयुक्तमित्यत आह—**संक्षेपार्थमिति** । संक्षेपो ग्रन्थलाघवम् ।

पारिभाषिक्य इति । काचित्संज्ञा जातिरूपप्रवृत्तिनिमित्तवती । प्रवृत्तिनिमित्तं च वाच्यं सद्वाच्यवृत्तित्वे सति वाच्योपस्थापकं गोत्वादि । काचिदुपलक्षणवती । तच्च वाच्योपस्थापकमात्रं न तु शक्त्यन्तर्भूतमिति विशेषः । यथा शब्दाश्रयत्वोपलक्षिते आकाशमिति(२) संज्ञा । काचिदौपाधिकी । यथोपलक्षणीभूतपचिक्रियान्तर्भावेण पाकानुकूलकृतियोग्यतामात्रेण पाचकादिसंज्ञा । यत्र तु प्रवृत्तिनिमित्तोपलक्षणयोगाभावे संकेतविषयस्य व्यक्तिविशेषस्य प्रत्यक्षेणोपस्थितिस्तत्र या शृङ्गग्राहिकया चैत्रादिसंज्ञा सा पारिभाषिकी । तासु रूपादिसंज्ञा कतमेत्यर्थः । **रूपत्वेति** । तथा च गवादिपदवन्नैमित्तिकीयं संज्ञेत्यर्थः । **तदासिद्धमिति** । जातिरूपमिति शेषः । प्रकृते रूपाकारानुगतमते लौकिकानामभावादित्यर्थः । न च निषेध्याप्रसिद्धिः । रूपत्वस्योभयसिद्धत्वात्तदीयजातित्वोपाधित्वयोरेव विवादात् । शुक्लरूपं शुक्लत्वतद्व्याप्येतरगुणत्वव्याप्यजातिमन्न भवतीत्यर्थ इत्यन्ये । **चक्षुर्मात्रेति** । द्वीन्द्रियग्राह्यसङ्ख्यादिव्याव-

(१) गुणत्वमित्यर्थः—इति (क) पु० ।

(२) आकाशेति—इति (क) पु० ।

र्तनाय मात्रपदम् । यद्यपि रूपेऽपि तन्नास्ति मनसापि तद्ग्रहात्, चक्षुर्मात्रबहिरिन्द्रियग्राह्यत्वं च रूपाभावेऽपि गतम्, भावत्वेन विशेषणेऽपि त्रसरेणुसंयोगादावतिव्याप्तम्, चक्षुर्ग्राह्यविशेषगुणत्वं च स्नेहादावपि गतम् । तथापि चक्षुर्मात्रबहिरिन्द्रियग्राह्यविशेषगुणत्वमुपाधिः । एवं रसनादिमात्रबहिरिन्द्रियग्राह्यविशेषगुणत्वादिकं रसत्वादीत्यर्थः । न चातीन्द्रियरूपे तद्व्यवहारानापत्तिर्ग्रहणानन्तरं रूपप्रत्ययापत्तिश्च, चक्षुर्ग्रहणयोग्यतायाश्च तदवच्छेदकरूपाप्रतीतावज्ञानादिति वाच्यम् । नीलपीताद्येकैकमेवेति मते तस्यातीन्द्रियत्वाभावात् । न च तस्य जातित्वापत्तिः । गोत्वादिना परापरभावानुपपत्तेः । नीलतरादिप्रतीतेश्च तदन्यरूपासम्भेदविषयत्वात् । **अननुसंहितेति** । रूपादिधीः साक्षात्कारिणी चक्षुर्मात्रग्राह्यत्वं च न प्रत्यक्षम् इन्द्रियतज्जन्यज्ञानगोचरत्वयोरतीन्द्रियत्वादित्युपाधेरज्ञाने सा न स्यादित्यर्थः । ननु मानान्तरोपस्थापितं चक्षुर्ग्राह्यत्वमध्यक्षे भासते न वा रूपादिधीः प्रत्यक्षसिद्धेत्युभयसिद्धं रूपादिव्यवहारस्तूक्तोपाधिनिबन्धन(१) इत्यत आह—**न चेति** । चक्षुरादिस्वरूपे तत्तैजसत्वादौ च मिथोव्यावृत्तरूपाद्युपलब्धिं विना मानान्तराभावात् तत्र तद्ग्राह्यत्वाच्च(२) तद्भेदेऽन्योन्याश्रय इत्यर्थः ।

ननु नीलपीतादिधीकरणतया चक्षुःसिद्धौ नायं दोषः । न चैवं नीलाद्येकैकधीकरणतया भिन्नाभिन्नकरणसिद्धौ पञ्चबहि-

(१) उपाधिनिमित्तक—इति (क) पु० ।

(२) मानाभावात् तद्ग्राह्यत्वाच्च—इति (क) पु० ।

रिन्द्रियनियमानुपपत्तिः । नीलपीतादिवीकरणेषु गन्धाद्यव्यञ्जकत्वे सति नीलादिव्यञ्जकत्वेन तैजसत्वं प्रसाध्य तत एवेन्द्रियविभागात् नीलादिकं(१) पक्षीकृत्य लाघवादेककरणसाधनाद्वा तैजसेन्द्रियमात्रग्राह्यविशेषगुणत्वेन च नीलादौ(२) रूपाकारानुगतधीः स्यात् ।

मैवम् । एतादृशीं परम्परामविदुषोऽपि रूपप्रत्ययात् । चक्षूरूपस्य घटादिरूपाभिन्नत्वे प्रत्यक्षत्वप्रसङ्गाच्च । एकस्यैव उद्भवानुद्भवविरोधात् । पाकेन रक्तमुत्पन्नं श्यामं नष्टमित्यनुभवाच्च । न चायं भ्रमो बाधकाभावात्(३) । न चोत्पादनाश(४)धीः समवायविषया । रक्तसमवायो(५) नष्ट इत्यनुभवापत्तेः समवायनित्यत्वस्य वक्ष्यमाणत्वाच्च । नीलादितुल्यतया गन्धादि(६)व्यक्तीनामपि नित्यतापत्तेश्च । किंच नीलादिव्यक्तीनामननुगमेन(७) साक्षात्कारकारणत्वाभावेऽनुगतधर्मसिद्धौ तज्जातित्वे बाधकाभावात् शुक्लाकारानुगतधीकारणतयाऽनुगतशुक्लत्वजातिसिद्धौ(८) शुक्लत्वजातिर्गुणत्वव्याप्यजातिव्याप्या शु-

(१) नीलादीन्—इति (क) (ख) पुस्तकयोः ।
(२) ग्राह्यगुणत्वेन नीलादौ—इति (क) पु० ।
(३) च—इत्यधिकं (क) पुस्तके ।
(४) विनाश—इति (क) पु० ।
(५) श्यामसमवायो—इति (ख) पु० ।
(६) गन्धज्ञानादि—इति (क) पु० ।
(७) अननुगमे—इति (क) पु० ।
(८) शुक्लत्वजातिसिद्धौ—इति (क) पुस्तके नोपलभ्यते ।

क्लमात्रवृत्तिजातित्वात् तदवान्तरतारतम्यवदित्यप्याहुः ।

वस्तुतो यद्यपि रूपाकारानुगतधीर्नास्ति लौकिकानां तथापि नीलो वर्णः पीतो वर्ण इति वर्णाकारानुगतधीरस्त्येव । वर्णत्वमेव च(१) रूपत्वम् । गन्धरसादौ चानुगतमतिरस्त्येव सार्वलौकिकीति प्रत्यक्षत एव तत्सिद्धिः ।

(२)भाष्यस्थतत्रपदं व्याचष्टे–गुणेष्विति । निर्द्धारणेन यल्लभ्यते तदाह—गुणत्वेति । (२)चक्षुषैवेति । न चातीन्द्रियरूपाव्याप्तिः चक्षुर्मात्रग्राह्यगुणत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । न चैवं रूपत्व(३)पर्यवसाने पूर्वेण सह पौनरुक्त्यम् । शुक्लत्वादिजातिविषयत्वादेतस्य । रूपत्वपरत्वेऽपि तस्य(४) प्रकारान्तरेणाभिधानान्न पौनरुक्त्यमित्यन्ये ।

एतेनेति । एतेन इतरभेदानुमानेन । आश्रयासिद्धिरित्यर्थः । आश्रयमिति । प्रमाणद्वारा लक्षणमुक्त्वा आश्रयद्वारा लक्षणं वक्तुमित्यर्थः । संख्यादावतिव्याप्तिं निरस्यति—एवेति । न च स्पर्शद्रवत्वयोरतिव्याप्तिः(५) । पृथिव्यादित्रिकाविशेषगुणवृत्तिवायुवृत्त्यवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । अर्थक्रियामिति । चाक्षुषप्रत्यक्षकारणविशेषगुणत्वम-

(१) च—इति (ख) पुस्तके नास्ति ।
(२), (२) (क) पुस्तके नास्ति ।
(३) रूपत्व एव—इति (क) पु० ।
(४) अस्य—इति (क) पु० ।
(५) न चात्र स्पर्शद्रवत्वाद्यतिव्याप्तिः—इति (क) पुस्तके ।

र्थक्रियाद्वारकं लक्षणमभिधातुमित्यर्थः ।

ननु वायौ रूपाभावप्रत्यक्षे तमःप्रत्यक्षे च रूपस्य व्यभिचारान्न कारणत्वम्(१) अनुद्भूतरूपाव्याप्तिः(२) उद्भूतरूपवत्त्वस्य प्रत्यक्षकारणतावच्छेदकत्वात् ।

मैवम् । चाक्षुषनिर्विकल्पककारणविशेषगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ।

स चोद्भूतेति । ननूद्भुतरूपवत्त्वस्य प्रत्यक्षकारणतावच्छेदकत्वाद्दण्डत्ववत्तस्य कारणत्वं न स्यात् ।

मैवम् । उद्भूतरूपोत्कर्षात्प्रत्यक्षोत्कर्षेण तस्य कारणत्वात् । दण्डत्वे(३)नैवम् । प्रकारभेदेनोभयस्याप्यविरोधाच्च । चाक्षुषद्रव्यज्ञाने विषयजन्यतया विषयभानेनैव तत्र रूपस्य कारणत्वात् । द्रव्ये चानुगतानतिप्रसक्तत्वेन कारणतावच्छेदकत्वात् । न तु स्वीयमिति ।

अत्र चक्षुः साक्षात्कारकारणरूपवत् साक्षात्कारकारणतेजस्त्वात् आलोकवत् इत्यत्रोद्भूतरूपवत्त्वमुपाधिः । न वास्य गुणमन्तर्भाव्येन्द्रियत्वं द्रव्यगर्भत्वात्तल्लक्षणस्येति यदिन्द्रियं तत्प्रत्यक्षहेतुग्राह्यजातीयगुणवदित्येव सगुणानामिन्द्रियभाव इत्यस्यार्थ इति सम्प्रदायविदः ।

प्रकारपदार्थान्वयानुरोधाच्छुक्लत्वादि जातिपरतया व्या-

(१) प्रत्यक्षमात्रे कारणत्वम्—इति (क) पु० ।
(२) च—इत्यधिकं (क) पुस्तके ।
(३) तु—इत्यधिकं (क) पुस्तके ।

चष्टे—शुक्लत्वादय इति । विचित्रतयेति । द्रव्यत्वसाक्षाद्व्याप्यजातिसमानाधिकरणगुणमात्रवृत्त्यनेकजातिव्यापकजातिमद्गुणत्वं विचित्रता पाकजत्वव्यापिकेत्यर्थः ।

न च जलपरमाणुः कार्यरूपवान् भूतत्वादिति वाच्यम् । पक्षधर्मपरमाणुत्वावच्छिन्नसाध्यव्यापकस्य पृथिवीत्वस्योपाधित्वात् । कार्यगुणानां निमित्तासमवायिकारणगुणापूर्वकतया कारणपदं समवायिकारणपरतया व्याचष्टे–अवयविष्विति । ननु पार्थिवपरमाणुरूपयोरभेदाद्रूपस्य कार्यत्वे विनाशित्वे च परमाणोरपि तथात्वापत्तिः ।

न च गुणगुणिनोरभेदे मानाभावः । न हि नीलः पटः दण्डी पुरुषः इति प्रत्यययोर्विषयवैलक्षण्यमनुभूयत इति दण्डिपुरुषयोरिव नीलपटयोरप्यभेद एव । न च विशेषणसम्बन्ध एव तद्विषयो नाभेद इति वाच्यम् । दण्डी पुरुष इतिवन्नीली पट इति प्रतीत्यापत्तेः । न च मतुपो लोपादभेदोपचाराद्वा तदुपपादनम् । तयोः शब्दधर्मत्वादत्र त्वभेदबुद्धेर्मानत्वादित्यभिप्रेत्याह—एतेनेति । अग्निसंयोगाद्रूपस्य नाशेऽपि द्रव्यानाशेनेत्यर्थः । तदेव स्पष्टयति—तथाहीति । न च रूपशब्दादिति । यद्येतत्पटाभिन्नाः सर्वाः शुक्लव्यक्तयः स्युस्तदैनं पटमानयेत्येतच्छब्दजन्यानयनकर्माणि स्युरेतत्पटवादित्यर्थः । अभेदे सामान्यविशेषाभावं परिहरति(१)—न चाभेद इति । सामान्यविशेष-

(१) निरस्यति—इति (क) पुस्तके ।

भावेऽभेदं (१)निरस्यति--न च सामान्येति। द्रव्यमपीति। यद्ययं पटः शुक्लरूपाभिन्नः स्यादन्धस्य त्वगिन्द्रियग्राह्यो न स्यादित्यर्थः। शुक्लादिरूपमिति। अन्धस्य त्वगिन्द्रियगृह्यमाणशुक्लपटरूपं यद्येतत्पटाभिन्नं स्यादेतत्साक्षात्कारविषयः स्यादित्यर्थः। तस्माद्गुणगुणिनोः प्रतिनियतेन्द्रियवेद्यतैव तयोर्भेदे मानम्। न च रूपस्य पटात्मकतयान्धेन ग्रहेऽपि रूपत्वं न तेन गृह्यते रूपत्वग्रहे चक्षुषः प्रयोजकत्वादिति वाच्यम्। धर्मधर्मिणोरभेदपक्षे रूपत्वस्यापि रूपाभिन्नत्वात्। त्वचा रूपत्वस्यापि ग्रहापत्तेश्च। जातेर्व्यक्तिग्राहकेन्द्रियग्राह्यत्वादिति भावः।

यदि चेति। यदि रूपं पृथिव्यभिन्नं स्यात् जलतेजोवृत्ति न स्यात्(२)। यदि चेति। यदि पयःपावकौ रूपाभिन्नौ स्यातां पृथिवी स्यातामिति तदीयाभ्युपगमे न तर्काः।

ननु रूपस्य विशेषः पृथिवी स्यादिति नोक्तदोष इत्यत आह--सामान्यविशेषेति। नन्वत्यन्ताभेदे सर्वमिदं दूषणम् अत्र तु भेदाभेद इति द्रव्यस्य रूपाभेदेऽपि रूपं द्रव्याद्भिन्नम्। न चात्र मानाभावः। अन्योन्याभावत्वम् अव्याप्यवृत्तिवृत्ति नित्याभाववृत्त्यभावत्वसाक्षाद्व्याप्यधर्मत्वात् अत्यन्ताभावत्ववदित्यनुमानात्। न चाप्रयोजकत्वम्। नीलः पट इति सामानाधिकरण्यबुद्धेरनन्यथासिद्धेः। अत्यन्तभेदाभेदाभ्यां तदनुपपत्तेः।

(१) अव्यभेदं—इति (क) पु०।

(२) इत्यर्थः—इत्यधिकं (क) पुस्तके।

अत्राहुः। भेदाभेदयोः परस्पराभावरूपतया विरुद्धयोरेकत्र समावेशाभावः। न च संयोगप्रतिवन्दिः। तस्यैव हि तत्राभावोऽवच्छेदकभेदेन वर्तते ज्ञायते वा(१) यथा संयोगाद्यभावः। तदिहापि(२) नीलस्यापि पटान्योन्याभावः पटत्वेनेति नीलात्पटस्य भेदोऽस्तु। अभेदस्तु नीलान्योन्याभावाभावरूपः पटे न पटत्वावच्छेदेनैव। एकावच्छेदेन भावाभावयोरवृत्तेरप्रतीतेश्च। नाप्यवच्छेदकान्तरेण। तदज्ञानेऽपि नीलः पट इत्यनुभवात्(३)। नीलः पट इति प्रतीतिश्च नीलसम्बन्धविषया। शब्दप्रयोगश्चाभेदोपचारात् मतुब्लोपाद्वेति संक्षेपः।

प्रकारेति। अवान्तरानेकभेदाभावादित्यर्थः। तत्रापीति। उत्कर्षस्य गुणक्रियामात्रनियतत्वादित्यर्थः। शुक्लत्वावान्तरजातिर्न घटत्वव्याप्या। स्फटिकादौ व्यभिचारात्। नापि तस्य व्यापिका। नीलघटे व्यभिचारादेकत्र शुक्लपटे तयोः संकरः स्यादिति(४)। न चैतादिति। न च रूपादीनां(५) नित्यत्वे तत्समवायस्योत्पत्तिविनाशौ स्याताम्। अग्निसंयोगाद्रूपं नष्टमित्यनुभवो न तु रूपसमवायो विनष्ट इति। तैरपि नित्यसमवायस्य नित्यत्वोपगमाच्च। कार्यगुणत्वादिति। कार्य-

(१) च—इति (क) पुस्तके।

(२) तद्वदिहापि—इति (क) पु०।

(३) इति प्रत्ययात—इति (क) पु०।

(४) भावः--इत्यधिकं (क) पु०।

(५) रूपत्वादीनां—इति (क) पु०।

स्य गुणत्वादित्यर्थः । अस्मदादीतीश्वरज्ञानादिना व्यभिचारवारणाय । विशेषगुणेति आत्मैकत्वेऽनैकान्तिकत्वव्यावर्तनाय । ननु रूपादीनामकारणमपि व्यञ्जकं द्रव्यमतो न द्रव्यनाशे तदुपलम्भापत्तिरित्यत आह—आश्रयस्येति । सत्याश्रय इति । अवयविरूपं नित्यं यदि परमाणुरूपाद्भिन्नं तदा कारणत्वेन परमाणुरूपं न सिध्येदिति तयो रूपमभिन्नं वाच्यं तथा च परमाणौ रूपनिवृत्तिरग्निसंयोगान्न स्यादित्यर्थः । रूपस्य नित्यत्वे तत्समवाय एव नश्यतीति प्रागेव निरस्तम् । किञ्चावयविरूपस्य नित्यतायामनित्यवृत्तिनित्यत्वेन जातिवदाश्रयं विनाऽन्यत्राप्युपलभ्येतेति भावः ।

पूर्वोक्ताया(१) जातेरनतिक्रमेणैव लक्षणान्तरमिति दर्शयन्नाह—रसत्वेति । (२)रसनेनैवेति । गुणपदं रसत्वतद्व्याप्यजातिव्यावर्तनार्थम्(२) । यद्यपीदमतीन्द्रियरसाव्यापकं(३) तथापि रसनग्राह्यगुणत्वव्याप्यजातिमत्त्वं रसनेतरबहिरिन्द्रियग्राह्यगुणत्वव्याप्यजातिमत्त्वं वा लक्षणम् । एवकारेण यदि रसो द्रव्याभिन्नः स्याद्रसनेन्द्रियमात्रग्राह्यो न स्यादिति तर्कः सूचितः । अत एवाह—प्रमाणलक्षणे इति । आश्रयमाहेति । पूर्ववत्तात्पर्यमूह्यम् । अदृष्टविशेषजन्यात्ममनःसंयोगो जीवनं मरणं

(१) पूर्वोक्त—इति (क) पु० ।

(२)-(२) नास्ति (क) पुस्तके । तस्य स्थाने—रसनेनैव गृह्यते यो गुण इति गुणपदेन रसत्वतद्व्याप्यजातिव्यावृत्तिः—एवं वर्तते ।

(३) अव्यापि—इति (क) पु० ।

चादृष्टविशेष(१)जन्यात्ममनःसंयोगध्वंसः । दौर्बल्यं बलाभावः, न तु कृशत्वम् । बाह्येनेति । यद्यप्येतावता जलस्य कारणत्वसिद्धावपि तद्रसस्य कारणत्वं न सिध्यति । तथा जलं प्रतिनियतेन्द्रियजन्यसाक्षात्कारकारणप्रतिनियतेन्द्रियग्राह्यजातीय(२)गुणवत् प्रतिनियतेन्द्रियग्राह्यगुणग्राहकविशेषगुणवन्मूर्त्तत्वात् आलोकवदित्यनुमानात् तत्सिद्धिः ।

विभागमाहेति । न च चित्ररूपवत् षड्सा हरीतकीति व्यवहाराच्चित्ररसोऽप्यधिकः तत्र प्रमाणसद्भावात् । तथाहि । विजातीयनानारूपवदवयवारब्धो घटो न नीरूपोऽप्रत्यक्षत्वप्रसङ्गात् । न चोद्भूतरूपवत्समवेतत्वमेव द्रव्यचाक्षुषत्वे तन्त्रम् । यत्र हि चित्ररूपावयवारब्धोऽवयवी तत्र एतस्याप्यभावात् । न च तत्रापि रूपवत्परम्पराश्रितत्वमस्तीति वाच्यम् । परम्पराया अननुगमात्(३) । रूपवत्समवेतत्वापेक्षया रूपवत्त्वस्य लघुत्वाच्च । नापि तत्राप्यव्याप्यवृत्तिनानारूपाणि(४) वर्तन्ते । तेषां व्याप्यवृत्तिजातीयताविरोधात् । एकं कर्बुररूपमित्यनुभवाच्च । चित्ररसे तु मानाभावः । अवयविनो गुणविरोधेन नीरसत्वे बाधकाभावात् । रसनस्य द्रव्याग्राहकत्वात् । षड्रसत्वव्यवहारस्य तु तत्तद्रसजन्योपकारजनकत्वेनाप्युपपत्तेः । नापि क्षाररसोऽ-

(१) नाश—इत्यधिकं (क) (ख) पुस्तकयोः ।

(२) जातीय—इति (क) पुस्तके नास्ति ।

(३) परम्पराया अनवगमात्—इति (क) पु० ।

(४) तत्राव्याप्यवृत्तीनि रूपाणि—इति (क) पु० ।

धिकः । लवणजातीयत्वस्यैव प्रसिद्धत्वात् ।(१)

भावप्रधान इति । अस्येत्यनेनान्वयानुरोधादित्यर्थः(२) । एतेनेति । उत्पत्तिविनाशप्रदर्शनेन तत्कारणसत्त्व(३)स्यावश्यकत्वादित्यर्थः ।

गन्धत्वेति । गन्धाकारानुगतमत्या तत्सिद्धिरिति भावः । गुणेष्विति गन्धत्वतद्व्याप्यजातिव्यावर्तनार्थः(४) । एतेनेति । प्रत्यक्षं प्रमाणम् । घ्राणग्राह्यगुणत्वव्याप्यजातिमत्त्वं लक्षणमित्यर्थः(५) । पृथिव्यामेवेति । पृथिवीवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वमित्यर्थः । इन्द्रियगुणानामुक्तयुक्तेरिन्द्रियासहकारित्वादन्यथा व्याचष्टे—घृतादीति । यद्यप्येतावता घृतस्य सहकारित्वं सिध्यति न तु तद्गन्धस्य तथापि घृतं प्रतिनियतेन्द्रियग्राह्यगुणग्राहक(६)प्रतिनियतेन्द्रियग्राह्यजातीयगुणवत्(७) प्रतिनियतेन्द्रियग्राह्यगुणग्राहकविशेषगुणवन्मूर्तत्वादालोकवत् इत्यनुमानात्सिद्धिः(८) । सामान्यविशेषमिति ।

(१), (२) "नापि क्षाररसोऽधिकः लवणजातीयत्वस्यैव प्रसिद्धत्वात्' । इति पाठः 'अनुरोधादित्यर्थः' । इत्यस्याग्रे वर्त्तते ।

(३) सत्त्व—इति (क) पुस्तके नास्ति ।

(४) व्यावर्तनाय—इति (क) पु० ।

(५) लक्षणमिति—इति (क) पु० ।

(६) 'प्रतिनियतेन्द्रियग्राह्यगुणग्राहक'-इति (क) पुस्तके नास्ति ।

(७) विशेषगुणवत्—इति (क) पु० ।

(८) तत्सिद्धिः—इति (क) पु० ।

प्रत्यक्षसिद्धमिति शेषः । न त्विति । असुरादिवत्(१)पर्युदासनञा सुरभिविरोधी गन्धोऽसुरभिशब्दवाच्यो न तु तदभाव इत्यर्थः । अधर्मवदिति । यथा धर्मत्वविरोधिजातिमान् अधर्मो न तु तदभावमात्रमित्यर्थः । उत्पत्त्यादय इति । बहुवचनोपरोधेनाचष्टे—(२)उत्पत्तिरिति ।

विषयसंस्कारकतयेति । आलोकरूपादेः सर्वत्र भावा(३)द्रूपादिचतुष्टयस्य विषयीभूय कारणत्वमित्यर्थः । यद्वा किं रूपादेरिन्द्रियसंस्कारकतया प्रत्यक्षे कारणत्वं(४) किं वा विषयसंस्कारकतयेत्यपेक्षायामिदमुक्तम् । अन्यथा आलोकसंयुक्तेन चक्षुषा(५)न्धकारस्थपटादि(६)ग्रहणप्रसङ्गः । रूपानुविधायीत्यस्य यत्रैव रूपं तत्र स्पर्श इत्यर्थे वायौ नीरूपे स्पर्शो न स्यादित्यन्यथा व्याचष्टे—रूपमिति । रूपव्यापकत्वमिति । यद्यपि रूपव्यापकत्वं रूपसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं रूपस्यापि तथापि भेदे(७) सतीति विवक्षितम् । यद्यपीति । प्रथमव्याख्यानेऽपि(८)दूषणम् ।

(१) असुराविद्यावत्—इति (क) पु० ।

(२) उपरोधायाचष्टे—इति (क) पु० ।

(३) लाभात्—इति (क) पु० ।

(४) प्रत्यक्षकारणत्वम्—इति (क) पु० ।

(५) संयुक्तचक्षुषा—इति (क) पु० ।

(६) घटादि—इति (क) पु० ।

(७) रूपभेदे—इति (क) पु० ।

(८) अपि—इति (क) पुस्तके नास्ति ।

अपक्कतत्वशङ्कामपनयन्नाह–अथेति । प्रसङ्गलक्षणा सङ्गतिः । परमाणोः पृथिव्यजन्यत्वेऽपि पार्थिवत्वमुपपादयति — पृथिव्या इति । तस्येदमित्यत्र सम्बन्धमात्रस्य विवक्षितत्वादित्यर्थः । पृथिवीत्वस्येति । जातिविशिष्टशक्तपदस्य विशेषणे तात्पर्यादित्यर्थः । पाकजत्वेनेति । धर्मिपरत्वे भेदगर्भषष्ठ्यर्थानुपपत्तेरित्यर्थः । यद्यपि विनाशनिरूपणं न साक्षात् प्रतिज्ञातं तथापि प्रकारशब्देन तस्यावबोधः । पूर्वेषां विनाशादुत्तरेषामुत्पत्तिरित्यस्यैवोत्पत्तिप्रकारत्वात् । विप्रतिपत्तेरिति । पार्थिवावयविरूपादौ तेजःसंयोगासमवायिकरणकत्वं न वेति संशयः । स्वतन्त्राः कार्य(१)ध्वंसवन्त इत्यर्थः ।

कार्यं त्विति । द्व्यणुकादिलक्षणमित्यर्थः । प्रयोजनं त्विति । अवयविविशेषगुणानां यावदाश्रयभावित्वस्थितौ बुद्ध्यादीनां शरीरे सत्येव नाशात्तदन्यधर्मत्वासिद्धिद्वारात्मतत्त्वज्ञानं प्रयोजनमित्यर्थः ।

नन्वामेति यद्यवयविनो विशेषणं तदा वैयर्थ्यं सर्वस्य तस्यामत्वात्(२) । अथ परमाणोस्तदा विरोधः सर्वस्य तस्य पक्वत्वादित्यत आह—प्रकृतेति । आपाकनिक्षिप्ताग्निसाध्यपाकापेक्षया इत्यर्थः । न तु पार्थिवमिति । पृथिवीमूलकारणं परमाणुरित्यर्थः । कार्येति । कारणनाशस्य कार्यनाशहेतुत्वा-

(१) कार्यद्रव्य–इति (क) पु.

(२) अपक्वत्वात्—इति (क) पु.

दित्यर्थः । द्व्यणुकेति । तस्यैव साक्षात्परमाणुजन्यत्वादित्यर्थः । जातीति । द्व्यणुकानां बहुतया बहुवचनस्योचितत्वेऽपीति शेषः । कर्मसु विभाग इत्यत्र विभागाजन्यो विभागो विवक्षितः । न हि चन्द्रचक्षुषोरिति । ननु तथेत्यनेन पाककारणताविशेषनिषेधो न युक्तः, तयोरनुद्भूतस्पर्शतया सामान्यत एव पाककारणत्वाभावात् , उद्भूतस्पर्शस्यैव तेजसः पाककारणत्वात् ।

अत्राहुः । पाकसामान्ये लाघवात् उष्णस्पर्शः सामान्य(१)कारणम् , अग्न्यादिनिष्ठोद्भूतोष्णस्पर्शः पाकविशेषे । किं च यद्विशेषयोः कार्यकारणभावो बाधकं विना तत्सामान्ययोरपि तथात्वम् । अतश्चन्द्रचक्षुषोरपि पाकसामान्ये कारणत्वमिति तद्विशेषे निषेधो(२) युक्तः ।

अन्ये तु । कार्यकारणभावस्यान्वयव्यतिरेकसमधिगम्यत्वात् अनुद्भूतस्पर्शान्वये च रूपपरावृत्त्यदर्शनात् उद्भुत एवोष्णस्पर्शः पाककारणम् । ग्रन्थश्चैवं योजनीयः चन्द्रचक्षुषोस्तथा तेजो नास्ति यथा सौरम् । कुतः पाचकम् । यथा सौरम् । हि शब्दो हेतावित्यर्थः । यद्वा चन्द्रादेस्तेजोऽपाचकं यत इत्यर्थो नेय इत्यर्थः ।

अविचारितेति । आगमः श्यामरूपप्रवाहोऽनादिरित्येतत्परो नत्वेकस्याः श्यामव्यक्तेस्तत्त्वपर इत्याहुः ।

अन्यथेति । अनादेर्भावस्य नित्यत्वादित्यर्थः । संक्षेप-

(१) सामान्यं—इति (क) पु० ।

(२) तद्विशेषनिषेधो--इति (क) पु० ।

णेति । अवान्तररूपत्वरसत्वाद्यविवक्षया सामान्यस्यैव विवक्षितत्वादित्यर्थः । नन्वेक एवाग्निसंयोगोऽपूर्वरूपादेरुत्पादकोऽन्यस्य तस्य नाशकोऽस्तु । न चैकस्योत्पादकत्वनाशकत्वे विरुद्धे । एकदोत्पाद्यनाश्यव्यक्तिभेदेन तयोरविरोधात् । यथैक एव शब्दः पूर्वशब्दं नाशयत्युत्तरं चोत्पादयति । कालभेदाद्वा तयोरविरोधः । यथोपान्त्यशब्द एकदान्त्यं शब्दं जनयिष्यति अन्यदा तमेव नाशयती(१)त्याह—यद्यपीति ।

अयं विधिरिति । व्यक्तिभेदेनैकस्योत्पादकत्वनाशकत्वे कालभेदेन चेत्यर्थः । कार्यविनाशेति । न चात्र मानाभावः । अवयवरूपादिसमानकाल(२)व्याप्यत्वादवयविरूपादेः सति(३) कार्यद्रव्ये परमाणुरूपादिनाशेऽवयवरूपाद्यभावेऽपि अवयविरूपादिस(४)द्भावात्तद्ग्रहापत्तेः । एकपरमाणुपाके च(५) कार्यद्रव्यानवच्छेद्य एवाश्रयेऽग्निसंयोगस्य नाशकत्वावधारणात्, अन्यत्रापि तथानुमानात्, सर्वप्रदेशावच्छेदेनाग्निसंयोगस्यैव रूपाद्युत्पादकतया तादृशस्यैव (६)नाशकत्वाच्च । न चेदमसिद्धम् । एकपरमाणुपाके तथा दर्शनात्, परमाण्वन्तरसंयुक्ते च परमा-

(१) अन्त्यशब्दं जनयति—इति (क) पु० ।
(२) समकालत्व—इति (क) पु० ।
(३) सति च—इति (क) पु० ।
(४) सद् इति (क) पुस्तके नास्ति ।
(५) च—इति (क) पुस्तके नास्ति ।
(६) तस्य—इत्यधिकं (क) पु० ।

णौ तादृशाग्निसंयोगाभावात्, मूर्तानां समानदेशताविरोधात् । तथा च परमाण्वन्तरसंयोगस्य द्व्यणुकासमवायिकारणस्य नाशे सति द्व्यणुकध्वंससमये योऽग्निसंयोगस्ततो रूपादिनाश इति स्थितम् ।

सति चेति । एकदैकस्मिन्नाश्रये नानारूपाननुभवादित्यर्थः । न चैतावन्तमिति । यदा द्व्यणुकासमवायिकारणसंयोगनाशकविभागजनकं कर्म तदैतत्कर्म(१)जनकाग्निपरमाणुसंयोगजनककर्मणो विनाशः, तदुत्तरक्षणे पुनरग्नौ कर्म, ततो विभागः, ततो द्व्यणुकनाशसमकालमग्निपरमाणुसंयोगनाशः, ततो द्व्यणुकनाशकेनाग्निसंयोगेन परमाणुरूपनाशो वाच्यः(२)।द्व्यणुकनाशकश्चाग्निसंयोगो न तावत्कालमनुवर्तत इति न तस्माद्रूपादिनाश इत्यर्थः । ननु तस्य संयोगस्य तावत्कालानवस्थानेऽपि द्व्यणुकनाशसमकालोत्पन्नापराग्निसंयोग एक एवापररूप(३)पूर्वरूपाद्युत्पादविनाशौ जनयत्वित्यत आह—अपि चेति । यद्येकोऽग्निसंयोगो रूपाद्युत्पाद्य विनाशयति तदा यदेव रूपादिकमजीजनदग्निसंयोगस्तदेव विनाशयेदिति घटादिर्नीरूपः स्यादित्यर्थः । ननूत्पादितं रूपादि विनाश्याग्निसंयोगो रूपाद्यन्तरं जनयिष्यति । न च तस्यापि ततो नाशप्रसङ्गः । तदुत्तरमाग्निसंयोगस्यैवोच्छेदात् ।

(१) तदैव तत्कर्म इति (क) पु०
(२) वाच्य इति नास्ति (क) पु० ।
(३) अपररूप—इति नास्ति (क) पु० ।

अत्राहुः । कर्मणः स्वजन्योत्तरदेशसंयोगनाश्यत्वाद्यदाग्निसंयोगेन स्वजनककर्मणो नाशस्तदैव श्यामादिनाशोऽथ रूपाद्यन्तरोत्पत्तिस्तदग्नौ कर्मान्तरोत्पत्तिश्चेत्येकः कालः । ततो यदेवं रूपाद्यन्तरोत्पादकाग्निसंयोगेन रूपाद्यन्तरस्य नाशस्तदैव कर्मान्तरेण रूपाद्यारम्भकसंयोगाविरोधिविभागोत्पत्तिः । तथा च पुनस्तत्र रूपाद्यन्तरोत्पत्तिकाले विभागेन रूपाद्यारम्भकसंयोगनाश इति कुतो रूपाद्यन्तरोत्पत्तिरिति घटादेर्नीरूपत्वप्रसङ्गः कार्यसमानकालस्यैवाग्निसंयोगस्यासमवायिकारणत्वनियमात् । अ(१)थैक एवाग्निसंयोगो रूपादि विनाश्य तदुत्पादयति तत्राह—विनाशकस्यैवेति । कारणतारतम्यं विना कार्यतदनुत्पत्ते(२)रित्यर्थः । यद्यपि पूर्वपूर्वाग्निसंयोगेन तत्तद्रूपादिनाशद्वारा चिरकालाग्निसंयोगेन भावि(३)रूपान्तरस्य जनने पाकतारतम्यमुपपद्यत एव तथापि श्यामादिनाशकस्यैकाग्निसंयोगस्य रूपान्तरोत्पादकत्वे सिन्दूरादौ चिरकालाग्निसंयोगाल्लौहित्यादितारतम्यमनुभूयमानं न स्यादित्यत्र तात्पर्यम् ।

नन्वन्याग्निसंयोगः (४)श्यामभिन्नं रूपं विनाश्य रूपान्तरं जनयतीति न पाकतारतम्यानुपपत्तिरित्यत आह—पुनस्ते-

(१) अथवोत्पाद्यविनाशकत्वे हि श्यामतादिनाशो न स्यात् तन्नाश एव रूपाद्यन्तरोत्पादात्—इत्यधिकं (क) पु०

(२) तदनुपपत्तेः—इति (क) पु०

(३) संयोगभावि—इति (क) पु० ।

(४) अन्योऽग्निसंयोगः—इति (क) पु०

नैवेति । पूर्वदोषेति । घटादेर्नीरूपत्वप्रसङ्ग इत्यर्थः । तस्मात्परमाणुष्विति । नन्वेतदप्रकृतं न त्वेकस्यैव रूपस्योत्पत्तिविनाशावेकेनैवाग्निसंयोगेन जन्येते इत्युपक्रान्तं किं तर्हि(१) पूर्वोत्तररूपव्यक्त्योरेक एवाग्निसंयोगो नाशक उत्पादकश्चेति । न च तदभाव एवात्र साध्यः । दृष्टान्तस्य साध्यविकलत्वात् । श्यामाद्युत्पत्तिविनाशयोरप्येकाग्निसंयोगाजन्यत्वासिद्धेः ।

अत्राहुः । परमाणौ रक्तरूपमेतत्पूर्वनाशकाग्निसंयोगाभिन्नाग्निसंयोगजन्यं पार्थिवपरमाणुरूपत्वात् एतत्परमाणूत्तरकालभाविरूपवत् । एवं तत्तत्पूर्वरूपाण्यपि पक्षीकृत्यानुमेयम् ।

यद्वा परमाणुरूपनाशो न रूपजनकाग्निसंयोगजन्यः रूपनाशत्वात् अवयविरूपनाशवत् । न चावयविवृत्तित्वमुपाधिः । उक्तविपक्षबाधकाद्धेतोः साध्यव्याप्यतया तदव्यापकत्वेनोपाधेः साध्याव्यापकत्वात् । एवं परमाणुरूपोत्पत्तिं पक्षीकृत्य रूपनाशाशकाग्निसंयोगाजन्यत्वमनुमेयम् । ननु यदि रूपादेरुत्पादको नाशकश्चाग्निसंयोगो मिथो भिन्नस्तदा कदाचिदुपान्त्याग्निसंयोगोत्पादिते रूपेऽन्त्याग्निसंयोगेन नाशिते नीरूपोऽपि घट उत्पद्येत । न चोपान्त्याग्निसंयोगो रूपादिनाशक एवेत्यन्त्यः स तदुत्पादक एवेत्यत्र नियामकमस्ति नाशकस्यैवोत्पादकत्वे तु नायं दोषः ।

मैवम् । अव्यवहितोत्तरक्षणभाविरूपप्रागभावसहितस्यैव(२)

(१) किन्तु—इति (क) पु०

(२) तस्य—इत्यधिकं—(क) पु०

पूर्वरूपनाशकत्वात् । कार्यद्रव्यं नश्यतीत्यत्र प्रागुक्तप्रमाणमाह—एतेनेति । घटनाशानन्तरं तद्रूपनाशे(१) तथावधारणादित्यर्थः ।

ननु यथा द्रव्यनाशे क्वचित्समवायिकारणनाशः क्वचिदसमवायिकारणनाशश्च हेतुस्तथावयविरूपादिनाशे(२)ऽप्याश्रयनाशवदग्निसंयोगोऽपि हेतुः स्यादित्याह—नन्विति । अग्निसंयोगादवयविनि कतिपयावयवपाको वा स्यात् सकलावयवपाको वा ? नाद्य इत्याह–कतिपयेति । अवयवावयविनोरेकजातीयरूपवत्त्वानियमादित्यर्थः ।

अन्त्ये त्वन्यत्र क्लृप्ताश्रयनाश एव तन्नाशक इत्याह—निःशेषेति । तद्रूपादेरिति । अवयविरूपादेरित्यर्थः । अवविपाकपक्षेऽपि नियममुपपादयन्नाह–अग्निसंयोगादिति । यत्रेति । अनन्यथासिद्धान्वयव्यतिरेकाभ्यां तथावधारणादित्यर्थः । आमदशायामिति । तदानीमग्निसंयोगाभावादित्यर्थः । पाकादेवेति । करणव्युत्पत्त्याग्निसंयोगादेवेत्यर्थः आश्रयनाशादेवेति । अवयविपाकमते कदाचिदग्निसंयोगादवयविरूपादि(३) नाशात्तन्निवृत्त्यर्थमेवेत्युक्तम् । यद्यप्यग्निसंयोगादप्यवयविरूपादिनाशः सम्भवति, एवमग्रेऽपि तस्य तेषामुत्पादकत्वम्(४) तथापि यत्राग्निसंयोगस्य नोत्पादकत्वं तत्र नाशकत्वमपि नेति

(१) रूपादिनाश—इति (क) पु० ।

(२) अवयविनाशे—इति (क) पु०

(३) आदि—इति नास्ति (क) पु० (४) च—इत्यधिकं (क) पु०

प्रागुक्तमाश्रित्येदमुक्तम् । अयं पार्थिवोऽवयवी द्रव्यनाशजन्यध्वंसप्रतियोगिरूपादिमान् अवयवरूपजन्यरूपवान् वा परमाणुभिन्नरूपित्वात् जलावयविवत् । यद्वा आमश्यामघटरूपनाशः आश्रयनाशजन्यः अग्निसंयोगाजन्यो वा घटरूपनाशत्वात् स्फुटितघटरूपनाशवदित्यत्र तात्पर्यम् ।

आश्रयनाशे मानमाह—घटादीति । अवयविपाकेऽपि कदाचिदग्निसंयोगो द्रव्यनाशक इति सिद्धसाधनमित्यत उक्तम्–नियमेनेति । अग्निसंयोगत्वादिति । अग्निसंयोगमात्रस्य व्यभिचारित्वेऽपि सकलावयवावच्छिन्नाग्निसंयोगत्वादित्यर्थः । अणुष्वित्यत्राणुपदस्य द्व्यणुकपरत्वम् । सतिसप्तमीभ्रममपाकरोति–परमाणूनामिति । सर्वत्रावयविरूपादौ नावयवरूपादीनां कारणत्वमित्युपपादयति–अत्र चेति । वायावपीति । यद्यपि रूपात्मककारणान्तराभावादपि वायौ रूपाभावः सम्भवति । तथापि रूपानपेक्ष(१)स्पर्शस्य यदि रूपजनकत्वं तदेतत् दूषणम्(२) । तदपेक्षत्वे च स्पर्शस्य हेतुत्वे मानाभाव इति मन्तव्यम् । एव(३)मग्रेऽपि । रसस्य रूपोत्पत्तिं प्रति व्यभिचारेऽपि(४) दूषणान्तरमाह–रसादेरिति । रसरूपयोरन्यतरानुद्भवेऽप्यन्यतरोद्भवो न स्यादित्यर्थः तदनुकारापत्तेश्चेति ।

(१) स्य—इत्यधिकं(क) पु० ।

(२) तदेवं दूषणम—इति (क) पु० ।

(३) इत्थम—इति (क) पु० ।

(४) अपि—इति नास्ति (क) पु० ।

तदुद्भवाद्यनुविधानापत्तेरित्यर्थः । इत्यादीति । रसाद्गन्धोत्पत्तौ जलेऽपि गन्धप्रसङ्गः गन्धाद्रसाद्वा रूपोत्पत्तौ जलतेजसोर्नीरूपत्वप्रसङ्ग इत्यादिपदसंग्राह्यम् ।

द्रव्यारम्भेति । तन्त्वादौ रूपादिमत्येव कार्योत्पत्त्यनुगुणक्रियादर्शनात्तथा व्याप्तिग्रहादित्यर्थः । द्रव्यारम्भेति स्वरूपमात्रकथनम् । अवयवि(१)क्रियामात्रस्यैव रूपादिमत्युत्पत्तिधारणात् । कारणान्तरापेक्षत्वादिति । नोदनाभिघातापेक्षत्वादित्यर्थः । तथा च तदुत्पत्तिसमय एव रूपाद्युत्पत्तिरिति भावः । यद्यप्येकपरमाणुपाके रूपरहितेऽपि तादृशक्रियोत्पत्तिस्तथापि प्रकृतद्रव्यारम्भकपरमाणुमभिप्रेत्य द्रव्यारम्भानुगुणेत्युक्तम् । ननु घटादीनामपि दृढत्वेन तत्राणुप्रवेशोऽनुपपन्न इत्यत आह—सान्तराण्येवेति । स्पन्दनेति । अन्तर्निहितस्याविभक्तावयवाधारतया विभागः स्पन्दनम् । अविनष्टावयवस्य बहिरवयवेनान्तर्निहितद्रव(२)द्रव्यसंयोगः स्रवणम् । नन्वग्निसंयोगमात्रान्न कार्यनाश(३)इत्यत आह—ईदृशे(४)हीति । व्यूहः संस्थानम् । अन्यथेति । यद्यग्निसंयोगो न पूर्वव्यूहप्रच्यावक इत्यर्थः । तथेति । व्यूहान्तरापत्तिदर्शनादित्यर्थः । आशुविनाशिनामिति । क्रमभाविनामिति शेषः । घटादिपाकेऽपीति ।

(१) अवयविनि—इति (क) पु० ।
(२) द्रव-इति (ख) पु० नास्ति ।
(३) कार्यद्रव्यनाश—इति (क) पु० ।
(४) ईदृशो—इति (क) पु० ।

घटादिपाके क्वचिन्मृदुत्वं नश्यति कठिनत्वं(१)चोपजायते क्वचिच्च विपरीतमित्यनुभवसिद्धम् । तौ च न स्पर्शभेदौ, चक्षुषापि तत्प्रतीतेः, किन्त्ववयवसंयोगभेदावेव । ततश्च पूर्वावयवसंयोगनाशेऽवयविनाश आवश्यक इत्यर्थः ।

एतेनेति । वस्तुतः प्रत्यभिज्ञानं गकारादाविव तज्जातीयविषयत्वेनाप्युपपन्नं पूर्वावयविनाशस्योक्तयुक्त्या प्रामाणिकत्वेन तथा कल्पनात् । तावदवयवेति । तावदवयवव्याप्तियोग्यपरिमाणवत्कार्यद्रव्यं किञ्चिदवयवनाशे सति अविनश्यदवस्थं सदितरावयवेषु न वर्तते । अन्यथा पूर्ववदेव तावद्देशव्यापकं परिमाणमुपलभ्येतेत्यर्थः । संकोचः किं परिमाणस्य नानात्वमुत विनाशः ? तत्र नाद्य इत्याह—स हीति । स संकोचः । तयोर्दृष्टान्तः । संहृत(२)परिमाणदार्ष्टान्तिकपरिमाणयोर्न भेदो नानात्वम् । कुतोऽभेदस्य द्रव्यधर्मत्वादित्यकारप्रश्लेषात् । द्रव्यस्य हि तत्राभेदो धर्मोऽभिन्नं द्रव्यमिति यावत् । न चाभिन्ने द्रव्ये परिमाणद्वयं वर्तत इत्यर्थः । अन्त्यमाशङ्क्य निराकरोति—न विनाश इति । परिमाणवति परिमाणान्तरानुत्पत्तेः । पूर्वपरिमाणस्याश्रयं विना विनाशानुपपत्तेरिति वयम् ।

सम्प्रदायविदस्तु । सम्भेदपरिमाणसंकोचात्मको न तयोर्दृष्टान्तदार्ष्टान्तिकपरिमाणयोर्भेदस्य संकोचस्य संयोगविशेषतया द्रव्यधर्मत्वात् परिमाणस्य च संयोगात्मक(३)कार्यानाश्रयत्वात् ।

(१) काठिन्यं—इति (क) पु० । (२) पट—इत्यधिकं (क) पु० ।
(३) संयोगविशेषात्मक—इति (क) पु० ।

यद्वा संवृतपटेन तयोर्नम्रयोरवयवयोर्भेदो विशेषः संयोगलक्षण इत्यर्थ इत्यन्ये।

आश्रयेति। परिमाणस्य(१)य आश्रयोऽवयवी तदवयवस्य क्वचिन्नाशात् क्वचिद्विश्लेषात् तत्परिमाणं नश्यति द्रव्यमिव समवाय्यसमवायिनाशाभ्यामित्यर्थः। अवयवेति। तथा चासमवायिकारणस्य नाशाद्द्रव्यनाश एव स्यादित्याश्रयनाश एव परिमाणनाशकः। आश्रयाश्रयनाशापेक्षया लघुत्वादित्यर्थः। नोदनादिक्रमेणेति। अग्निकर्मणारब्धद्रव्यपरमाणावग्निसंयोगो नोदनाख्यः, ततः परमाणौ कर्म, ततो द्व्यणुकारम्भकपरमाण्वन्तरेण विभागः, ततो द्रव्यारम्भकसंयोगनाशः, ततो द्व्यणुकनाश इत्यर्थः।

अत्र दशक्षणायां प्रक्रियायां यदैव द्व्यणुकनाशस्तदैव द्रव्यारम्भकसंयोगनाशकविभागेन पूर्वाकाशदेशविभागः, यदैव श्यामादिनिवृत्तिस्तदैवाकाशविभागेनाकाशसंयोगनाशः, यदैव रक्तोत्पत्तिस्तदैवोत्तरसंयोग इति व्यवस्था।

एकादशक्षणायां तु श्यामादिनिवृत्तिसमकालमाकाशविभागः, रक्तोत्पत्तिसमय एवाकाशसंयोगनाशस्तत उत्तरदेशसंयोग इत्येकक्षणवृद्धिः।

द्वित्रिक्षणेति। एकत्र परमाणावग्निसंयोगोत्पत्तिसमकालं परमाण्वन्तरे कर्मोत्पन्नं तदा(२) द्व्यणुकनाशमपेक्ष्य द्विक्षणा। तदा ह्येकत्र क्रमेण कर्मविभागद्रव्यारम्भकसंयोगनाशद्व्यणुकनाशाः, अन्यत्र विभागपूर्वसंयोगनाशोत्तरसंयोगद्रव्योत्पत्तिगुणोत्पत्तयः। यदा त्वेकत्र(१) परमाणौ विभागसमकालमन्यत्र परमाणौ कर्म तदा चतुःक्षणेत्येते पक्षा न सम्भवन्तीत्यर्थः।

(१) च—इत्यधिकं (क) पु०।
(२) कर्मोत्पत्तेः—इति (क) पु०।

उत्पन्न इति। अन्यथा तदारब्धद्रव्यस्य निर्गुणत्वापत्तिः। कारणगुणस्य गुणान्तरारम्भकत्वादित्यर्थः। एवमिति। पक्वपरमाणुभ्यामेवोक्तक्रमेणारम्भवादित्यर्थः।

न शरीरगुणा इति। न शरीरविशेषगुणा इत्यर्थः। अतो न द्वित्वादिना व्यभिचारः। अयावद्द्रव्यभावित्वादिति। समानाधिकरणध्वंसप्रतियोगित्वादित्यर्थः। प्रत्यक्षत्वादितीति(२)। यद्यपि परमाणुविशेषगुणानामपाकजत्वेऽपि प्रत्यक्षत्वादिति हेतुरुपपद्यत एव। (३)तथापि सुखादयो न पार्थिवपरमाणुगुणा अपाकजविशेषगुणत्वाच्छब्दवादित्यभिप्रेतम्। प्रत्यक्षत्वादिति तु यदा परमाणुगुणत्वं निरस्यते तदा प्रत्यक्षत्वादित्यपि हेतूकर्तव्यमिति स्फोरणायेति संप्रदायविदः।

नन्वेकादिव्यवहारहेतुत्वमव्यवह्रियमाणसंख्यायामसिद्धं तद्योग्यतायाश्च तदवच्छेदकरूपाज्ञानेऽज्ञानात्, ज्ञाने वा तदेव ल-

(१) परमाणौ कर्मसमकालं परमाण्वन्तरे कर्म तदा द्व्यणुकनाशमपेक्ष्यशमपेक्ष्य त्रिक्षणा। एवमेकत्र—इति (क) पुस्तकेऽधिकम्।
(२) प्रत्यक्षत्वादिति—इत्येव (क) पुस्तके।
(३) तथापि सुखादयो न परमाणुविशेषगुणा इति साध्यते तदाऽपाकजत्वादिति। यदा तु—इति (ग) पुस्तके।

क्षणमस्तु संख्यास्वरूपग्राहकमानाभावात् आश्रयासिद्धिश्चेत्यत आह-व्यवह्रियत इति । एकादिज्ञानासाधारणकारणविषयो गुणः संख्येति लक्षणं प्रत्यक्षं च प्रमाणमित्यर्थः । न च प्रत्येकसमुदायाभ्यामव्याप्तिः । अनेन संख्यात्वजातेरुपलक्षणात् (१) एकादौ संख्यातमित्यबाधितानुगतव्यवहाराच्च तत्सिद्धिः । न चेति । सांप्रतमित्यग्रेतनेनान्वीयते । एकप्रत्यय इति । अनेन घटादिभिन्नसंख्याग्राहकं प्रत्यक्षमेवोपन्यस्तं न त्वनुमानम् । अत एवाग्रे संख्याग्राहकप्रत्यक्षानुग्राहकस्तर्को दर्शित इति वक्ष्यति । तेनैकप्रत्ययो यदि घटादिप्रत्ययो विवक्षितस्तदातिरिक्ताविषयत्वसाधने बाधोऽथ घटादिभिन्नविषयस्तदाश्रयासिद्धिरित्यनुमानदूषणमपास्तम् ।

नन्वेकत्वं सत्तावज्जातिरस्तु एकमेकमित्यनुगतमतेर्जातिविषयकत्वात्, गुणविषयकत्वे तु परम्परासम्बन्धैक(२)वृत्तिजातिस्तन्निमित्तं वाच्यम्, तद्वरं जातिविषयैव सा भवतु । न च सत्तया सहान्यूनानतिरिक्तविषयत्वं तत्र बाधकम् । एकत्वं जातिः सत्ता गुण इति वैपरीत्यस्यापि संभवात् । न च द्वित्वासमवायिकारणतया एकत्वगुणसिद्धिः । एकपृथक्त्वेनान्यथासिद्धेः । न चैवं द्वित्वद्विपृथक्त्वयोः सामग्र्यभेदः । अवधिज्ञानस्याधिकस्य द्विपृथक्त्वकारणत्वात् ।

अत्राहुः । एकत्वान्यगुणाविषयः शाब्द एकप्रत्ययो गुणविषयकः एकप्रत्ययत्वात् चाक्षुषैकप्रत्ययवत् । तस्य रूपादिगुणविषयकत्वात्, शाब्दस्य च तस्य तदविषयकत्वात् । यद्वा द्वित्वम् एकवृत्तिवृत्ति(१)गुणत्वव्याप्यजातिमत् अपेक्षाबुद्धिजन्यत्वात् पृथक्त्ववत् । न चाप्रयोजकत्वम् । एकत्वस्य जातित्वे द्रव्यमेतत् सदितिवत् द्रव्यमेतदेकमिति प्रत्ययापत्तेः ।

ननु संख्या न गुणः, वस्तुमात्र एवैकादिव्यवहारात् । गौणमुख्यभावस्य च दुर्निरूपत्वात् । द्वित्वादेस्त्वपेक्षाबुद्धिव्यङ्ग्यत्वमतः पदार्थान्तरमेव ।

अत्राहुः । द्वित्वाद्यपेक्षाबुद्धिजन्यं(२) कार्यत्वे सति नियमेनैकप्रतिपत्तृवेद्यत्वात् सुखवत् । कार्यत्वेन विशेषणान्न ज्ञानप्रागभावादिना व्यभिचारः । न चाप्रयोजकत्वम् । अपेक्षाबुद्धिविशेषाणां द्वित्वादिव्यञ्जकत्वे द्वित्वद्विपृथक्त्वादेः(३) प्रतिनियतव्यञ्जकव्यङ्ग्यत्वानुपपत्तेः । एकावच्छेदेन समानदेशयोः समानेन्द्रियग्राह्ययोः प्रतिनियतव्यञ्जकाभावनियमात् । अवयव्यवयवसंयोगयोर्व्याप्याव्याप्यवृत्तित्वेन उत्पलत्वस्य च नीलरूपापेक्षयाऽधिकदेशवृत्तित्वेनै(४)कावच्छेदेन वृत्त्यभावात् । बहुत्वव्यञ्जकव्यङ्ग्यत्वं चावयव्येकत्वयोरिति न मिथो व्यभिचारिव्यञ्जकव्यङ्ग्यत्वम् । अत एव नीला बलाकेत्यत्र दूरत्वेन परिमा-

(१) उपलक्षणत्वात्—इति (क) पु० ।

(२) एकत्व—इति (क) पुस्तके ।

(१) एकवृत्तिगुणवृत्ति—इति (ख) पु०

(२) बुद्धिजं—इति (क) पु०

(३) द्वित्वत्रित्वादेः—इति (ख) पु०

(४) अधिकव्यक्तिकत्वेन—इति (ख) पु०,

णाग्रहे रूपग्रहाद्रूपपरिमाणयोरर्द्धनिखातवंशसंख्यापरिमाणयोश्च न व्यभिचारः । त्र्यादिष्वपीति । स्वरूपभेदस्य तत्रापि(१) सत्त्वादित्यर्थः ।

अथ स्वरूपभेदविशेषो द्वित्वव्यवहारहेतुस्तत्राह—घटादावेवेति । घटाद्यतिरिक्तस्य विशेषस्याभावात् । भावे वा स एव द्वित्वादिसंख्येत्यर्थः । भिन्नानामिति । भिन्नानां द्वित्वत्रित्वादीनामभिन्नबुद्ध्युपग्रहस्य समुच्चयबुद्धिमात्रस्याविशेषात् त्रिचतुरादिविचित्रव्यवहारो न स्यादित्यर्थः । अन्यथेति । नानैकत्वविषयस्याविशेषादित्यर्थः(२) । न स्यादिति । संख्याया गुणत्वाद्गुणादाववृत्तेरित्यर्थः । सामान्यद्वारैवेति । द्वावेतौ द्वावेताविस्यनुगतः प्रत्ययः प्रत्येकविश्रान्तैर्द्वित्वादिभिः कर्तुमशक्य इति द्वित्वगुणवृत्तिसामान्येन परम्परासम्बन्धात्कर्तव्यः । द्वित्वादीनां सामान्यरूपत्वे तु तैः साक्षात्सम्बन्धादेव भवतीति लाघवमित्यर्थः । अविरोधादिति । यदि द्वित्वादिकं जातिः स्यात्तदा द्वयमिदं द्रव्यमित्यत्रेव द्वयमिदं त्रयमित्यत्रापि विरोधो न स्यादित्यर्थः ।

यद्वा द्वित्वादेर्जातिरूपत्वे इदं द्रव्यमितिवदिदं द्वे इति प्रतीतिविषयत्वं स्यात् । जातेः प्रत्येकं विश्रान्तेः । तथा चैतद्घटद्वित्वं नैतत्सामान्यम् एतद्घटातिरिक्तद्रव्याविषयप्रतीत्यविषयत्वात्

(१) अपि—इति नास्ति (क) पु० ।

(२) नानैकत्वविषयत्वस्यत्यर्थः—इति (क) पु० ।

संयोगवत् । यद्येतद्घटाद्वित्वमेतद्घटसामान्यं स्यादेतद्घट(१)मात्रेन्द्रियसन्निकर्षवेद्यं स्यादिति विपक्षे बाधकमित्यर्थः । विरोधादिति पाठः सुगम एव । परापरेति । द्वित्वादिकं यदि सत्ताद्रव्यत्वभिन्नं सामान्यं स्यात् द्रव्यत्वसमानाधिकरणात्यन्ताभावप्रतियोगि स्यादिति । यावद्द्रव्यवृत्ति न स्यादित्यर्थः । अन्यूनेति । द्वित्वं यदि यावत्सद्वृत्ति सामान्यं स्यात् सत्ताभिन्नं न स्यादिति । सत्तया सहान्यूनानतिरिक्तव्यक्तिकं स्यात् । तादृशं च सामान्यं घटत्वकलशत्ववन्नेष्यत इत्यर्थः । प्रत्ययेति । तादृशसामान्यद्वयानभ्युपगमे मानाभावो मूलम् । प्रकृते च सत्प्रत्ययविलक्षणा द्वावित्यादिधीरेव मानमित्यर्थः । धर्मविरोधमिति । सत्ताद्वित्वयोर्घटत्वकलशत्ववदन्यूनानतिरिक्तव्यक्तिवृत्तितया विरोधाभावे भेदाभावात् प्रत्ययवैलक्षण्यमेव न स्यादित्यर्थः । अन्यथेति । घटकलशबुद्ध्योरभिन्नविषयत्वं घटकलशशब्दयोश्च पर्यायता न स्यादित्यर्थः । एतावता सतर्कं प्रत्यक्षमेव द्वित्वादेः सामान्यादिवैलक्षण्ये गुणत्वे च मानमुक्तम् । गणितेति । यद्यपि गणितत्वं न संख्यात्वं जातिस्तदसिद्धेः, एकादित्वं चाननुगतम्, गणितशब्दवाच्यत्वं चातिप्रसक्तम् । तथाप्यनुगतप्रतीतेरननुगतैनैकत्वादिनोपपादयितुमशक्यत्वादनुगतं संख्यात्वम् । तच्च बाधकाभावाज्जातिः । न चैवं गुणत्वे सतीति व्यर्थम् । त्रयोविंशतिगुणाविषयकगुणविषयकशाब्दानुगतैकत्वादिप्रत्ययादेव संख्यात्वासिद्धेः । न च जातिरूपत्वे

(१) स्यात्तद्घट—इति (ख) पु० ।

रूपत्वाद्यवान्तरसामान्यसम्बन्धाद्रूपादिसंज्ञा भवतीत्यनेन प्रागुक्तेन पौनरुक्त्यम्। तत्र संज्ञाप्रवृत्तिनिमित्तमात्रकथनात्। अत्र त्वितरभेदकत्वकथनात्। लक्षणाबीजमनुपपत्तिमाह—अन्यथेति। प्रत्येकसमुदायविकल्पग्रासादित्यर्थः।

पृथक्त्वस्यैकानेकद्रव्यवृत्तित्वात्तस्य व्यावर्त्यत्वं न सम्भवतीत्यत आह-संयोगादय इति। पृथक्त्वान्यैकवृत्ति(१)वृत्त्यनेकवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वं लक्षणमित्यर्थः। सलिलपरमाणुरूपादीनां नित्यत्वात्तदतिदेशेनानित्यत्वानित्यत्वनिष्पत्ती विरुद्धे इत्यन्यथा व्याचष्टे--सलिलमादिरिति। द्वित्वमादिरिति(२)। नन्वादिशब्दः प्राथम्यवाची प्राथम्यं च द्व्यणुकादिवन्नोत्पत्तिनिरूप्यम्। न हि त्रित्वापेक्षया द्वित्वस्य प्रथममुत्पत्तिनियमः। नापि भूवादीतिवत्पाठनिरूप्यं तेन रूपेण क्वचिदप्यपाठात्। एवमन्तत्वमपि नोत्पत्तिपाठाभ्यां निरूप्यम्।

अत्राहुः। आदिशब्दोऽत्र प्रकारवाची। प्रकारश्चैकत्वान्यसंख्यात्वम्। अन्तत्वं च परार्द्धस्य स्वव्यापकसंख्याशून्यत्वम्।

संप्रदायविदस्तु आदिशब्दोऽत्र प्राथम्यवाची प्राथम्यं च द्वित्वस्य समानाधिकरणानेकवृत्तिसंख्याव्याप्यत्वम्, अन्तत्वं च परार्द्धस्य समानाधिकरणयावत्संख्याव्यापकत्वमित्याहुः।

निष्पत्तिरेवेत्यवधारणं येऽपेक्षाबुद्धिव्यङ्ग्यत्वं द्वित्वादेराहुस्त-

(१) वृत्ति—इति नास्ति (ख) पु०।
(२) द्वित्वमिति (ख) पु०।

न्मतनिरासाय—एकत्वे चेति। एकत्वपदात्सामान्यतः सकलैकत्वोपस्थितौ योग्यतया द्वित्वं प्रत्येकत्वे त्रित्वादीन्(१) प्रत्येकत्वानि योज्यानि। अनेकविषयेति। नानैकत्वगोचरेत्यर्थः। कथमिति। एतदपेक्षाबुद्धेर्द्वित्वादिनिमित्तकारणत्वं कुत इत्यर्थः। तदेव स्फुटयति—अथेति। कारणद्वित्वादिभ्यः कार्यद्वित्वादिकमुत्पद्यते यथैकत्वमित्यर्थः। एकद्रव्यमिति। एकमात्रद्रव्यसमवेतम्। एकत्वे तथा दर्शनादित्यर्थः। त्रित्वादि कं(२) चेति। द्विमात्रावयवारब्धे कारणत्रित्वादेरभावादित्यर्थः। तद्वदेवेति। यथा कारणाकारणवृत्तिसंयोगेनारब्धः संयोगः कार्याकार्यवृत्तिर्न तु कारणवृत्तिस्तथा त्रित्वादिकमपीति द्व्यणुकतत्कारणपरमाणवस्त्रय इति व्यवहारो न स्यादित्यर्थः।

कारणमात्रवृत्त्येकत्वस्य द्वित्वाद्यारम्भकत्वे दूषणान्तरमाह—किञ्चेति। एकत्वे विशेषान्तराभावादित्यर्थः। ननु यावति द्वित्वप्रागभावस्तावति द्वित्वं यावति त्रित्वप्रागभावस्तावति त्रित्वमिति प्रागभावभेदात् कार्यभेदः स्यात्। न च प्रागभावेतरसकलकारणाभेदे प्रागभावभेदोऽप्यावश्यकः। अपेक्षाबुद्ध्युत्पाद्यत्वेऽपि द्वित्वादे(३)रस्य दोषस्य तुल्यत्वात्। न चैकत्र कदाचित् द्वित्वं कदाचित् त्रित्वमिति न स्यात् किन्त्वेकदैव द्वित्वत्रित्वाद्युत्पात्तिः स्यात्। इष्टापादनात्। तदपेक्षाबुद्धिक्रमेण-

(१) त्रित्वादीनि—इति (क) (ख) पु०।
(२) द्वित्वादिकं—इति (क) पु०।
(३) द्वित्वादेः—इति नास्ति (क) पु०।

तत्तदभिव्यक्तेः क्रमात् । एतेन नित्यद्रव्येषु द्वित्वादेः सततोत्पत्तिप्रसङ्गोऽपास्त इति दूषणान्तरमाह—द्वित्वद्विपृथक्त्वादेश्चेति । द्वित्वादेः प्रत्येकैकत्वबुद्धिव्यङ्ग्यत्वं द्विपृथक्त्वादेश्च प्रत्येकैकपृथक्त्वबुद्धिव्यङ्ग्यत्वमिति नियतव्यञ्जकव्यङ्ग्यत्वं न स्यादित्यर्थः । यथा चात्र न व्यभिचारस्तथोपपादितमधस्तात् । नन्वपेक्षाबुद्धिजन्यत्वेऽपि द्वित्वादीनां द्वित्वद्विपृथक्त्वयोः प्रतिनियतव्यञ्जकत्वानुपपत्तिस्तुल्या । अथावधिज्ञान(१)मधिकमपेक्ष्य द्वित्वव्यञ्जकैकबुद्धिव्यङ्ग्यत्वं द्विपृथक्त्वादेरिति न परस्पराव्यञ्जकव्यङ्ग्यत्वमित्युच्यते तर्हि द्वित्वादीनामपेक्षाबुद्धिव्यङ्ग्यत्वेऽपि तुल्यम् ।

अत्राहुः । द्वित्वद्विपृथक्त्वादिकं यदि कारणगुणजन्यं स्यादेकत्ववदपेक्षाबुद्धिव्यङ्ग्यं न स्यादित्यापादने तात्पर्यम् ।

तद्विनाशश्चेति । ईश्वरापेक्षाबुद्धेर्नित्यत्वेऽपि तज्जन्यद्वित्वादीनां विनाशोऽप्यपेक्षाबुद्धिनाशादेव, यदुपाधिसमवधानात्तद्बुद्धेरपेक्षाबुद्धित्वं तन्नाशादेव तन्नाशात् । अत्र च द्वित्वाद्य(२)पेक्षाबुद्ध्योर्नियतपौर्वापर्यादेव ज्ञानेच्छयोरिव कार्यकारणभावग्रहः । द्वित्वज्ञान(३)समकालमेव द्वित्वगुणनाशेन तद्ग्राहकस्य प्रत्यक्षस्याभावात् । बुद्धिमात्र इति । विशिष्टबुद्धिमात्र इत्यर्थः । शिष्येति

(१) ज्ञानम—इति नास्ति (क) (ख) पुस्तकयोः ।
(२) द्य--इति नास्ति (क) (ख) पुस्तकयोः ।
(३) द्वित्ववृत्तिसामान्यज्ञान—इति (क) (ख) पु० ।

विषय(१)प्रदर्शनार्थं शिष्यजिज्ञासानुवादः कृत इत्यर्थः । द्वित्वारम्भायेति(२) । एकत्वाभ्यां सहकारिसंपन्नाभ्यां भूयत इत्यर्थः । सहकारित्वं तु तामपेक्ष्येत्यभिधानादपेक्षाबुद्धेरेव लभ्यत इत्याह—द्वित्वारम्भेति ।

ननु तदेत्यस्यापेक्षणक्रियान्वयात्तत्कालीनतदपेक्षाज्ञानानन्तरं कालान्तरे द्वित्वमारभ्यत इत्यन्वय उपपद्यत एव ।

नैवम् । प्रधानक्रियान्वयस्याभ्यर्हितत्वात्तदेत्यारम्भाक्रियान्वयमनुरुध्य व्याख्यानात् ।

द्रव्यज्ञानादिति । द्वे द्रव्ये इति ज्ञानात्पूर्वमित्यर्थः । ननु विशिष्टज्ञानं विशेषणज्ञानजन्यं द्वित्वसामान्यनिर्विकल्पकं च द्वित्वगुणविषयमिति तत एव विशेषणज्ञानात् द्वे द्रव्ये इति द्वित्वविशिष्टद्रव्यज्ञानं स्यात् । तदानीं द्वित्वगुणस्य विशेषणस्य विद्यमानत्वात् ।

अत्राहुः । यद्विशेषणविशिष्टस्य यस्य यत्र विशिष्टज्ञाने विशेषणत्वं तद्विशेषणविशिष्टस्यैव तस्य विशेषणस्य ज्ञानं तत्र विशिष्टज्ञाने कारणम् । तथा च द्वित्वत्वविशिष्टस्य द्वित्वगुणस्य विशेषणत्वमिति निर्विकल्पकानन्तरं द्वे द्रव्ये इति विशिष्टज्ञानात् पूर्वं द्वित्वत्वविशिष्टगुणधीर्वाच्या । अतो यदा द्वित्वगुणज्ञानं तदैव निर्विकल्पकादपेक्षाबुद्धिनाशस्ततो द्वित्वविशिष्टद्रव्यज्ञानसमकालं द्वित्वनाश आवश्यक इति भावः । ननु तेनानुविधीयमानत्वं तद-

(१) विशेष—इति (ख) पु० ।
(२) आरम्भायेति (क) (ख) पु० ।

न्वयव्यतिरेकानुविधायकत्वं(१) तच्चापेक्षाबुद्धिव्यङ्ग्यद्वित्वादिनाऽसिद्धमित्यत उक्तम्—व्यञ्जकत्वानुपपत्ताविति । कन्दलीकारमतमास्कन्दति—द्वित्वं बुद्धिजमिति ।

ननु जागराद्यज्ञानं यदि विशिष्टज्ञानं विवक्षितं तदा तस्य निर्विकल्पकजन्यतया व्यभिचारः । प्रयत्नोऽपि कृतिरूपश्चिकीर्षाद्वारा बुद्धिजन्य एव जागराद्यनिर्विकल्पके जीवनयोनियत्ने च हेतुरेव नास्ति तयोरतीन्द्रियत्वात् । न च सुखप्रागभावादिना व्यभिचारः । गुणत्वेन भावत्वेन वा हेतु(२)विशेषणात् । न चेश्वरबुद्धिजत्वेन सिद्धसाधनम् । जन्यबुद्धिजत्वस्य साध्यत्वात् । नाप्यतीन्द्रियद्वित्वे(३) भागासिद्धिः । प्रत्यक्षसिद्धस्यैव पक्षत्वात् । तदुत्तरमतीन्द्रियद्वित्वे हेत्वन्तरेण बुद्धिजत्वसाधनात् । नाप्यसिद्धिः । न हि वेद्यत्वं ज्ञायमानत्वमात्रं हेतुर्येनानुमानादिना बहुपुरुषवेद्यत्वात् द्वित्वे न स वर्तेत, किन्तु साक्षात्क्रियमाणत्वम् ।

अत्राहुः । यद्यव्यवहितविशिष्टबुद्धिजत्वं(४) साध्यते तदा जागराद्यविशिष्टज्ञानकृतिभ्यामनैकान्तिकम् । अथ बुद्धिजत्वमात्रं साध्यं(५) तदा हेतोरसिद्धिः । कारणगुणात्पूर्वोत्पन्नमेव द्वित्वं

(१) विधायित्वं-इति (क) (ख) पु० ।
(२) हेतोः— इति(क) (ख) पु० ।
(३) अस्य—इत्यधिकं (क) पुस्तके ।
(४) जन्यत्वं—इति (ख) पु० ।
(५) साध्यते—(ख) पुस्तके ।

यस्य यदापेक्षाबुद्धिस्तदा तेन प्रतीयत इति परस्याभ्युपगमात्(१) । एकमात्रपुरुषवेद्यरूपादावनैकान्तिकं च । न च प्रतिनियतवेद्यजातीयत्वं हेतुः । तद्धि यदि व्यक्तेर्विशेषणं, तदा जागराद्यनिर्विकल्पकजीवनयोनियत्नाभ्यां व्यभिचारः, जातिविशेषणत्वे चासिद्धिः । परेण द्वित्वादेरनेकपुरुषवेद्यत्वाभ्युपगमात् । संतानवर्तिन्य इति । क्षणचतुष्टयाव्यापिका इत्यर्थः । व्यवधानेति ।

ननु(२) व्यवहारनिवर्तनीयत्वं यदि व्यवधानध्वंसनीयत्वं तर्ह्यसिद्धिः इन्द्रियव्यवधानेन प्रतिबन्धात् ज्ञानान्तरस्यानुत्पत्तेश्च(३) ।

अत्राहुः । ज्ञानान्तरस्य ज्ञानानिवर्त्यत्वे स्थिरविषयेन्द्रियसंनिकर्षे धारावाहिकज्ञानसंतानोपलम्भप्रसङ्गः । न च तत्र ज्ञानान्तरं नोत्पद्यते पूर्वज्ञानेन प्रतिबन्धादिति वाच्यम् । विशिष्टज्ञानानुत्पत्त्यापत्तेः । तथा च समानाधिकरणविशेषगुणानाश्यत्वे बुद्धीनां युगपत् स्थिरविषया नानाबुद्धयोऽनुव्यवसीयेरन्नि(४)ति योग्यानुपलम्भे तात्पर्यम् ।

क्वचिदुभयमिति । निर्विकल्पकं केवलज्ञाननाश्यं तस्य संस्काराजनकत्वात् सुषुप्तिप्राक्कालीनं च ज्ञानं संस्कारनाश्यमेव

(१) परस्योपगमात्—इति (क) पुस्तके ।
(२) ननु—इति (क) पुस्तके नास्ति ।
(३) च—इति (क) (ख) पुस्तकयोर्नास्ति ।
(४) नानुव्यवसीयेरन्—इति (ख०) पु० ।

तस्य ज्ञानाजनकत्वात् । अन्यत्र तूभयनाश्यं प्रत्येकं सामर्थ्यकल्पनादित्यर्थः । अभिव्यञ्जकत्वे प्रागपीति । यद्यप्यपेक्षाबुद्धेर्द्वित्वोत्पादकत्वे व्यञ्जकत्वे(१)च बाधकाभावाद्व्यञ्जकाभावादेवो(२)त्तरकालमग्रहः स्यात् । तथाप्यपेक्षाबुद्धिसत्त्वे द्वित्वान्तरोत्पत्त्यावश्यकत्वात्(३) तेनैव द्वित्व(४)व्यवहारोपपत्तौ पूर्वोत्पन्न(५)द्वित्वसत्त्वं द्वित्वान्तरसत्त्वं चानुपलब्धिबाधितमिति द्वित्वनाश आवश्यक इति भावः ।

द्वित्वमिति । यद्यपि कार्यद्रव्यवृत्तिद्वित्वस्याश्रयनाशान्नाशः नित्यद्रव्यवृत्ति(६)द्वित्वस्य च समानाश्रयपुरुषान्तरापेक्षाबुद्धिजद्वित्वान्तराद्विरोधिगुणान्नाशः सम्भवत्येव । तथापि विद्यमानाश्रयद्वित्वं पक्षः । नित्यद्रव्ये च यदि युगपदुत्पन्नानेकद्वित्वानां मिथो नाशकत्वं तदा तत्र द्वे द्रव्ये इति ज्ञानानुत्पत्तिप्रसङ्गः । उत्तरद्वित्वेन पूर्वद्वित्वनाशाभ्युपगमेऽव्यवहितोत्तरक्षणोत्पन्नद्वित्वानन्तरमेव पूर्वद्वित्वनाशात्स एव दोषः । न चान्यापेक्षाबुद्धिजद्वित्वात्तद्विशिष्टद्रव्यधीः स्यात् । तस्य पुरुषान्तराप्रत्यक्षत्वात् । अन्यथा नानापुरुषापेक्षाधीयुगपज्जनितानेकद्वित्वा-

(१) तद्यञ्जकत्वे—इति (क) पु० ।
(२) असत्त्वादेव—इति (क) (ख) पु० ।
(३) आवश्यकत्वे—इति (क) पु० ।
(४) द्वित्व—इति (क) पुस्तके नास्ति ।
(५) पूर्वमुत्पन्न—इति (क) पु० ।
(६) वृत्ति—इति नास्ति (क) (ख) पुस्तकयोः ।

ध्यक्षतापत्तेः । न च यदपेक्षाबुद्धिजं यद्द्वित्वं तदपेक्षाबुद्धिजद्वित्वेनैव(१) तन्नाशः । चरमज्ञानोत्पन्ननित्यवृत्तिद्वित्वस्यानाशप्रसङ्गात् । एवं व्याप्तिसिद्धौ द्वित्वस्य द्वित्वनाश्यत्वानुमानात् । न च द्व्यणुकनाशेन व्यभिचारः । गुणस्य सत इति विशेषणेनैव तन्निरासात् । नाप्यसमवायिकारणनाशनाश्यगुणेन व्यभिचारः । आश्रयपदेन निमित्तकारणान्यकारणस्य विवक्षितत्वात् । असमवायिकारणनाश्यत्वेन हेतुविशेषणाद्वा । न च निमित्तकारणादृष्टनाशेनार्थान्तरम् । अपेक्षाबुद्धिनाशस्य योग्यानुपलम्भनिश्चितत्वात् । अदृष्टनाशकल्पनायां च गौरवात् । न चेश्वरापेक्षाबुद्धिजे द्वित्वे तदसम्भवः । यदुपाधिविशिष्टाया अपेक्षाबुद्धित्वं तन्नाशे तस्यापि नाशात् । चरमेति । न च चरमज्ञानं पूर्वबुद्धिनाश्यम् उपान्त्यनाश्यान्त्यशब्दवादिति वाच्यम् । कार्यज्ञानस्य कारणज्ञानानाश्यत्वात्(२) । अन्यथा निर्विकल्पकेन विशिष्टधीनाशे तदप्रत्यक्षतापत्तेः । कथं पुनरिति । यद्यपि विशिष्टज्ञानकाले द्वित्वनाशेऽप्यव्यवहितप्राक्कालवृत्तितया द्वित्वस्य साक्षात्कारविषयतायां च न विरोधः । तथापि प्रत्यक्षं स्वसमानकालीनमेव विशेषणं विषयीकरोतीति नियम इत्यर्थः । न हीति । विशेषणं च द्वित्वं नास्त्येवेत्यर्थः । विशेषणमिति । न च स्वसमयवर्तित्वेन विशेषणस्य विशिष्टाध्यक्ष(३)कारणत्वम् । गौ-

(१) अपेक्षाजन्यत्वेनैव—इति (ख) पु०
(२) कारणज्ञानेन कार्यज्ञानानाशात्—इति (क) पु० ।
(३) विशिष्टाध्यक्षे—इति (क) (ख) पु० ।

त्वादित्यर्थः । एतच्चोपलक्षणम् । विशेष्यस्यापि न स्वसमयवर्तितया विशिष्टप्रत्यक्षकारणत्वम् । अतएव कारणीभूत(१)कत्वनिर्विकल्पकसमयोत्पन्नककारेण विशेष्यस्य ककारस्य नाशात् कत्वविशिष्टज्ञानक्षणे विशेष्यस्यासत्त्वेऽपि तत्पूर्वक्षणे विशेष्यस्य सत्त्वात् ककारविनाशकालेऽपि कत्वविशिष्टप्रत्यक्षम् । न त्विति । वर्तमानस्यैव प्रत्यक्षज्ञानविषयत्वादित्यर्थः । व्यवच्छेदकस्येति । विशेष्यनिष्ठातद्व्यावृत्तिबोधकस्येत्यर्थः ।

उपलक्षणस्यापीति । जटाभिस्तापस इत्यादौ जटादेरुपलक्षणस्यापि तथात्वादित्यर्थः । तदेव त्विति । विशेषणभिन्नोपलक्षणस्यानवगमादित्यर्थः । भेदाभेद इति । तथाच भेदमादाय वैशेष्यम(२)भेदमादाय विशेषणत्वमित्यर्थः । विरोधायेति । विरुद्धयोः खल्वभेदं (३)विना एकत्रावृत्तेरज्ञानाच्च । न चात्रावच्छेदकभेदेऽनति(४)प्रसक्तम् । तदभावेऽपि विरुद्धयोरेकत्र वृत्तौ नित्यत्वानित्यत्वादीना(५)मप्येकत्र वृत्तिप्रसङ्ग इत्यर्थः । नियमो नेति । सर्वेषां मिथो विरुद्धानां पक्षाणां सत्त्वे शब्दोऽनित्य एव स्यात् इति(६) नियमो न स्यादित्यर्थः । नूनामिति । नियमोऽप्यनियमाविरोधान्न स्यादिति भे-

(१) कारणीभूत—(क) (ख) पुस्तकयोर्नास्ति ।
(२) वैशिष्ट्यम्—इति (क) (ख) पु० ।
(३) अवच्छेदभेदं—इति (क) (ख) पु० ।
(४) अवच्छेदकमनति—इति (क) (ख) पुस्तकयोः ।
(५) अनित्यत्व—इति (ख) पुस्तके नास्ति ।
(६) पक्षेत्यादि—इति (क) पु० ।

दाभेदावप्येकत्र न स्यातामित्यर्थः(१) । सर्वमभिन्नमिति । भेदस्य विरोधगर्भत्वात् तदभावे सर्वस्याभिन्नत्वात् सर्वशब्दार्थ एव नोपपद्येतेत्यर्थः । व्यवच्छेदकस्येति । उपलक्षणस्य तु व्यवच्छेदकत्वेऽपि न विशिष्टधीविषयत्वमित्यर्थः ।

समानाधिकरणमिति । ननु सामानाधिकरण्यं नैकविभक्तिनिर्देश्यत्वं प्रयोगस्य वस्त्वव्यापकत्वात् । नाप्यैकाधिकरण्यम् । तद्धि न विशेष्येण, उत्पलनीलरूपयोरेकत्रावृत्तेः । नापि तद्धर्मेण प्रत्याय्य व्यावृत्त्या वा । उपलक्षणस्यापि तत्सत्त्वात् । न हि तापसे जटा न तिष्ठति(२) । केवलान्वयिनः प्रमेयत्वादेर्विशेषणत्वानुपपत्तेश्च । न च व्यावर्तकत्वे सति क्रियान्वयित्वम् । क्रियाहीनेऽयं दण्डीत्यादौ दण्डादेरविशेषणत्वापत्तेः(३) । परम्परयोपलक्षणेऽपि क्रियान्वयाच्च । (४)न चान्वयप्रतियोग्युपस्थापकतयान्वितम् उपलक्षणम् । काकादेः संस्थानाद्युपस्थापकत्वात् । साक्षादन्वितं विशेषणम् अभावे प्रतियोगिनोपलक्षणेन धर्मान्तरानुपस्थानात् । नापि साक्षात्सम्बद्धं व्यावर्तकं विशेषणं परम्परासम्बद्धं तदुपलक्षणम् । रूपवति रस इत्यादौ रूपादेः साक्षात्सम्बन्धेऽप्युपलक्षणत्वात् । लोहितः स्फटिक इत्यादौ परम्परासम्बन्धेऽपि लौहित्यस्य विशेषणत्वात् ।

(१) भेदाभेदावप्येकत्रात एव न स्याताम्—इति (क) पु० ।
(२) वर्तते—इति (क) (ख) पु० ।
(३) दण्डादौ विशेषणतानापत्तेः—इति (ख) पु० ।
(४) क्रियान्वयित्वात्—इति (क) पु० ।

न च व्यावृत्तिबोधसमकालीनं व्यावर्तकं विशेषणम् । द्वित्वस्य स्वविशिष्टज्ञानकालासत्त्वेऽपि(१) विशेषणत्वानुपपत्तेः । उपलक्षणेऽतिव्याप्तिश्चेति ।

उच्यते । यदन्विततया ज्ञात एव विशेष्ये तात्पर्यविषयीभूतेतरान्वयधीस्तद्व्यवच्छेदकं विशेषणम्, अनेवंभूतं व्यवच्छेदकम् उपलक्षणम् । उपलक्षण नकच्छिन्नेऽप्युपलक्ष्ये तात्पर्यविषयान्वयबोधात् । यद्वा यद्व्यावर्तकं विशेष्यान्वयिना अन्वीयते तद्विशेषणं यन्नान्वयि व्यवच्छेदकं तदुपलक्षणम् । अथवा । प्रत्याय्य व्यावृत्त्यधिकरणतावच्छेदकत्वे सति व्यावर्तकं विशेषणम् । तदन्यव्यावर्तकमुपलक्षणम् । तथाहि दण्डी पुरुष इति ज्ञानानन्तरं दण्डवत्यदण्डव्यावृत्तिरवगम्यत इति प्रत्याय्य व्यावृत्त्यधिकरणत्वं पुरुषे(२)दण्डेनावच्छिद्यते न पुरुषत्वेन, अतिप्रसक्तेः(३) । उपलक्षणस्य तु(४) काकजटादेर्गृहतापसादिनिष्ठप्रत्याय्यव्यावृत्त्यधिकरणता न काकजटादिभिरवच्छिद्यते तदभाववत्यपि व्यावृत्तिप्रतीतेः ।

यद्वा विशिष्टधीहेतुज्ञानविषयत्वे सति व्यवच्छित्तिप्रत्ययसमये विशेष्यतावच्छेदकधर्माश्रयवृत्ति विशेषणं तदन्यत् व्यावर्तकमुपलक्षणम् । काकस्तु(५) यदि व्यवच्छित्तिप्रत्ययसमये

(१) कालासत्त्वेन—इति (ख) पु० ।
(२) पुरुषे-इति (क) पुस्तके नास्ति ।
(३) अतिव्याप्तेः--इति (क) (ख) पु० ।
(४) तु--इति (क) (ख) पुस्तकयोर्नास्ति ।
(५) काकादिस्तु-इति (ख) पु० ।

विशेष्ये वर्तते तदा विशेषणमेव, यदा तु न वर्तते तदोपलक्षणम् । अत एव जटासत्त्वासत्त्वकाले जटावांस्तापसो जटाभिस्तापस इति प्रयोगः । कालभेदेन जटाया विशेषणत्वादुपलक्षणत्वाच्च(१) अन्यथा तृतीयानियमो न स्यात् । अत एव व्यवच्छित्तिप्रत्ययसमये विशेष्ये सत्त्वासत्त्वाभ्यां तदेव विशेषणमुपलक्षणम् । न तु यद्विशेषणं न तदुपलक्षणं यदुपलक्षणं न तद्विशेषणमिति । तत्र च लक्षणायामुपलक्षणत्वं तत्र तत्सार्थवाहित्वतीरादिधर्मोपस्थापनद्वारा गङ्गादेर्व्यावर्तकस्य तदिति ।

अतद्व्यावृत्तिरिति । विशिष्टस्यातद्व्यावृत्त्यधिकरणत्वादित्यर्थः । अनीलव्यावृत्तमिति । वस्तुतो यदनीलव्यावृत्तमुत्पलं तद्भासत इत्यर्थः । न हि नीलोत्पलमिति विशिष्टबुद्धावनीलव्यावृत्तिर्भासते । अपोहवादनिरासात् । किन्तु नीलगुणसम्बन्धमात्रं तदुत्तरं च तद्व्यावृत्तिर्भासते । ननु व्यावृत्तेरव्यावृत्तत्वे कथं तद्योगादतद्व्यावृत्तविशिष्टज्ञानोत्तरमपि भासेत, तत्रापि व्यावृत्त्यन्तरसत्त्वे चानवस्थेत्यत आह—न चेति । तर्हि किं विशिष्टज्ञाने विशेषणं न क्वचिदपि विषयो नेत्याह—एवं चेति । स्थिरं विशिष्टज्ञानसमकालीनमित्यर्थः ।

वस्तुतो द्वे द्रव्ये इति विशिष्टप्रत्यक्षकाले यद्यपि द्वित्वमसत् तथापि तद्विषयत्वे नैष(२) दोषः । प्रत्यक्षाव्यवहितपूर्वकाले द्वि-

(१) च—इति (क-ख) पुस्तकयोर्नास्ति ।
(२) एष—इति नास्ति (क) ख) पु० ।

त्वस्य वर्तमानत्वादिन्द्रियसंबन्धाच्च । न च प्रत्यक्षस्य स्वसमानकालीनमात्रविषयकत्वनियमः । विपक्षे बाधकाभावात् । कार्यकारणभावस्य प्राक्कालीनत्वमात्रेणैवोपपत्तेः । ग्रन्थस्तु क्वचिदस्थिरमपीत्यपिशब्दस्वरसान्नेयः । ननु विशेषणतायामिति । स्थिरस्य विशेषणस्य विशिष्टप्रत्यय(१)विषयत्वं क्वचिद्यद्यप्यस्ति तथापि विशेषणत्वे तन्न तन्त्रमित्यर्थः । देवदत्त इत्यादीति । यथान्यत्र विशेषणोपस्थितिर्विशिष्टज्ञानजनकेन्द्रियजन्यैवेति दृष्टमप्यप्रयोजकम् । अन्यथा देवदत्त इत्यादिनामयोजनायां नाम्नोऽपि(२) चक्षुषैवोपस्थितिर्विशिष्टधीप्रयोजिका स्यात् (३)तथा क्वचित्स्थिरं विशेषणं विशिष्टज्ञाने भासितमिति दृष्टमनुपयुक्तमित्यर्थः(३) ।

असमवायिकारणाधीनं विशेषमाह—द्वाभ्यामेकत्वाभ्यामिति । समवायिकारणाधीनं विशेषमाह(४)—द्वाभ्यां द्रव्याभ्यामिति । सत्त्वेऽनवस्थेति । तदपि द्वित्वादिकं स्वोत्पत्तिनियमे द्वित्वान्तरमपेक्षत एवं पूर्वपूर्वमपि तथेत्यनवस्था । पूर्वं द्वित्वादिनैव तद्व्यवहारोपपत्तावन्यत्र द्वित्वादौ मानाभावाद्वैयर्थ्यं चेत्यर्थः । विशेषोऽस्तीति । द्वित्वाद्युत्पत्तिनियामक इत्यर्थः ।

---

(१) प्रतीति—इति (क) (ख) पु० ।

(२) नाम्नापि—इति (क) पु० ।

(३)-(३) (क) पुस्तके नोपलभ्यते ।

(४) समवायिकारणं विशेषकमाह—इति (क) पु० । समवायिकारणे विशेषमाह—इति (ख) पु० ।

निमित्तकारणविशेषमाह(१)—बुद्धिविशेषाद्दिति । विषयविशेषामिति । अपेक्षाबुद्धौ नानैकत्वात्मकविषयकृतस्य विशेषस्याभावात् प्रत्यक्षत्वादिकं विशेषो वाच्यः स चाप्रयोजकः । अनुमानादिजा(२)पेक्षाबुद्धेरपि द्वित्वाद्युत्पत्तेरित्यर्थः । सैव हीति । समवाय्यसमवायिकारणयोरविशेषे तावत्येव द्रव्ये द्वित्वं त्रित्वं चोत्पद्येतेत्यर्थः । ननु चादृष्टविशेषादपि कार्यविशेषो भवत्येवेत्यत आह—अदृष्टविशेषेति । दृष्टमुपाधिं समवायिकारणादि(३)विशेषं पुरस्कृत्यादृष्टस्य विशेषकत्वात् । प्रकृते च न तत्संभव इति(४) तावत्येव समवायिनि द्वित्व(५)त्रित्वादिकं चो(६)त्पद्ये(७)तेत्यर्थः । द्वित्वाभिमानादिति । दोषविशेषजन्यो द्वित्वाभिमानोऽत्र विवक्षितः । न च सोऽत्रासिद्धः । द्वित्वाद्यभावप्रमायामपि द्वे रूपे इत्यादिनियतभ्रमजनकतया तत्कल्पनात् । द्वित्वाद्यभिमानमात्रस्य भ्रमरूपस्य रूपादिसाधारणत्वात् । रूपाद्यभावापेक्षयेति । तद्वति तस्यानुत्पादात् स्वप्रागभावो हेतुरिति ।

---

(१) निमित्तकारणं विशेषकमाह—इति (क) पु० । निमित्तकारणे विशेषमाह—इति (ख) पु० ।

(२) दिना—इति (ख) पु० ।

(३) आदि—इति नास्ति (क) (ख) पु० ।

(४) न चैतत् प्रकृते सम्भवतीति—इति (क) पु० ।

(५) नास्त्येव—इति (ख) पु० ।

(६) द्वित्वं—इति (क) (ख) पु० ।

(७) त्रित्वं चो—इति (क) पु० ।

तस्मात्कार्ये विशेष इत्यर्थः ।

ननु स्वप्रागभाववद्गन्धं प्रति रसादिप्रागभावानां रसं प्रति रूपस्पर्शप्रागभावयो रूपं प्रति स्पर्शप्रागभावस्य विनिगमनाभावेन हेतुत्वात् समानाश्रयकार्यं प्रति समानाश्रयप्रागभावत्वेन कारणतायां सर्वेषामविशेषाच्च कुतस्तत्कृतोऽपि नियमः । किं च प्रागभावेतरसकलहेतुसत्त्वे प्रागभावव्यतिरेकप्रयुक्तकार्यव्यतिरेकेण प्रागभावकारणताग्रहः । कार्यव्यतिरेकश्च पारिशेष्येण(१) प्रागभाव एवेति व्याघातः । प्रागभावाभाववति प्रागभावस्यासत्त्वात् प्रागभावेतरसकलकारणाभेदे प्रागभावाभेदस्यावश्यकत्वाच्च । न च रूपादिध्वंसकृतसामग्रीभेदः । पाकजगन्धादीनां प्रत्येकं प्रति गन्धादिध्वंसानां सर्वेषा(२)मविशेषात् ।

मैवम् । तुल्यरूपरसस्पर्शानामपि विलक्षणगन्धसत्त्वात् विलक्षणरसादीनामपि समानगन्धसत्त्वात्(३) गन्धादीनामन्यतमानुद्भवेऽप्यन्यतमोद्भवाच्च । प्रतियोगिविशेषाहितप्रागभावविशेषस्य कारणत्वे स्वप्रतियोगिककादाचित्काभावस्य ध्वंससाधारणस्य कारणताग्रहात् । अन्येषां प्रागभावानामन्यथासिद्धसन्निधित्वात् । प्रागभावेतरकारणाभेदे च यदि प्रागभावाभेदः स्यात् तदा वेमादीनां वेमादित्वेन सकलपटकारणत्वादेकपटसामग्र्या सर्वपटप्रागभावाभेदे तत्तत्सर्वपटोत्पत्तिप्रसङ्गः । द्वि-

(१) पारिशेष्यात्—इति (क) पु० ।

(२) सर्वेषाम्—इति नास्ति (क) पु० ।

(३) समानगन्धत्वात्—इति (क) पु० ।

त्वाद्युत्पत्तीति । तत्तत्प्रतियोगि(१)विशेषाहितप्रागभावविशेषाहितप्रागभावविशेषात् द्वित्वाद्युत्पत्तिनियमो विवक्षितः । न तु द्वित्वादिध्वंसात् । आद्यद्वित्वाद्युत्पत्तौ तदभावात् । ध्वंसप्रतियोगिद्वित्वादेरेवोत्पत्तौ नियामकाभावाच्च । न चैवं पाकजवदेकदैव सामग्रीसत्त्वात् द्वित्वादिसकलोत्पत्तिः स्यात् । यावति द्वित्वप्रागभावस्तावत्येव त्रित्वादिप्रागभावाभावात् ।

वस्तुतस्तु एकत्वापेक्षाबुद्ध्योरसमवायिनिमित्तकारणयोरविशेषेऽपि समवायिकारणभेदात् द्वित्वाद्युत्पत्तिनियमः । तद्भेदस्योभयसिद्धत्वात् । द्वित्वे भिन्नैकत्वधीर्जनिका त्रित्वादौ तु द्वित्वादिसहितैकत्वबुद्धिजनिकेति निमित्तकारणभेदाद्विशेष इत्यन्ये ।

ननूत्पादितद्वित्वा(२)पेक्षाबुद्ध्या द्वित्वान्तरं कुतो न जन्यते, न चोत्पन्नमेव समानाधिकरणं द्वित्वं प्रतिबन्धकम् पुरुषान्तरापेक्षाबुद्धेरपि तत एव प्रतिबन्धात् , द्वित्वान्तरानुत्पत्तिप्रसङ्गादित्याह—न तर्हीति । यत्पुरुषापेक्षाबुद्ध्या यद्द्वित्वं जनितं तेन यत्पुरुषापेक्षाबुद्धिजन्यमेव द्वित्वं प्रतिबध्यत इति नोक्तदोष इत्याह—तन्नियमेनैवेति । कन्दलीकारमतं(३) दूषयितुमुपन्यस्यति–अथवेत्यादि केचिदित्यन्तेन । शुद्धयेति । सैकैकयेत्यर्थः । बहुत्वमात्रमिति । तद्बहुत्वं च नानै-

(१) तत्प्रतियोगि—इति (क) पु० ।

(२) ननूत्पादितद्वित्वया—इति (क) पु० । त्पादितद्वित्वाश्रये — इति (ख) पु० ।

(३) कन्दलीकारमतं—इति नास्ति (क) पु० ।

कत्व(१)विषयापेक्षाबुद्धिजन्यं संख्यान्तरमेव द्वि(२)त्वादिविरोधि । त्रित्वादेर्नियतैकत्वापेक्षाधीजन्यत्वात् । कारणविरोधे कार्यविरोधस्यावश्यकत्वात् । त्रित्वाद्यनिश्चयेऽपि बहुत्वानिश्चयात् । घटत्वादिविशेषेति(३) । सेनावनादौ शतत्वादिसंख्याविशेषाग्रहे बहुत्वमात्रं शतत्वादि विना कृतमित्यत्र मते बहुत्वज्ञाने शतत्वादिसंशयः त्रित्वादौ बहुत्वव्यवहारश्च(४) न स्यात् बहुत्वस्य शतत्वादिविरहव्याप्यत्वात् । यथा घटत्वादिविशेषरहितमृत्तिकामात्रग्रहे घटत्वादिसंशयो(५) न भवति । तस्माद्द्वित्वातिरिक्तसङ्ख्यैव बहुत्वम् । सेनावनादौ तु शतत्वादिकमेव स्वप्रागभावसहितानियतैकत्वापेक्षाबुद्धेरुत्पद्यते । शतत्वादिजातिनिश्चयस्तु न भवति तद्व्यञ्जकनियतैकत्वापेक्षाबुद्धेरभावात् । बहुत्वनिश्चये शतत्वादिसंशयश्च द्वित्वातिरिक्तसंख्यात्वनिश्चयेऽपि तद्विशेषसंशयादित्यर्थः । अङ्गान्तरेति । (६)अङ्गं सेनाङ्गं हस्त्यश्वादि(६) । बहुत्वत्वस्य संख्यात्वव्याप्यजातित्वे स्वसमानजातीयनिरूपितप्रकर्षसामानाधिकरण्यं न स्यादित्यर्थः । तस्मादिति । वस्तुस्थितप्रागभा-

(१) चानियतैकत्व—इति (क) (ख) पु० ।
(२) त्रि—इति (क) पु० ।
(३) घटादिविशेषेति—इति (क) पु० । घटत्वादीति—इति (ख) पु० ।
(४) व्यवहारोऽपि—इति (ख) पु० ।
(५) विशेषग्रहो—इति (क) पु० ।
(६)-(६) नास्ति (क) पु० ।

वसहितैकत्वापेक्षाबुद्ध्या जनितं शतं(१) द्वित्वभिन्नसंख्यात्वेन ज्ञायते न शतत्वादिरूपेणेत्यर्थः । (२)तदप्रतीतिरिति । शतत्वादिजात्यप्रतीतिः(२) । स्वाभावपूर्वकत्वादिति । न च प्रागभावस्याकारणत्वम् । उत्पन्नस्य पुनरुत्पत्तिप्रसङ्गात् । न च प्रतियोग्येव प्रतिबन्धकः । कारणीभूताभावप्रतियोगिनः प्रतिबन्धकतया प्रागभावकारणत्व एव पर्यवसानात् । शतं पिपीलिकानामिति । समवायिकारणाभावेन तत्र संख्याया अनुत्पत्तेरित्यर्थः । तेनासमवायिकारणाभावेऽपीति सोपहासमुक्तम् । अतथाभूतान्येवेति । अविद्यमानान्येवैकत्वानीत्यर्थः । विशेषणेति(३) । यथार्थविशिष्टप्रत्यक्षमभिप्रेत्यैतदुक्तम् । विशिष्टप्रत्यक्षसामान्ये(४) विशेष्यसंनिकर्षो विशेषणज्ञानं तयोरसंसर्गाग्रह इत्येतावन्मात्रस्य कारणत्वात् । तथा सतीति । विशिष्टज्ञाने वर्तमाना व्यावृत्तिर्विशेष्ये भासते विशेषणं च स्वसमानकालीनव्यावृत्तधीजनकमतो नातीतस्य तस्य व्यावृत्ति(५) धीजनकत्वमित्यर्थः । ते विशेषणविशेष्यबुद्धी इत्यर्थः । विशेष-

(१) बुद्ध्या जनितशतत्वादिकं—इति (क) पु० । बुद्धिजन्यं शतं—इति (ख) पु० ।
(२)-(२) नास्ति (क) (ख) पु० ।
(३) विशेषेणेति—इति (क) पु० ।
(४) च—इत्यधिकं (ख) पु० ।
(५) व्यावृत्त—इति (क) पु० ।

णस्यासतोऽपि धियः(१) कारणत्वं स्यादित्यन्यथा व्याचष्टे—ताद्विशेषणामिति। लिङ्गलिङ्गिनोर्भेद एव गम्यगमकभाव इत्यन्यथा व्याचष्टे—अभेदेनेति। व्यावृत्तिसामानाधिकरण्येनेत्यर्थः। न हीति। न हि शब्दो वीणा न वा(२) नष्टेन शब्देन शब्दवती वीणेति सामानाधिकरण्यम्। तथा न बुद्धिः पुरुषो न वा नष्टायां बुद्धौ बुध्यते पुरुष इति सामानाधिकरण्यमित्यर्थः। बुध्यत इत्यत्र(३) कर्तरि लकाराद्बुद्धिमानुच्यते। गुणज्ञानमिति। द्वित्वत्वविशिष्टद्वित्वगुणज्ञानमित्यर्थः। गुणबुद्धिसमानकालमित्यत्र गुणो द्वित्वम्। गुणनाशादिति। द्वित्व(४)नाशादित्यर्थः। द्रव्यज्ञानमिति(५)। द्वे द्रव्ये इति द्रव्यज्ञानानुत्पत्तिरित्यर्थः। तत इति। संस्कारादित्यर्थः। तस्या इति। द्वित्वत्वसामान्यधीकाले अपेक्षाबुद्धिनाशादित्यर्थः। विशेष्यज्ञानमिति। एकत्वगुणविशिष्टद्रव्यज्ञानमित्यर्थः। विशिष्टस्यैवेति। एकत्वगुणविशिष्टद्रव्य(६)स्यैवेत्यर्थः। विशिष्टज्ञानेति। द्वे द्रव्ये इति विशिष्टज्ञानानुत्पत्तिप्रसङ्ग(७)

(१) धियः—इति नास्ति (क) (ख) पु०।

(२) न वा इति नास्ति (क) (ख) पु०।

(३) इत्यनेन—इति (क) (ख) पु०।

(४) गुण—इत्याधिकम् (ख) पु०।

(५) प्रत्यभिज्ञानेति—इति (ख) पु०।

(६) गुण—इत्यधिकम् (ख) पु०।

(७) प्रसङ्ग इति नास्ति (क) (ख) पु०।

श्चेत्यर्थः। द्वित्वोत्पत्तिरिति(१)।(२)

यद्यप्ये(३)कत्वगुणविशिष्टद्रव्यज्ञानस्या(४)पेक्षाबुद्धित्वे नैतद्दोषावकाशः(५)। (६)तथाप्येकत्वगुणज्ञानम् अपेक्षाबुद्धिं विपक्षित्वा एतदुक्तम्। (६) न च तस्या अपि(७) संस्कारजनकत्वम्। विशिष्टज्ञानमात्रस्य संस्काराजनकत्वात्(८)।

द्वे द्रव्ये इति ज्ञानान्यथानुपपत्त्या द्वित्वत्वसामान्यधीसामग्र्या एवापेक्षाबुद्धिनाशे प्रतिबन्धकत्वकल्पनाद्वेत्याहुः।(९) प्रत्यक्षपरतया व्याचष्टे-यदेतदिति। तत्रान्यथासिद्धिं निराकरोति-न चेति। न चानेकदेशव्यापकसंयोगवदवयविविषयत्वेनार्थान्तरम्। अवयवसंयोगाग्रहेऽपि त्वचापरिमित मित्यनुभवात्। अत्र(१०)द्व्यणुकं चाक्षुषधीनिमित्तगुणाभाववत् सालोके(११)न्द्रि-

(१) द्वित्वादीति—इति (क) पु०।

(२) एतत्तु एकत्वगुणज्ञानमपेक्षाबुद्धिरित्यभ्युपेत्य परिहृतम्। इत्यधिकम् (क) पु०।

(३) यद्यपि—इति नास्ति (क) पु०।

(४) एव—इत्यधिकम—(क) पु०।

(५) दोषावसरः—इति (क) पु०।

(६)-(६) नास्ति (क) पु०।

(७) अस्यापि इति (ख) पु०।

(८) तथात्वेऽपि वा—इत्याधिकम् (क) पु०।

(९) प्रतिबन्धककल्पनाद्वेत्यर्थः—इति (क) पु०।

(१०) तत्र—इति (क) पु०

(११) आलोक—इति (ख) पु०।

यसंनिकृष्टत्वे सति अचाक्षुषद्रव्यत्वात् पवनवदित्यनुमानं प्रयोजकम्। अनेकद्रव्यवत्त्वाभावेनाचाक्षुषत्वोपपत्तेः। ननु परिमितमित्यनुगतव्यवहारात् परिमाणं जातिः स्यादित्यत आह—नैतदिति। अतिशयस्य क्रियागुणमात्रवृत्तितया जातावसत्त्वादित्यर्थः। (१)परिमाणस्य जातित्वे(१) द्रव्यत्वेन सहान्यूनानतिरिक्तव्यक्तिवृत्तित्वं महत्त्वस्यापि जाति[२]त्वे पृथिवीत्वादिना परापरभावानुपपत्तेश्चेति(३) द्रष्टव्यम्।

व्यवहारशब्दस्य शब्दपरत्वे विपक्षे बाधकमाह-यदि चेति। घटशब्दादिति।

ननु घटशब्दात्परिमाणसंशयो न भवत्येव। घटस्य द्रव्यत्वेन परिमाणवत्त्वनियमात्। परिमाणविशेषसंशयश्च(४) घटविशेषसंशयवदिष्यत एवेति(५)।

मैवम्। व्याप्तिबलेन घटशब्दात् घटनिश्चयोत्तरं द्रव्यत्वेन परिमाणवत्त्व(६)निश्चयात्। घटपरिमाणयोरभेदे घटशब्दादेव तन्निश्चयापत्तेः(७)। न(८) च घटपदात् परिमाणनिश्चयो भ-

(१)-(१) नास्ति (क) पु०। परिमाणस्य जातित्वेन यावद्द्रव्यवृत्तित्वे—इति (ख) पु०।

(२) रूप-इत्यधिकम् (ख) पु०। (३) इत्यपि—इति (ख) पु०।

(४) च—इति नास्ति (ख०) पु०।

(५) इति—इति नास्ति (ख) पु०।

(६) वत्त्व—इति नास्ति (क) (ख) पु०।

(७) उपपत्तिः—इति (ख) पु०।

(८) (क) पुस्तके नास्ति।

वत्येवेति वाच्यम्। तयोरभेदे परिमाणपदादपि घटनिश्चयापत्तेः। घटस्य परिमाणमिति भेदानुभवाच्च।

ननु हस्तवितस्त्यादिव्यवहारः प्रत्येकसमुदायविकल्पान्न युक्त इत्यत आह—मानव्यवहारेति। अनेन परिमाणत्वं जातिः सामान्यलक्षणमुक्तम्। न च महत्त्वेनैव परिमाणव्यवहारोपपत्तेर्जात्यभावः। महत्त्वं साक्षात्कारविरोधिजातिसमानाधिकरणगुणत्वसाक्षाद्व्याप्यजातिमत् साक्षात्कारप्रयोजकमूर्तगुणत्वात् रूपवदित्यणुत्वपरिमाणत्वजातिसिद्धेः। न च रूपत्वमत्रोपाधिः। तुल्ययोगक्षेमत्वात्। न च परिमाणत्वस्य लक्षणत्वे रूपादीनामपरसामान्यसम्बन्धात् रूपादिसंज्ञा भवन्तीत्यनेन पौनरुक्त्यम्। प्रकारान्तरेण परिमाणत्वस्याभिधानात्। ननु प्रकारचतुष्टयं प्रतिज्ञाय प्रकारिणां तदभिधानं विरुद्धमित्यत आह—भावेति। सुप्रसिद्धत्वात् प्रत्यक्षत्वादित्यर्थः। ननु नित्यमहत्त्वमेव परममहत्त्वमिति पौनरुक्त्यमित्यत आह—तदेवेति। काष्ठाप्राप्तत्वादिति। सजातीयप्रतियोगिकापकर्षानाश्रयत्वं परमत्वम्। अत एवाणुत्वेऽपि परमत्वमित्यर्थः। अणुत्वे द्विविधे आकरे नाभिहिते इत्यत आह—अपिनेति। [१]तृणोलपेति। उलपो बाणतृणम्। पौनरुक्त्यनिराकरणार्थमाह—उच्यत इति[२]। प्रकर्षभावाभावावेकत्र विरुद्धाविति तयोराश्रयभेदमाह—आमलक इति। उभाभ्यामिति। गौणमुख्य-

(१) नास्ति (क) पु०।

(२) इतीति—इति (क) पु०।

व्यवहारविषयाभ्यां भज्यते सम्बध्यत इत्यर्थः । उभयत्रापि तस्य वृत्तेः । द्रव्यत्वेनेति ।

ननु महत्त्वमत्रोपाधिः । अथ महत्त्वं यदि परिमाणत्वं तदासाधनव्यापकत्वम् । अथ परिमाणविशेषस्तदा साध्याव्यापकत्वं तेन विनापि परिमाणसामान्यसत्त्वात् । तन्न । महत्त्वविरुद्धाणुत्वासिद्धौ महत्त्वमेव परिमाणं प्रत्यक्षताप्रयोजकमिति तस्य साधनव्यापकत्वे परमाणौ महत्त्वापत्तेः । महत्त्वाभिन्नदीर्घत्वपरिमाणसिद्धावप्यणुत्वासिद्धेः(१) । नापि द्व्यणुकोपादानम् । महत्त्ववृत्तिगुणत्वव्याप्यजातिमत् गुणवत् द्रव्यत्वात् । न च महत्त्वमेव तथा परमाणोरपि प्रत्यक्षतापत्तेरिति (२)महत्त्वाणुत्वसाधारणपरिमाणत्वजातिः सिध्यतीति(२) मानम् । महत्त्वस्योपाधित्वात् ।

मैवम् । द्रव्यत्वस्य सर्वपरिमितवृत्त्यपरिमितावृत्तिजातित्वानुपपत्तेर्विपक्षे बाधकाद्धेतोः साध्यव्याप्यतयोपाधेस्तदव्यापकतया साध्याव्यापकत्वात् ।

यद्वा । महत्परिमाणं महापरिमाणासमानाधिकरणगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत् मूर्तगुणत्वात् रूपवदिति(३) परिमाणत्वजातिसिद्धिः । द्व्यणुकपरिमाणं परिमाणत्वव्याप्यजातिमत् परिमाणत्वात् महत्त्ववदि(४)त्यणुत्वजातिसिद्धिः(४) । न चा-

(१) वा—इत्यधिकम् (क) (ख) पु० ।

(२)-(२) नास्ति (क) (ख) पु० ।

(३) (क) पुस्तके नास्ति । (४)-(४) (क) पुस्तके नास्ति ।

भावस्येति । अपकर्षस्य जातिरूपत्वेनाभावावृत्तेरित्यर्थः । न चापकर्षोऽसिद्धः(१) । अणुत्ववृत्तिसामान्यं सजातीयोत्कृष्टापकृष्टवृत्ति परिमाणत्वव्याप्यजातित्वात् महत्त्ववत् । न च महत्त्वाभावेनान्यथासिद्धिः । तावन्मात्रस्य द्व्यणुकपरिमाणसाधारणतया अणुतरव्यवहारानापत्तेः ।

कारणाभावादिति । अवयववृत्तिबहुत्वमहत्त्वप्रकर्षा(२)भावादित्यर्थः । ननु अन्यत्र भाक्तव्यवहारे गौण[३]मुख्यवृत्तित्वं धर्मविशेषस्य ज्ञातम् अत्र तु महत्त्वप्रकर्षाभावस्य न परमाण्वादिवृत्तित्वं प्रतीयते तत्कुतो भाक्तत्वमतो महत्त्वप्रकर्षाभाव एवाणुपदवाच्योऽस्त्वित्यत आह—एतेनेति । प्रत्यक्षासिद्धत्वादिति । आमलकादाविति शेषः । परमाणौ च महत्त्वानाधारे महत्त्वप्रकर्षाभावोऽनुमेय इति भावः । तथापि महत्त्वप्रकर्षाभावस्याणुपदवाच्यत्वे किं बाधकमित्यत्राह—अन्यायश्चेति । अणुत्वपरिमाणे शक्तावन्यत्र वृत्त्यन्तरेणापि प्रयोगोपपत्तौ नोभयत्रापि शक्तिकल्पनमित्यर्थः । तथाप्यनुपपत्तिं विना तुल्यवदुभयत्रापि[४] प्रयोगात् कथं भाक्तनिर्णयो[५] न चैकत्र शक्तिग्राहकमस्ति[६] ।

(१) अपकर्षासिद्धिः—इति (ख) पु० ।

(२) प्रचया—इति (क) (ख) पु० ।

(३) गौण—इति नास्ति (क) पु० । गुण—इति (ख) पु० ।

(४) अपि—इति नास्ति (क) (ख) पु० ।

(५) भाक्तत्वमुख्यत्वानिर्णयो—इति (क) (ख) पु० ।

(६) विनिगमकम्—इति (ख) पु० ।

अत्राहुः। अणुत्वजातेरखण्डतया सैवाणुपदवाच्या। प्रकर्षाभावस्य तु प्रतियोगिनिरूप्यतया(१) सखण्डत्वेन गुरुत्वात्। स्वर्गादिपदवदिति। यथा स्वर्गपदस्य यद्यपि यन्न दुःखेनेत्याद्यर्थ(२)वादोपस्थिते सुखपदा(३)र्थे ऐहिकसातिशये सुखे(४) चन्दनादौ च तुल्यवत्प्रयोगस्तथापि दुःखासंभिन्नत्वाद्युपलक्षितसुखस(५)जातीये स्वर्गपदस्य शक्तिरैहिकसुखे च सातिशयत्वोपाधिना शक्यैकदेशे स्वर्गपदप्रयोगः। चन्दनादौ च तादृशसुखसाधनतोपाधिकः। उभयत्र शक्तौ नानार्थतया गौरवादित्यर्थः। तथा दीर्घत्वमपीति। दीर्घत्वं सजातीयावधित्वानाश्रयव्यक्तिवृत्ति परिमाणत्वव्याप्यजातिमत्त्वा(६)त् महत्त्ववत्। एवं ह्रस्वत्वमपि पक्षीकृत्यानुमेयम्। दीर्घत्वोपपत्ताविति। यथा दीर्घत्वे सत्यपि ह्रस्वत्वसत्त्वे विरोधाभावस्तथा परमाणुपरममहद्द्रव्ययोरन्यतरपरिहारेणैव दीर्घत्वह्रस्वत्वयोः स्थितेर्न तयोः समावेशः। स हीति।(७)दीर्घत्वप्रकर्षभावापेक्षो ह्रस्वत्वव्यवहार(७) इत्यर्थः।

---

(१) निरूप्यत्वात्—इति (ख) पु०।
(२) आदि—इति नास्ति (ख) पु०।
(३) सुख—इति (क) (ख) पु०।
(४) ऐहिकातिशयसुखे—इति (क) पु०।
(५) स—इति नास्ति (क) (ख) पु०।
(६) जातित्वात् इति (क) (ख) पु.
(७)-(७) दीर्घापेक्षो ह्रस्वत्वव्यवहार—इति (क) पु०।

अस्मदादीनामिति। द्व्यणुकेष्वानुमानिकापेक्षाबुद्धिसंभवेऽप्यस्मदादीनां सर्गादौ तदभावादित्यर्थः। नन्वीरापेक्षाबुद्धेर्द्व्यणुकैकत्ववत् (१) द्रव्यान्तरैकत्वानामपि विषयत्वात् कथं नियमेन संख्याविशेषोत्पत्तिरित्यत आह—ईश्वरबुद्धेरिति। तत्तदेकत्वविषयतावच्छेदेन तस्या अपेक्षाबुद्धित्वादित्यर्थः(२)। संयोगोत्पत्तीति। त्र्यणुकारम्भकसंयोगोत्पत्तिसमानकालीन(३)त्वादित्यर्थः। संख्योत्पत्तेर्महत्त्वजनकत्रित्वसंख्योत्पत्तेरित्यर्थः। कार्यभेदो महत्वदीर्घत्वरूपः। अत्रेति। बहुत्वस्य महत्त्वारम्भकत्व इत्यर्थः। व्यभिचारं स्पष्टमति—रूपस्येति। प्रकर्षाप्रकर्षाननुविधानं विवृणोति—स्पर्शस्येति। परत्वापरत्वे चेति। परत्वापरत्वयोर्दिगादिपिण्डसंयोगासमवायिकारणकत्वात् तस्य च परिमाणोत्तरकालभावित्वादित्यर्थः।

नन्ववयवपरत्वापरत्वाभ्यामवयविनि परिमाणं जन्यताम्। न चासमवायिकारणोत्कर्षेण कार्योत्कर्षाद्यत्रानेकपुरुषापेक्षाबुद्धिभिरनेकानि परत्वान्युत्पादितानि तत्र कार्ये परिमाणोत्कर्षः स्यात्(४)। तत्रापि यत्रानेकपुरुषापेक्षाबुद्धिजन्यान्यनेकानि त्रित्वानि सन्ति(५) तत्र परिमाणोत्कर्षापत्तेः। व्यक्तिबाहुल्य-

---

(१) अणुकजनकैकत्ववत्—इति (ख) पु०।
(२) बुद्धित्वमित्यर्थः—इति (क) (ख) पु०।
(३) काल—इति (क) (ख) पु०।
(४) स्यात्—इति नास्ति (क) पु०।
(५) सन्ति—इति नास्ति (क) (ख) पु०।

लक्षणसमवायिकारणोत्कर्षः कार्योत्कर्षप्र(१)योजक इति तुल्यम्।

मैवम् । परिमाणस्य स्वाश्रयोत्पत्त्यव्यवहितोत्तरक्षणोत्पत्तिकत्वात् परत्वादेश्चापेक्षाधीविलम्बात्तदनन्तरभावित्वात् । पृथक्त्वं चावधिज्ञानोपस्थाप्यतया संख्यापेक्षया विलम्बो(२)पस्थितिकमिति न परिमाणजनकम् । तथा वेग इति(३) । परिमाणोत्तरकालमुत्पद्यते इत्यनुषज्यते । कर्मजन्य इति शेषः । वेगासमवायिकारणस्य वेगस्य वा सार्वत्रिकत्वादिति भावः । बुद्ध्यादीनामिति । आत्मवृत्तिबुद्ध्यादीनां घटादिनाऽप्रत्यासत्तेरित्यर्थः । त्रितयमिति । संख्या परिमाणं प्रचयश्चेत्यर्थः । तत्र द्व्यणुक इति । स्वाभिमुखभूयोऽवयवासंयोगित्वे सति तत्संयोगात्मकः प्रचयो न द्व्यणुक इत्यर्थः । द्विबहुभिरित्यत्र मिलितस्याकारण(४)त्वादन्यथा व्याचष्टे—द्वौ (५)बहवश्चेति । द्वाभ्यामारब्धेऽर्थे(६) कारणमहत्त्वबहुत्वाभावादेकशेषमाह—कारणमहत्त्वे चेति । गुणकर्मेति । स्वाजनकभावभूतकारणापेक्ष्य इत्यर्थः । सामग्रीतः सर्वसंभवात् द्रव्यारम्भेऽपि संयोगस्यापेक्षणात(७) । अभेद इति ।

(१) र्षाप्र—इति (ख) पु० ।
(२) विलम्बितो—इति (क) (ख) पु० ।
(३) वेगोऽपि—इति (क) (ख) पु० ।
(४) अकरण—इति (ख) पु०।
(५) द्वौ च—इति (ख) पु० ।
(६) अर्थे—इति नास्ति (क) (ख) पु० ।
(७) संयोगस्य सापेक्षत्वात—इति (क) (ख) पु० ।

ननु निर्धारणं महत्त्वविशेषविषयकमवयव(१)संस्थानविशेषविषयं वा स्यात् । अन्यथा महत्सु चतुरस्रं वर्तुलं मण्डलं (२)चानयेति व्यवहारात् परिमाणान्तरमपि स्यात् ।

अत्राहुः । महत्त्वदीर्घत्वयोरभेदे इदमस्मान्न महत् किन्तु दीर्घमिति प्रतीतेर्महत्तरेषु दीर्घतरमानीयतामिति प्रतीतेश्चानुपपत्त्या महत्त्वातिरिक्तं परिमाणान्तरमेव दीर्घत्वम् । वर्तुलत्वादीनां(३) च महत्त्वविशेषत्वेन परिमाणान्तरत्वे गौरवम् । आरोहपरिणाहौ चेति । न च संस्थानवृत्तिजातिविशेषावेव तौ । अन्यतरकर्मजत्वादिना परापरभावानुपपत्तेः। गुणवृत्तिजातौ तद्दोषत्वस्य निर्बीजत्वात् । सुविहितमिति सोपहासम् । योगिनामिति । योगिनो ह्रस्वत्वाणुत्वयोर्भेदं जानन्तीत्यत्र मानमाहुः । अणुपरिमाणं समानाधिकरणपरिमाणभिन्नं परिमाणत्वात् महत्त्ववत् । अस्माकं त्विति ।

ननु ह्रस्वत्वस्य परिमाणान्तरस्यासिद्धावणु(४)व्यवहारः परं भक्तिः । (५)ह्रस्वव्यवहारश्च दीर्घाभावनिबन्धनो मुख्य एवेति भाक्तत्वे तस्य मानाभावः(५) । न च भाक्तत्वे त(६)

(१) अवयव—इति नास्ति (क) पु० ।
(२) परिमण्डलं—इति (क) पु० ।
(३) वर्तुलादीनां—इति (ख) पु० ।
(४) अणुत्व—इति (ख) पु० ।
(५)-(५) ह्रस्वत्वव्यवहारोऽपि दीर्घत्वाभावनिबन्धनो मुख्य एव । न तद्भाक्तत्वे मानम्—इति (क) पु० ।
(६) तत्— नास्ति (ख) पु० ।

त्पौनरुक्त्यम् । महत्त्वाणुत्वह्रस्वत्वव्यवहारयोर्महत्त्वदीर्घत्वप्रकर्षाभावनिबन्धनत्वात् ।

अत्राहुः(१) । नुक्तानुमानेन(२)ह्रस्वत्वासिद्धौ लाघवाच्चत्र ह्रस्वपदशक्तिग्रहे दीर्घत्वाभावे तद्व्यवहारो(३) भाक्तोऽन्यथा मुख्यत्वाभावे भाक्त एव न स्यात् । विनाश इति । एकस्मिन्नेव द्रव्ये पूर्वपरिमाणनाशे परिमाणान्तरोपत्तौ च कारणाभावादित्यर्थः । ननु शरीरारम्भकातिरिक्तद्रव्ये संख्यादयः परिमाणकारणानि स्युरित्यत आह—कारणेति । समवायिकारणवृत्तिसंख्यादीनामेवेत्यर्थः । नन्ववस्थितपूर्वद्रव्यावयवसहिततत्संयुक्तद्रव्याभ्यां द्रव्यान्तरोत्पत्तिसहकारिवशात् पूर्वपरिमाणनाशपरिमाणान्तरोत्पत्ती स्यातामित्यत आह—तत्संयोगिद्रव्यैरिति । सति पूर्वद्रव्य इति । पूर्वद्रव्यनाशे चाश्रयनाशादेव परिमाणं नश्येत् । आरम्भेऽपि(४) द्रव्यान्तरे परिमाणान्तरोत्पत्ति(५)र्न तु पूर्वद्रव्य इति भावः । तैः संख्यादिभिरित्यर्थः । असमवायीति । समवायिकारणप्रत्यासन्नस्यैवासमवायिकरणत्वात् । अनारम्भकद्रव्यान्तरसंख्यादीनामतथात्वादित्यर्थः । ज्ञानमिति । अपोद्धारपदेन भावव्युत्पत्त्या ज्ञानमुच्यते

---

(१) मैवम्—इति (क) पु० ।

(२) नास्ति (क) पु० ।

(३) अन्यत्र दीर्घत्वाभावेनेतरव्यवहारो—इति (क) पु० ।

(४) अपि—इति नास्ति (ख) पु० ।

(५) परिमाणोत्पत्ति—इति (ख) पु० ।

करणव्युत्पत्त्या च ज्ञानकारणं(१) (२)शब्द नुच्यत(२) इत्यर्थः । अस्यैव व्यवहारत्वादभेदे षष्ठ्यर्थानुपपत्तेः षष्ठीसमासानुपपत्तेराह—स चासाविति ।

प्रमाणलक्षणे इति । एतस्मादिदं पृथगिति प्रत्यक्षं त्रयोविंशतिगुणाविषयकं मानं जातिविशेषश्च लक्षणमित्यर्थः । तर्कस्त्विति । यदि पृथक्त्वं घटादिभिन्नं न स्यात्पृथगानयेत्युक्ते घटं पटं चेति संशयो न स्यादिति तर्कः प्रत्यक्षानुग्राहकः पृथक्त्वस्य गुणत्वे नास्तीत्यर्थः । इतरेतराभावेनैवेति (३) । घटातिरिक्तान्योन्याभावेनोक्ततर्कस्योपपत्तेर्गुणाग्राहकत्वादित्यर्थः । प्रत्यक्षमन्योन्याभावविषयत्वेनान्यथासिद्धे न मानम् । न च तथा सति विधिमुखः प्रत्ययो न स्यात् । न हि नञोऽप्रयोग इत्येव विधिः किं त्वन्योन्याभावविशिष्टे पृथक्शब्दस्य शक्तिरिति शक्यार्थे पदप्रयोगत एव गुणादावपि पृथक्शब्दप्रयोग इति भावः । सिद्धान्तमाह—पृथगादिशब्दा इति । पर्यायत्वमर्थैक्यात्तस्चैकार्थः पृथक्त्वगुण एवेत्यर्थः । संबन्धानुपपत्तिमेवाह—न हीति । प्रातिपदिकार्थमात्र एवेति । तथा च(४) घटात्पटः पृथगित्यत्र(५) घटः पटो न भवतीत्यर्थ इति न पञ्चमीसम्बन्धानुप-

---

(१) करणम्—इति (ख) पु० ।

(२) नास्ति (क) पु० ।

(३) ०भावेनैव तर्कस्य—इति (क) पु० । भावेनैवोक्ततर्कस्य—इति (ख) पु० ।

(४) तथा च—इति नास्ति (ख) पु० ।

(५) इत्यस्य—इति (ख) पु० ।

पत्तिरित्यर्थः। अन्यारादिति। अन्यपर्याययोगे पञ्चम्यनुशासनात् घटात्पटोऽन्य इत्यत्रेव घटः पटो नेत्यत्रापि पञ्चमी स्यादित्यर्थः।

नन्वन्यशब्दार्थ एव क्वचित्प्रतियोगिना निरूप्यते क्वचिदवधिना। यत्रावधिना स निरूप्यते तत्र पञ्चमी शब्दशक्तिवैचित्र्यात् यथा ग्रामादागत इत्यत्रागमनम् अवधिना निरूप्यमिति पञ्चमी। ग्रामस्यागमनभागयमित्यत्र तदेव सम्बन्धिनिरूप्यमिति न तत्र पञ्चमी। मैवम्। शब्दशक्तिवैचित्र्यासिद्धेः। दृष्टान्ते नावधौ पञ्चमी किन्त्वपादाने। यदाऽपादानमेव सम्बन्धत्वेन विवक्ष्यते तदा षष्ठीत्यविरोधात्। न च तत्पदप्रयोगेऽनभिधानात्पञ्चम्यभावः। अन्योन्याभावपदप्रयोगेऽपि पञ्चम्यभावात्। न च सोऽप्यनभिधानप्रयोजकः। इतरेतराभाववान् घट(१) इत्यत्रापि पञ्चम्यप्रयोगात्। न च तत्राप्यनभिधानमेव। तथा सति तत्तत्पदानामनभिधानप्रयोजकत्वे गौरवाद्व्यभिचाराच्च। नञर्थवाचकपदप्रयोग एव प्रयोजको लाघवात् अनुगतत्वाच्चेति। तथा च(२) तदर्थवाचकत्वे (३)पृथगादिशब्दानां तत्तत्पदप्रयोगेऽपि पञ्चम्यभावापत्तेः (३)। नञर्थेति। अन्योन्याभाववद्वाचकपदप्रयोगे पञ्चम्यनुशासनात्। अन्योन्याभाववाचकपदप्रयोगे न प-

(१) इतरेतराभावाभाववान् पट—इति (क) पु०।
(२) तथा सति—इति (ख) पु०।
(३) पृथगादिशब्दानां प्रयोगे पञ्चमी न स्यात्—इति (क) पु०। तत्पद—इति नास्ति (ख) पु०।

ञ्चमीत्याशयः(१)। (२)अपटो घट इति(२)। अपट इति समासेनान्योन्याभाववतोऽभिधानात्पञ्चमी स्यादित्यर्थः। (३)वस्तुतस्तु घटःपटो न भवतीत्यत्रापि समानाधिकरणप्रतीतेर्नञ्शब्दस्याभाववद्वाचकत्वाच्च नञर्थवैशिष्ट्यसत्त्वेन पञ्चमी स्यादित्यर्थः।

एतेन भेद एव पृथक्त्वमित्यपास्तम्। घटः पटो नेत्यत्र पञ्चमीप्रसङ्गात्। किञ्चेदमस्मात्पृथगिति धीविषयोऽवधिना निरूप्यः पृथक्त्वम्। न चान्योन्याभाव एव। इदमिदं न भवतीति प्रतीत्यापत्तेः। न च पञ्चम्यन्तपदाभिलप्यमानं प्रतियोगित्वमेवावधित्वम्।

पञ्चमीप्रयोगस्यावधिज्ञानोत्तरकालीनत्वात्। पञ्चम्यज्ञानेऽपि पृथक्त्वप्रतीतेः(४)। अन्यथा घटात्पटो नेत्यपि प्रतीतिः स्यात्। नन्ववधित्वं न पृथक्त्वनिरूपकत्वम् अन्योन्याश्रयात्। नापि वस्तुगत्या योऽवधिस्तन्निरूप्यं पृथक्त्वम्। पृथक्त्वनिरूपणात्प्रक् तत्रावधित्वाभावात्।

अत एव पृथक्त्वात्यन्ताभाववत्त्वमवधित्वमित्यपास्तम्। अवधौ ज्ञाते पृथक्त्वज्ञानं तज्ज्ञाने तदत्यन्ताभाववत्त्वज्ञान(५)मित्यन्योन्याश्रयात्।

(१) न पञ्चमीत्यर्थः—इति (क) (ख) पु०।
(२)-(२) नास्ति (ख) पु०।
(३) एतत्पदप्रयोगेऽपि पञ्चम्यभावापत्तेः। इत्यधिकम्-(क) पु०।
(४) च—इत्यधिकं (क) (ख) पु०।
(५) ज्ञानम्—इति नास्ति (क) (ख) पु०।

अत्राहुः । पृथक्त्वनिरूपकत्वज्ञानं न पृथक्त्वज्ञानकारणम् अपि तु यत्रैतद्वर्त्तते तज्ज्ञानम् अन्यथा प्रतियोगिज्ञानेऽप्यन्योन्याश्रयापत्तेः ।

यद्वा । पृथक्त्वसामान्यज्ञानपूर्वकं पृथक्त्वविशेषज्ञानमिति नान्योन्याश्रयः ।

ननु घटात्पटः पृथगित्यत्र पञ्चमी निषेधवाचिका तत्रैवोपपदविभक्त्यनुशासनात् । तथा चापटो घट इत्यत्र नञैव निषेधस्योक्तत्वात् किमभिधातुं पञ्चमी स्यादित्याशङ्क्य निराकरोति—न चेति । तथा सति घटात्पट इत्यस्यैव न घटः पट इत्यर्थे पृथक्पदप्रयोगे पौनरुक्त्यं स्यादित्यर्थः । ननु घटात्पटः पृथगित्यत्र विशिष्टो व्यावृत्तविशेषणसम्बन्धात्मकः पृथक्शब्दार्थ इत्याह—पृथक्शब्दस्येति । यदि विशिष्टं पृथक् तदापूर्वं यच्छब्दविशिष्टं व्योम तदेव पश्चात्तच्छब्दाविशिष्टं तत एव पृथक् स्यादित्येवं बुद्ध्याद्यविशिष्टादात्मादेस्तद्बुद्ध्यादिविशिष्टः स एव ततः पृथक् स्यादित्याह—शब्देति । वैधर्म्यं यदि तन्निष्ठात्यन्ताभावप्रतियोगिधर्मवत्त्वं तदा तन्नावधिनिरूप्यमित्यसमानकालीन(१)धर्मवत्त्वं वाच्यं तत्राह—श्यामाद्रक्त इति । वैधर्म्यस्य सातिशयत्वात् पृथक्त्वस्य च निरतिशयत्वादित्यपि द्रष्टव्यम् । जातिसंकरेति । घटावधिकपृथक्त्वस्य घटावृत्तित्वात् पटावधिकपृथक्त्वस्य पटावृत्तित्वात् तदुभयं मिथोऽत्यन्ताभाव-

(१) कालीन—इति नास्ति (क) (ख) पु० ।

समानाधिकरणमन्यत्र लोष्टादौ संकीर्येतेत्यर्थः । न च पृथक्त्वं सामान्यमेकमेव(१) । द्रव्यत्वेन सत्तया सहान्यूनानातिरिक्तव्यक्तिवृत्तित्वापत्तेः । व्यभिचाराच्चेति । द्रव्यमात्रे रूपादीनामवृत्तेरित्यर्थः । एवं चेति । परिशेषात् गुणत्वे सतीत्यर्थः । भेदश्चेति । भेदात्मकसादृश्यात् अद्रव्येषु पृथक्त्वारोपात् पृथक्त्वव्यवहार इत्यर्थः । समान्यलक्षणापत्तेरिति । अनित्यद्रव्यवृत्ति(२)पृथक्त्वस्य नित्यद्रव्यवृत्तिनित्यपृथक्त्वैनैक्यात् नित्यतया सामान्यलक्षणयोगात्पृथक्त्वं सामान्यं स्यादित्यर्थः । लोष्टात् घटपटौ द्वौ पृथगित्यनुभवात् द्विपृथक्त्वं(३)गुणान्तरमाक्षिपति—तथापीति । द्वौ पृथगित्यनुभवस्य द्वित्वसमानाधिकरणैकपृथक्त्वाभ्यामेवो(४)पपत्तेः । अन्यथा द्वौ शुक्लावित्यनुभवात् द्विशुक्लत्वमपि गुणान्तरं स्यादित्यर्थः । अन्योन्येति । यदि द्वित्वसमानाधिकरणाभ्यां पृथक्त्वाभ्यां द्वौ पृथगिति धीर्जननीया तदा चैत्रमैत्रौ चैत्रात् पृथक् मैत्राच्चेति प्रतीतिः स्यादिति । एकपृथक्त्वस्य द्वित्वेनान्यूनानातिरिक्तव्यक्तिवृत्तित्वाभावात् । यावति द्वित्वं समाप्यते तावति गुणान्तरं वाच्यमित्यर्थः । ननु पृथक्त्वाश्रयतावच्छेदकत्वेनैव द्वित्वं प्रतीयते द्वित्वाश्रयतया च चैत्रमैत्रयोः प्रतीत्या कथं तस्यावधित्वं प्रतीयतां पृथक्त्वाश्रयतावच्छेद-

(१) एव—इति नास्ति (क) (ख) पु० ।

(२) वृत्ति—इति नास्ति (क) (ख) पु० ।

(३) न—इत्यधिकम् (ख) पु० ।

(४) पृथक्त्वादेवो—इति (ख) पु० ।

करूपविरहेणोपलभ्यमानस्यैवावधित्वात् ।

मैवम् । आश्रयमात्रवृत्तेरेव धर्मस्याश्रयतावच्छेदकत्वात् । द्वित्वस्यैकपृथक्त्वाश्रयमात्रवृत्तित्वाभावात् । द्वित्वं च व्यासज्यवृत्तीत्युपसंहारव्याजेनाह—तस्मादिति ।

प्रत्येकमिति । प्रत्येकं द्वाविति व्यवहारप्रसङ्गादित्यर्थः । एवं तर्हीति । चैत्रो मैत्रात्परो मैत्रश्चैत्रादपर इति प्रतीतेरन्योन्यावधिके परत्वापरत्वे प्रतीयेते न तु चैत्रमैत्रौ चैत्रान्मैत्राद्वा पराविति ततो द्विपरत्वमपि गुणान्तरं स्यादित्यर्थः । नहीति । समानदेशस्थितयोः(१) परस्परावधिकपरत्वापरत्वाभावेनैव तथा व्यवहाराभावोपपत्ते(२)र्द्वित्वसमानाश्रयपरत्वेनैव द्विपरत्वप्रतीतिरन्यथासिद्धेत्यर्थः । प्रतीतिविषये भवतः किं समानदेशस्थितौ चैत्रमैत्रौ परावित्यनुभवान्न द्विपरत्वसिद्धिः । तथाहि(३) । मैत्रो यदि देवदत्तावधिकचैत्रनिष्ठपरत्वाधारः स्यात् तदा देवदत्तचैत्रोभयनिरूपितयावन्मध्यत्वनिरूपकः स्यादिति प्रतिकूलतर्कात्तथैव व्याप्तेरिति(४)मन्तव्यम् । यत्रास्तीति । असमानदेशस्थयोरित्यर्थः । यत्रापीति । द्विपरत्वेऽप्यसमवायिका-

(१) समानदेशस्थयोः—इति (क) पु० । समानदेशयोः—इति (ख) पु० ।

(२) व्यवहारोपपत्तेः—इति (क) पु० ।

(३) तथाहि—इति नास्ति (क) पु० ।

(४) ०तर्कइतिश्चेति—इति (क) (ख) पु० ।

रणत्वं प्रत्येकवृत्तिपरत्वापरत्वयो(१)र्वाच्यमिति तयोरुत्पत्तिरावश्यकी न तु अत एव तत्रापि व्यवहार(१)इत्यर्थः । तदनादृत्येति । अतिशयमनपेक्ष्येत्यर्थः । यद्येवमिति(२) । द्वित्वादिसामान्यं संख्यायां पृथक्त्वसामान्यमेकपृथक्त्वमेकपृथक्त्वे मिथोऽत्यन्ताभाववति वर्तमानमेकत्र द्विपृक्त्वादौ सङ्कीर्येतेत्यर्थः ।

कारणविशेषादिति । एकपृथक्त्वं कारणपृथक्त्वाज्जायते । अवयविनि द्विपृथक्त्वं त्वपेक्षाबुद्धेर्जायते । अतः कारणभेदव्यङ्ग्यम् । मिथो वैजात्यमस्त्येवेत्यर्थः । संख्यात्वमेकानेकवृत्तिवृत्तिगुणत्वसाक्षाद्व्याप्यजातिसमानाधिकरणात्यन्ताभावप्रतियोगि गुणत्वसाक्षाद्व्याप्यजातित्वात् रूपत्ववदित्येकपृथक्त्वद्विपृथक्त्वसाधकमनुमानमप्याहुः ।

यद्विशिष्ट इति । विशिष्टज्ञानस्य विशेषणधीजन्यतया सैव संयोगे मानमित्यर्थः । एतेनेति । रूपादित्रयोर्विंशत्यजन्यद्रव्यगुणकर्माणि यदि गुणासमवायिकारणककार्याणि न स्युः कर्माजन्यकार्याणि न भवेयुरित्यापादनार्थोऽतो न वैयधिकरण्यं प्रतियोग्यप्रसिद्धिर्वा । ननु द्रव्यादिभ्यः कार्यविशेषकुर्वद्रूपीभूयोत्पन्नेभ्यः परिणामविशेषसहितेभ्यो वा तत्र कार्याणि भवेयुः(३) किं संयोगेनेत्यत आह—क्षणभङ्गेति । सहकारितयेति ।

(१)-(१) वाच्यम् । तथाच तत्र तयोरवश्यमुत्पत्तिर्वाच्येति तन्निबन्धन एव तत्रापि तद्व्यवहार—इति (क) पु० ।

(२) जातिसङ्कर इति—(क) पु० ।

(३) स्युः—इति (क) पु० ।

यद्यपि पूर्वसंयोगात्मकप्रतिबन्धकाभावं समवायिकारणं चा(१) पेक्षत एव तथा भूयोऽवयवजन्यद्रव्ये(२) कर्तव्ये(३) परस्परस्वाजनकसंयोगापेक्ष(४)स्तथापि स्वाजनकविजातीयभावभूतानपेक्षत्वं संयोगस्य विवक्षितम् । एतेनेति । स्वोत्पत्त्युत्तर(५)भाविभूतानपेक्षत्वमित्यर्थः(६) । तेन समवायिकारणप्रतिबन्धकाभावयोरपेक्षा लभ्यते । स्पर्शवेगाविति । स्पर्शवेगयोः पूर्वयद्यप्यभिघातजनकत्वमुक्तं तथापि यत्राभिघाताश्रये द्रव्ये विपरीतं कर्मोत्पद्यते तत्र विपरीतवेगोऽभिघातेनापेक्ष्यते तथा स्पर्शोऽपि ।

अपेक्षणीयस्येति । स्वजनकभिन्नापेक्षत्वं (७)स्वाजनकविजातीयापेक्षत्वं चात्र (७)विवक्षितम् । प्रचयस्तु कारणमहत्त्वमपेक्षत इति पूर्वमेवोक्तमिति न तत्राव्याप्तिः । लक्षणस्वरूपाज्ञाने तत्र प्रकारप्रश्नो न सङ्गच्छत इत्युभय(८)पक्षपरत्वमाह—किं लक्षणमिति । ननु प्रतीतिः प्रत्येतव्यस्य लक्षणमिति सुप्रसिद्धमेवेत्यतः प्रश्नविषयमाह—प्रतीतिरिति । प्रतीतिमात्र-

(१) च—इति नास्ति (क) पु० ।
(२) भूयोऽवयवे द्रव्ये—इति (क) पु० ।
(३) कर्तव्ये—इति नास्ति (क) पु० ।
(४) परस्परं स्वाजनकसंयोगोऽपेक्ष्यः—इति (ख) पु० ।
(५) काल—इत्यधिकं (ख) पु० ।
(६) अनपेक्षत्वेनेत्यर्थः—इति (ख) पु० ।
(७)-(७) नास्ति (क) पु० । वा तत्र० इति (ख) पु० ।
(८) उभय पक्ष—इति (ख) पु० ।

मतिव्यापकं संयुक्तप्रतीतिविषयत्वं च(१) प्रत्येतव्यविशेषाधीनमतः (२)प्रत्येतव्यविशेषस्यैव लक्षणत्वसंभवे प्रतीते(३)र्व्यर्थत्वमतः प्रत्येतव्यनिष्ठधर्मविशेषप्रश्न इत्यर्थः ।

अप्राप्तयोरिति । प्रागभावप्रतियोगी सम्बन्ध इत्यर्थः । जातिमान सम्बन्धः सम्बन्धो वा संयोग इत्यपि लक्षणं(४) द्रष्टव्यम् । यद्यपि सम्बन्धो न संयोगः आत्माश्रयात् । नापि समवायो विरोधात् । तथापि कर्मासमवायिकारणानेकाश्रितवृत्तिगुणत्वव्याप्यजातिमत्त्वं लक्षणम् । लक्षणान्तरं च द्रव्यासमवायिकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वं गुणविशेषासमवायिकारणवृत्तितज्जातिमत्त्वं कर्मविशेषासमवायिकारणवृत्तितज्जातिमत्त्वं च पूर्वमुक्तम् ।

तदभिमुखेति । तत्संयोगानुकूलक्रियाशून्यत्वं निःक्रियत्वं(५) विवक्षितम् । तेन यत्रैकः स्वाभिमुखीं दिशं गच्छत्यन्यश्च तत्पृष्ठमनुगच्छति तत्र सक्रियस्यापि सक्रियेणान्यतरकर्मजः संयोग इत्यर्थः । द्वयोर्द्वयोरिति । एकदिगभिमुखेनापरस्याप्रत्यक्षत्वं दिशो विरोध इत्यर्थः । यथेतीति । यद्यपि कर्मणः कर्मत्वेनैव संयोगं प्रति कारणत्वात्प्रत्येकमेव कर्मणोः संयोगज-

(१) विषयत्वस्य—इति (क) पु० ।
(२) विशेषस्यैव लक्षणत्वसम्भवे व्यर्थमतः—"इति (क) पु० ।
(३) प्रतीतेः—इति नास्ति (क) पु० ।
(४) लक्षणं—इति नास्ति (क) पु० ।
(५) निश्चलत्वं—इति (क) (ख) पु० ।

नकत्वमिति संयोगद्वयमेवोत्पत्तुमर्हति तथापि संयोगद्वयस्याननुभवात् कर्मभ्यां संभूयैक एव संयोगो जन्यते । अत एव नैककर्मणाप्यस्यान्यथासिद्धिः विनिगमकाभावादुभयोरप्यारम्भकत्वात् ।

ननु कर्मत्वेनैव संयोगजनकत्वात्कपालद्वयजन्यघटवदवान्तरभेदाभावात् कथं त्रैविध्यम् ।

अत्राहुः । जातिभेदं विनाप्यन्यतरकर्मजत्वाद्युपाधिभेदेनैव विभागः ।

यद्वा । कस्यचित्संयोगस्य यावत्स्वाश्रयविभागविरोधित्वं कस्यचिन्नेत्यवान्तरभेदस्यावश्यकत्वात्तत्र चान्यतरोभयकर्मणामेव प्रयोजकत्वम् ।

एकस्मादित्यादि । एकतन्तुमात्रसंयुक्तकारण(१)संयोगाद्द्वितन्तुकतत्संयोगः तन्तुद्वयसंयुक्ताकाशसंयोगद्वयजन्यः पटाकाशसंयोगः बहुसमवायिकारणसंयुक्ततुर्यादिसंयोगजः पटतुर्यादिसंयोग इत्यर्थः ।

आरम्भकत्वसूचना(२)प्रयोजनमाह—संयोगेति । द्व्यणुकद्वयोत्पत्तिप्रयोजनमाह—युगपदिति । पार्थिवद्व्यणुकेनाप्यपरमाणोरेकः, आप्यद्व्यणुकेन पार्थिवपरमाणोरपरः, तदेतत्संयोगद्वयम् । तामाहेति । तां युगपत्संयोगस्योत्पत्तिमित्यर्थः । उत्पत्तिकारणस्योक्तत्वात् ज्ञप्तिकारणतया व्याचष्टे—किं प्रमाण-

(१) संयुक्ताकाश—इति [ख] पु० ।

(२) सूचन—इति (ख) पु० ।

मिति । तत्संयोगिकार्यत्वादिति । यत्रैकावयवसंयोग्यपरावयवकार्योऽवयवी न स्वावयवसंयुक्तः तत्रानैकान्तिकं स्यादत उक्तम्—तदकार्यत्व इति । यद्यपि संयोगिकार्यत्वादित्यत्र संयोगस्य नोपलक्षणत्वं व्यभिचारात् न विशेषणत्वमसम्भवात् पार्थिवाप्यपरमाणुसंयोगस्य द्व्यणुकाजनकत्वात् । तथापि पार्थिवः परमाणुः जलद्व्यणुकसंयोगी जलद्व्यणुकाजनकत्वे सति जलद्व्यणुकसमानाधिकरणासमानकालीनसंयोगाश्रयत्वात् यदेवं तदेवमिति व्याप्तिः । पौनरुक्त्यमाशङ्क्याह—तमेनमिति । एनममुम् । नैयायिकं व्याप्तिसाध्यम् । (१)प्रत्यामनन्ति स्वीकुर्वन्तीत्यर्थः । यद्वा । नैयायिक(१) पक्षसम्बन्धिसाध्यरूपम् । प्रत्यामनन्ति साध्यरूपत्वमस्य दर्शयन्तीत्यर्थः । तज्जनकेनेति । परमाणुद्व्यणुकसंयोगजनकेनेत्यर्थः । तथा च तदुत्पत्तिसमकालमेव द्व्यणुकयोः संयोगः(२) स्यादिति भावः ।

तस्मिन्निति । कार्य्यस्याकारणेन संयोगः कारणसंयोगपूर्वक एव । न च तस्मिन् काले द्व्यणुकस्य द्व्यणुकान्तरकारणेन सह संयोगः पूर्वकालवृत्तिर्भवति । युगपदुत्पत्तौ पूर्वकालसत्त्वादित्यर्थः(३) । कारणसंयोगिनैवेति । पूर्ववर्तिकारणसंयोगवत्तैवेत्यर्थः । तथा च पूर्वपरमाणुद्व्यणुकसंयोगोऽवश्यं वाच्य इति भावः ।

(१)–(१) नास्ति (क) पु० ।

(२) द्व्यणुकसंयोगः—इति (ख) पु० ।

(३) पूर्वकालसत्त्वाभावात्—इति (ख) पु०

संयोगो हीति । अवयविनि कर्मोत्पादो यावदवयवकर्मोत्पत्तिनियत इति श्येनकर्मोत्पत्तिकाले चरणेऽपि कर्मोत्पादात् कर्मवति कर्मानुत्पत्तेः पूर्वोत्पन्नतच्चरणकर्मणो नाशात् श्येनस्थाणुसंयोगः कर्मज एव । अपि च संयोगकर्मणोस्तृणारणिमणिन्यायेन कारणत्वे कार्ये वैजात्ये मिथो विरुद्धजात्योरेकत्रासम्भवः । न चोभयकारणजन्यं प्रत्येकजन्यद्विजातीयमेवेति वाच्यम् । तादृशजातेर्योग्यानुपलम्भबाधितत्वा(१)त्संयोगद्वयं पृथगेव जन्यत इति भावः ।

अजसंयोगस्य(२) नित्यत्वाद्विभागनाश्यगुणत्वं संयोगलक्षणं नास्तीत्यत उक्तम्—अजसंयोगमिति । नन्वन्यतरकर्मजोदाहरणं पुनरुक्तमित्यत आह—नन्विति ।

यथाश्रुत इति । आत्मा नास्तीतिवात्सिद्ध्यसिद्धिभ्यां व्याघातादित्यर्थः । अव्याप्यवृत्तिरिति । परमाण्वाकाशसंयोगो न व्यापकः संयोगत्वात् कपिवृक्षसंयोगवत् । न चाप्रयोजकत्वम् । परमाणोराकाशव्यापक(३)त्वे परमाणुत्वव्याघातात् । ननु दृष्टान्तेऽवयववानामवच्छेदकत्वादाकाशे तदसम्भव इत्यत आह—प्रदेशश्चेति । अवयवाभावेऽपि संयोग्यन्तरस्यैवावच्छेदकत्वम् । तत्राप्यन्य एव तदवच्छेदक इत्यर्थः । नन्वेवमुपाधय एव

(१) निरस्तत्वादिति—इति (क) पु. ।

(२) अजसंयोगे—इति (क) (ख) पु. ।

(३) परमाणोरपि व्यापकत्वे—इति (ख) पु. ।

तदाश्रया न तूपहित आवश्यकत्वादित्यत आह—न चेति । शाखावच्छेदेन वृक्षः कपिसंयोगीत्यनुभवो न तु शाखैव कपिसंयुक्तेति । उक्तमिति । न हि कार्यभेदेन शक्त्यशक्ती कार्यमेवाश्रयेते(१) इत्यादिना । अपि चेति । सर्वत्रावयविन्यवयवसंयोगेनान्यथासिद्धौ परमाणावेव संयोगपर्यवसानात् संयोगोऽतीन्द्रियः स्यादिति तत्साक्षात्कारव्याघात इत्यर्थः । न च त्रसरेणोरवयवावच्छेदाग्रहात्तत्र नान्यथासिद्धिः । तत्रापि दिगुपाधीनामेवावच्छेदकत्वसम्भवात् ।

ननु चाव्याप्यवृत्तित्वं न स्वाभावसामानाधिकरण्यम् । रूपादीनामपि स्वान्योन्याभावसामानाधिकरण्यात् । नापि स्वसंसर्गाभावसामानाधिकरण्यम् । रूपादीनां स्वप्रागभावसामानाधिकरण्यात् । नापि स्वात्यन्ताभावसमानाश्रयत्वम् । अत्यन्ताभावत्वव्याघातात् । किञ्च एकत्रैकदैकस्य भावाभावयोर्विरोधबलात् तत्र प्रतीतिभ्रम(२) एव कुतो न स्यात् ।

मैवम् । स्वप्रतियोगिसमानकालसंसर्गाभावस्यैवात्यन्ताभावत्वात् । अन्यत्रात्यन्ताभावस्य प्रतियोगिवैदेश्यनियमेऽपि शाखायां वृक्षः कपिसंयुक्तो न मूले इत्यवच्छेदभेदेन प्रतीतेर्विरोधस्यैवाभावात् । येन प्रकारेणैकधर्म्युपसंहारात्तयोर्विरोधः ततोऽन्येनापि प्रकारेण यदि विरोधः स्यात्तदोभयोच्छेदप्रसङ्गः ।

(१) आश्रयत--इति (क) (ख) पु. ।

(२) तत्प्रतीतिभ्रम--इति (ख) पु. ।

किं च तुल्यन्यायतया संयोगाभावोऽपि (१)वृक्षे न वर्तेत इति भावाभावयोरुभयोरुच्छेदप्रसङ्गः । न च प्रतियोगिसमानदेशत्वेनात्यन्ताभावस्यान्योन्याभावत्वापादनम् । व्याप्यवृत्तित्वस्योपाधित्वात् ।

नन्ववच्छेदकस्यावयविनोऽर्थान्तरत्वे तत्र संयोगवृत्त्यवृत्तिभ्यामवयविनि वृत्त्यवृत्ति(२)विरोधे न कश्चिदुपयोगोऽनर्थान्तरत्वे च तदवस्थ एव विरोधः ।

अत्राहुः । संयोगस्यावयविनि समवायेऽप्यवयवान्तरा(४)वच्छेदप्रतीतिबलात् कस्मिंश्चिदवयवे तस्याधारता, न सर्वत्रेत्यव्याप्यवृत्तित्वार्थः ।

यद्वाऽवयवयसंयोग एवोपलभ्यमानेऽवयविनि संयोग उपलभ्यते । यत्र त्ववयवे संयोगाभावस्तस्मिन्नुपलभ्यमानेऽप्यवयविनि स नोपलभ्यत इत्यव्याप्यवृत्तित्वार्थः ।

सावयवस्यैवेति । सावयवावयवस्यैवेत्यर्थः । **मेर्यामिति** । विभु(५)विशेषगुणानां यावत्यसमवायिकारणं तावत्यवश्यंभावादित्यर्थः । **तस्मादिति**(६) । आकाशादयः कर्मजन्य-

(१) तुल्यन्यायेन यदि संयोगाभावोऽपि न वर्तते तदा संयोगोऽपि=इति (ख) पु० ।

(२) वृत्ति-इति नास्ति (ख) पु० ।

(४) समवायेऽप्यवान्तरा०-इति (क) पु० । समवायेऽवयवा० इति (ख) पु० । (५) बिभु-इति नास्ति (क)

(६) तस्मादाकाशादय इति--इति (क) (ख) पु० ।

संयोगाश्रया इत्यत्र साध्ये द्रव्यत्वादिति हेतुः । कारणाकारणसंयोगजन्यपरमाणुसंयोगाश्रयेणावयविनानैकान्तिकः स्यादिति नित्यद्रव्यत्वे सतीत्युक्तम् । निःक्रियत्वं तु विभुकर्मणा संयोगो नास्तीति ज्ञापनार्थम्(१) । विभुपरमाणुसंयोगः कर्मजः संयोगाजन्यसंयोगत्वादिति हेत्वन्तरसूचनाय निःक्रियत्वमित्युक्तमित्यप्याहुः ।

यद्यप्यनेन कर्मजसंयोगसिद्धावपि नाजसंयोगाभावः सिध्यति । तथाप्याकाशं कर्मजन्यपरमाणुसंयोगानाश्रयः अमूर्तत्वाद्रूपवदिति । न चाद्रव्यत्वमुपाधिः । तुल्ययोगक्षेमत्वात् । व्यर्थविशेषणत्वाच्च । **मूर्तसंयोगित्वादिति** । संयोगित्वादित्येव हेतुः । मूर्तेति तु संनिधानात्संयोगित्वं(२) कालेनैव सहोक्तं तच्चासिद्धमिति भ्रमापाकरणायोक्तम् । न च मूर्तत्वमुपाधिः । कालवृत्तिसंयोगाश्रयत्वस्य कालेऽपि वृत्तेः साध्याव्यापकत्वात् ।

विभव इति । यद्यपि युतसिद्धिमात्राभावोऽसिद्धः परस्परं युतसिद्ध्यभावे च प्रतियोग्यप्रसिद्धिस्तथाप्याकाशं न कालसंयोगि कालसंयोगप्रागभावशून्यत्वात् रूपवत् । न चाद्रव्यत्वमुपाधिः । व्यर्थविशेषणत्वादप्रयोजकत्वाच्चेति भावः(३) ।

(१) ज्ञापनायोक्तम्—इति [क] [ख] पु० ।

(२) संयोगित्वं—इति नास्ति [क] पु० ।

(३) विशेषणत्वादित्येव भावः—इति [क] पु० । विशेषणत्वादित्यत्र तात्पर्यम् । इति (ख) पु० ।

हेतोः द्रव्यत्वादित्यस्येत्यर्थः । अनुकूलेति(१) । न च संयोगसमवायिकारणत्वेन द्रव्यत्वसिद्धेस्तदनुपपत्तिरेवानुकूलतर्कः । द्रव्यान्तरसंयोगित्वेनापि तदुपपत्तेः । प्रतिकूलेति । कालाकाशयोर्मिथः संयोगित्वेऽयुतसिद्धिप्रसङ्गादित्यर्थः(२) । ननु पृथग्गतिमत्त्वमवयवावयविनोरप्यस्तीति तयोरपि युतसिद्धिप्रसङ्गः । न हि यदेव कर्मावयवे तदेवावयविनीत्यत आह—विभागहेत्विति । अवयवावयविनो(३)र्भिन्नगतिमत्त्वेऽपि(३) मिथो विभागजनिका गतिर्नास्तीत्यर्थः । नन्वेवं घटपटयोरनुत्पन्नपरस्परविभागजनककर्मणोर्न युतसिद्धिः स्यादित्यत आह—युताश्रयत्वमिति । इयमिति । पृथगाश्रयत्वपृथग्गतिमत्त्वयोरन्यतरत्संयोगव्यापकमित्यर्थः । विभुपरमाण्वोः पृथगाश्रयत्वाभावात् घटपटयोः पृथग्गतिमत्त्वाभावात् प्रत्येकमव्यापकत्वादत आह—उभयेति । न तूत्तरकालमिति । संयोगजनकयोः संयोगकर्मणोर्विभुनोरभावादित्यर्थः । विशेषाविशेषयोरिति(४)। युतसिद्धेर्विशेषौ पूर्वोक्तावित्यर्थः । तथाच यावद्विशेषाभावे विभुनोर्युतसिद्धिसामान्यस्य संयोगव्यापकस्याभावात्तद्व्याप्यस्य संयोगस्याप्यभावः । द्रव्यत्वे सतीति नित्यगुणव्यावर्तनाय । तयोरेवेति । समानाधिकरणस्यैव विरोधिगुणस्य नाशकत्वा-

(१) अनुकूलतर्काभावादिति—इति (क) (ख) पु० ।

(२) प्रतीघातादित्यर्थः—इति (क) (ख) पु० ।

(३)-(३) नास्ति क० पु० ।

(४) विशेषाविशेषाविति—इति (क) (ख) पु० ।

दिति भावः(१) । तद्विनाशादिति । न चाश्रयनाशकादेव युगपदाश्रयाश्रितनाशोऽस्त्विति वाच्यम् । आश्रयनाशकापेक्षया आश्रयनाशस्यैव लघुत्वेन कारणत्वात् । तुल्यकालयोरिति । समवायिकारणत्वस्य समवायगर्भत्वादित्यर्थः ।

संयोगसिद्धावनुमानमप्याहुः । गगनपवनसंसर्गजन्मा शब्दो रूपादित्रयोविंशतिगुणासमवायिकारण(२)शून्योऽयं गुणासमवायिकारणकः शब्दत्वात् द्वितीयशब्दवदिति । ननु चातीन्द्रियो(३) विभागो न विभक्तप्रत्ययनिमित्तमिति तत्राव्याप्तिरदृष्टादेरपि तन्निमित्तत्वादतिव्याप्तेश्चेत्यत आह—निमित्तमितीति । अनेनायं विभक्त इत्यस्यां बुद्धौ यद्विशेषणत्वेन भासते गुणः स विभाग इत्यर्थः । अतीन्द्रियस्यापि विभागस्य विशेषणत्वमस्त्येव व्यावृत्तिधीजनकधीविषयत्वात्(४) । प्रमाणेति । प्रतीतिपदेन प्रत्यक्षं प्रमाणमुक्तं विभागशब्द(५)प्रयोगेण च शब्दात्मना तत्सहायस्तर्को दर्शितः । संयोगाभाव इति । अनन्तसंयोगसंसर्गाभाव इत्यर्थः । रूपेति । रूपादौ संयोगा(६)त्यन्ताभावस्य

(१) इत्यर्थः—इति (क) (ख) पु० ।

(२) कारणकत्व—इति (क) पु० ।

(३) नन्वतीन्द्रियो—इति (क) (ख) पु० ।

(४) व्यावृत्तिधीजनकत्वात्—इति । (क) पु० । व्यावृत्तत्वधीजनकत्वात्—इति (ख) पु० ।

(५) निमित्तशब्द—इति (क) पु० । विभक्तशब्द—इति (ख) पु० ।

(६) संसर्गा—इति (क) पु० ।

विद्यमानत्वादिति भावः । संयोगविनाश इति । तस्य च संयोगसमानाश्रयत्वान्नोक्तदोषः ।

ननु संयुक्तविभक्ते पुनः संयोगान्तरवति पूर्वसंयोगनाश(१)सत्त्वाद्विभागधीप्रसङ्गः । यावदुत्पन्नसंयोगध्वंसस्य विवक्षितत्वे यत्रैक एव संयोगो नष्टस्तत्र यावदर्थाभावादव्याप्तिः ।

मैवम् । संयोगत्वावच्छिन्नप्रतियोगिकध्वंसस्य विवक्षितत्वात् । (२)सामान्याभावस्य च यावद्वि(२)शेषाभावव्याप्यत्वेनैकसंयोगवत्यभावात् । (३)स्वसमानाधिकरण(३)संयोगासमानकालीनस्य वा संयोगध्वंसस्य विभागधीविषयत्वात् । युक्तं चादः(४) । विभागस्योत्तरदेश(५)संयोगनाश्यतया क्षणमात्रस्थायित्वात्तदुत्तरक्षणे विभक्तप्रतीतेः संयोगध्वंसालम्बनत्वेन त्वयाप्यनुमतेरिति भावः(६) । प्रमेयाधिक्येति । ननु द्वित्वमेवाधिकं स्यात् ।

अत्राहुः । विशेषणज्ञानं विशेष्य (७)सन्निकर्षस्तयोरसंसर्गाग्रह इत्येव विशिष्टप्रत्यक्षसामान्यकारणं (१) न तु विशेषणस्यैकत्वानेकत्वे अपि तन्त्रम् । अनेनायं विभक्त इति द्वित्वानुल्लेखी (२) व्यवहारश्च न स्यात् । अपि च । द्वित्वान्तर्भावेनैव विभागपदार्थत्वे द्वौ विभक्ताविति सह प्रयोगो न स्यात् । तथापि द्रव्यध्वंसाजन्यः संयोगध्वंसो विभक्तधीविषयः स्यात् ।

मैवम् । घटात्पटो विभक्त इत्यनुभवाद्विभागस्य पृथक्त्वस्येव सावधित्वात् । ध्वंसस्य च सप्रतियोगिकत्वात् । अवधित्वप्रतियोगित्वयोर्भेदस्योक्तत्वात् । संयोगनाशानन्तरमाश्रयनाशे ध्वंसप्रतीतौ सत्यामपि विभक्तप्रतीतेरभावात् । विभागः सन्नित्यबाधितधीवेद्यत्वात् । शब्दसंयोगाजन्यशब्दासमवायिकारणत्वात् । विभागाभावस्य संयोगत्वापत्तौ विनिगमकाभावाच्च । न च संयोगाभाव एव विभागधीः कथमन्यथा हिमवद्विन्ध्यौ विभक्ताविति प्रत्यय इति वाच्यम् । विभागपदस्य नानार्थत्वात् । एवं सत्यनुमानमप्याहुः । संयोगत्वं द्विवृत्तिमात्र(३)वृत्तिगुणत्वसाक्षाद्व्याप्यजातिभिन्नं मेयत्वात्(४) घटवत्(५) ।

विभागे मानान्तरमाह—न चेति । ससमवायिकारणक-

---

(१) ध्वंस—इति (क) (ख) पु० ।

(२)-(२) सामान्यावच्छिन्नाभावस्य तत्तद्धर्मावच्छिन्नतावत् इति (ख) पु० ।

(३)-(३) नास्ति (क) पु० । स्व इति नास्ति (ख) पु० ।

(४) चैतत्—इति (क) (ख) पु० ।

(५) देश—इति नास्ति (ख) पु० ।

(६) भावः—इति नास्ति (क) (ख) पु० ।

(७) इन्द्रिय--इत्यधिकं (ख) पु० ।

(१) सामान्ये कारणं--इति (क) पु० ।

(२) नुल्लेखे--इति (क) (ख) पु० ।

(३) द्विष्ठमात्र—इति (क) (ख) पु० ।

(४) प्रमेयत्वात्--इति (क) पु० ।

(५) घटवत्—इति नास्ति (क) पु०

गुणनाशे(१) समानाधिकरणविरोधिगुणस्य कारणत्वादित्यर्थः । ननु गुणत्वमतन्त्रं किन्तु समानाधिकरणविरोधिमात्रं लाघवादित्यभिप्रेत्याह—कर्मैवेति । संदिग्धत्वादिति । कर्म साक्षात्संयोगनाशकं परम्परया वेति संशयादित्यर्थः । विश्लेषो द्रव्यारम्भकसंयोगनाशः ।

कारणस्यैवेति । समवायिकारणस्यैवेत्यर्थः । (२)एवं सत्यङ्गुल्यामिति(३) । न चाङ्गुली(४)तरुवृत्तिः संयोगनाश एव समानाधिकरणो विरोधी धर्मः हस्ततरुसंयोग(५)विनाशकः स्यादिति वाच्यम् । आश्रयनाशाजन्यगुणध्वंसस्य विरोधिगुणजन्यत्वनियमात् । समानाधिकरणस्य भावस्यैव नाशकत्वाच्च । हस्ततरुसंयोगनाशो न स्यादिति ।

ननु हस्ततरुसंयोगनाशाभावे साध्ये हस्तादीनां निष्क्रियत्वादित्यादि हेतुद्वयं व्यधिकरणम् । न चाङ्गुरी(६)कर्म न हस्ततरुसंयोगनाशकं तरुहस्तावृत्तिकर्मत्वादिति वाच्यम् । कर्ममात्रस्यैव संयोगनाशकत्वानभ्युपगमेन व्यर्थविशेषणत्वात् कर्मत्वा-

(१) समवायिकारणसमानकालीनगुणनाशे--इति (ख) पु० ।

(२) व्यधिकरणधर्मस्य विनाशकत्वेऽतिप्रसङ्गमाह--जातिमात्रेणेति । इत्यधिकं (ख) पु० ।

(३) सत्यङ्गुर्यामिति—इति (क) पु० ।

(४) री—इति (क) पु० ।

(५) हस्ततत्संयोग—इति (ख) पु० ।

(६) ली—इति (ख) पु० ।

दित्येतावन्मात्रस्य परं प्रत्यसिद्धेः(१) । व्यधिकरणस्याप्यदृष्टस्य नाशकतया व्यभिचाराच्च ।

मैवम् । हस्ततरुसंयोगनाशः नाङ्गुरीकर्मजन्यः संयोगनाशत्वात् समानाधिकरणभावजन्यो वा आश्रयनाशाजन्यसंयोग(२)ध्वंसत्वादित्यस्य विवक्षितत्वात् ।

तस्मादिति । विभागजविभागपरम्परयेत्यर्थः । कर्मजनितहस्तसंयोगस्यासमवायिकारणनाशो न नाशक इति तन्नाशकत्वेन विभागसिद्धौ कर्मसमानाधिकरणसंयोगस्यापि स एव नाशकः कर्म च विभागजननेनान्यथासिद्धमिति भावः(३) ।

यद्यपि नेदं प्रत्यक्षमानम् अनुमानपरत्वे च हेतुशून्यता(४) । तथापि प्रागुक्तविभागग्राहकस्तर्कोऽनेन दर्शितः । अत एव(५) वक्ष्यति तमिममनुग्राहकमिति ।

व्यधिकरणमपीति । क्लृप्तत्वाद्गुणान्तरकल्पने च गौरवादिति भावः । असति बाधक इति । संकोचकस्यैकदेशबाधात्मकतया बाधकमन्तरेणासत्त्वादित्यर्थः । आश्रयाश्रितपरम्परायाश्चाननुगतत्वादिति भावः । कार्येणेति । त्रयोविंशतिगुणासमवायिकारणकत्वशून्यस्य शब्दस्य गुणासमवायिकार-

(१) परं प्रति व्याप्यत्वासिद्धेः—इति (ख) पु० ।

(२) संयोगस्थाने गुण—इति (ख) पु० ।

(३) विभागजननेऽन्यथासिद्धमित्यर्थः—इति (क) (ख) पु० ।

(४) शून्यत्वम्--इति (क) (ख) पु० ।

(५) अत एव च--इति (क) पु० ।

णानुमानादित्यर्थः(१) । तत्त्वात् असमवायिकारणत्वादित्यर्थः ।

प्रत्यासत्त्यभावेनेति । कार्यैकार्थप्रत्यासत्तिकारणैकार्थप्रत्यासत्त्योरभावेनेत्यर्थः । न च वंशदलद्वयसंयोगनाशापेक्षो वंशदलाकाशसंयोगोऽसमवायिकारणम् । संयोगासमवायिकारणशब्दस्य संयोगनिमित्तकारणकत्व(२)व्याप्तेः । भेर्याकाशसंयोगजशब्दे भेरीदण्डसंयोगनिमित्तकारणतादर्शनात् ।

लक्षणमाहेति । विभागो विभक्तप्रत्ययनिमित्तमित्यस्य प्रमाणो(३)पदर्शकत्वादित्यर्थः । यद्वा । अजविभागव्यवच्छेदकं लक्षणान्तरमित्यर्थः । तथाच वक्ष्यति अजो विभागो नास्तीति । संयोगनाशक इति द्विष्ठतया विशेषणान्नादृष्टेऽतिव्याप्तिः ।

अन्यतरकर्मज इति । विभक्ताविभागोऽयम् । प्रथमं विभागो द्विविधः कर्मजो विभागजश्चेति विभागात् । यद्यप्युभयदण्डजत्वादिना घटे विशेषानुपलम्भाद्विभागेऽप्युभयकर्मजत्वं न विशेषस्तथापि अन्यतरकर्मजे उभयकर्मजे च विभागे अन्यतरस्योभयस्य(४) चावधित्वं प्रतीयते । यत्र कर्मोत्पद्यते तन्निष्ठविभागेऽन्यस्यैवावधित्वात् । एतादृशश्च(५) कार्ये विशेषः

(१) कारणकत्वानुमानादित्यर्थः--इति (क) पु० । कारणकत्वादित्यर्थः--इति (ख) पु० ।

(२) कारणत्व--इति (क) पु० । कारण--इति नास्ति (ख) पु०

(३) प्रत्यक्षप्रमाणो--इति (क) (ख) पु० ।

(४) उभयस्य--इति नास्ति (ख) पु० ।

(५) च--इति नास्ति (ख) पु० ।

कारणाधीन एव वाच्यः । ननु यदा तदेत्यभिधानात् कालान्तरे कर्मणो विभागजनकत्वं(१) स्यादेवेत्यत आह—यद्यपीति । ननु क्रमकल्पनेयमनुपपन्ना युगपद्विभागानां प्रत्ययात् क्रमानुपलब्धेश्चेत्यत आह—अयमर्थ इति । अथ द्रव्यारम्भकसंयोगविरोधिविभागजनकस्याविरोधिविभागजनकत्वाभावस्य(२) क्वाप्यदर्शनात्तदविरोधिविभागजनके विरोधि(३)विभागजनकत्वाभावस्य च विकसत्कमलदलादौ दर्शनाद्विभागस्य द्रव्यारम्भकसंयोगविरोधित्वाविरोधित्वप्रयोजकं वैजात्यं स्वजनककर्मणो मिथो विरुद्धजातीयत्वं विनानुपपन्नं तत्कल्पयति । न चैकत्र कर्मणि विरुद्धे जाती वर्तेते इति नोभयविभागजनकत्वमेकस्य कर्मणः सम्भवतीत्यर्थः । अन्यथा द्रव्यानारम्भकसंयोगविरोधिन्याः क्रियाया नियमेन विरोधिविभागजनकत्वे चलत्येवावयवे द्रव्यनाशापत्तेः । न च तत्रान्यत् कमलम् । तत्त्वेन ग्रहात् । न चानियमेन तथास्त्विति वाच्यम् । विकसत्कमलदलादौ तददर्शनसम्भवेनैवंभूतं कर्म तद्विरोधिविभागं न जनयतीति नियमावधारणात् ।

नन्वस्तु विभागवैजात्यात्कर्मवैजात्यं तथापि पाट्यमानवंशदले द्रव्यारम्भकानारम्भकसंयोगविरोधिविभागजनकत्वेन कम-

(१) विभागान्तरजनकत्वं--इति (क) (ख) पु० ।

(२) अभाव--इति नास्ति (क) पु० । संयोगविरोधिविभागजनके कर्मणि तदविरोधिविभागजनकत्वाभावस्य--इति (ख) पु० ।

(३) तद्विरोधि--इति (ख) पु० ।

लदले त्वनारम्भकसंयोगविरोधिविभागमात्रजनकत्वेन किं वैजात्यं किं वा भवदुक्तरीत्येति संदिह्यते । तथा चानारम्भकसंयोगविरोधिविभागजनकत्वं कर्मणः सामान्यत एव विशेषादारम्भकसंयोगविरोधिविभागजनकत्वमपि स्यात् विभागयोर्यौगपद्यदर्शनादित्याशङ्क्य निराकरोति न च वाच्यमिति ।

(१)कार्यविरोधस्येति(१)। वंशदलकर्मणो(२) द्रव्यारम्भकसंयोगविरोध्यविरोधिविभागद्वयजनकत्वसंदेहेऽपि विरोध्यविरोधिविभागद्वयलक्षणाविरुद्धजातीयकार्यनिश्चयेन कार्यकारणभावग्रहप्रवृत्तेरप्रत्यूहात्(३)। अन्यथा सर्वत्र प्रयोजकरूपान्तरशङ्कया तन्निश्चयः क्वापि न स्यादित्यर्थः । ननु वंशे(४) पाट्यमाने तद्दलकर्मणा विरोधिविभागजनकं विरोधिविभागजनकत्वादित्यन्वयिनि दृष्टान्ताभावः(५)। द्रव्ये व्यभिचारश्च तस्योभयविभागजनकत्वात् । अत एव न व्यतिरेके कमलदलदृष्टान्तेन व्यतिरेकी । द्रव्य एव विरुद्धत्वात् । न च कर्मत्वेन विशेषणाद्धेतोर्नायं दोषः । सपक्षादपि रूपादेर्व्यावृत्तेरसाधारणत्वात् ।

मैवम् । वंशदलाकाशविभागो न द्रव्यारम्भकसंयोगविरोधिविभागजनककर्मजन्यः द्रव्यानारम्भकसंयोगविरोधिविभागत्वात् विकसत्कमलदलविभागवत् ।

(१)-(१) नास्ति (क)(ख) पु० ।
(२) वंशदले कर्मणो—इति (क) (ख) पु० ।
(३) अप्रत्यूहत्वात्—इति (क) पु० ।
(४) वंशदले—इति (ख) पु० ।
(५) इत्यत्रान्वयिदृष्टान्ताभावः—इति(ख) पु० ।

यद्वा । एतत्कर्म न द्रव्यानारम्भकसंयोगविरोधिविभागजनकं द्रव्यारम्भकसंयोगविरोधिविभागजनकत्वात्(१) । यत्र तन्त्वोरारम्भक एव संयोगः अवच्छेदकान्तरेण संयोगाभावात् तत्र तन्तुद्वयविभागजनकांशुतन्तुविभाग एव दृष्टान्तः । न चाविनश्यदवस्थकर्मत्वेन प्रतिरोधः । विपक्षे बाधकस्योक्तत्वादिति विवक्षितत्वात् ।

तत्रापीति । द्रव्यारम्भककारणद्वयसंयोगजनकं कर्म नाकाशादिसंयोगं जनयेत् इति कारणमात्रसंयोगपूर्वकाः कारणाकारणसंयोगाः कल्प्येरन् क्रमानुपलब्धिश्च तुल्येत्यर्थः । संयोगस्येति । उत्तरसंयोगमात्रे कर्मणः कारणत्वावधारणात् न तु (२)विभागमात्रेऽपि कर्मणा(२) सकलसंयोगिविभागस्याजननादिति नैकस्य कर्मणः संयोगद्वयजनने विरोध इत्यर्थः । तदेव स्फुटयति—अनारम्भकेति । नन्वनारब्धद्रव्यत्वादिविशिष्टेऽपि तन्त्वादौ वर्तमानो न सर्वः संयोगो द्रव्यारम्भक इति संयोगविशेषत्वेन द्रव्यारम्भकत्वम् अनारम्भकादिसमवेतत्वमात्रस्य च(३) व्यभिचारित्वात् । स च विशेषो जातिरूप एवेति संयोगयोर्वैजात्यात् तज्जनककर्मणोरपि विजातीयत्व(४)मावश्य-

(१) विरोधिविभागासमवायिकारणत्वात्—इति (ख) पु० ।
(२)-(२) विभागे कर्मणा—इति (क) (ख) पु० ।
(३) अनारब्धद्रव्यत्वादिसमवेतमात्रस्य—इति (ख) पु० ।
(४) विरुद्धजातीयत्व—इति (क) (ख) पु० ।

कमिति नैकस्य कर्मणो द्रव्यारम्भकानारम्भक(१)संयोगजनकत्वमतः कारणमात्रसंयोगजः कारणाकारणसंयोगः स्यादेव ।

अत्राहुः । सहकारिभेदसमवधानादेव तदुपपत्तौ संयोगवैजात्ये मानाभावः । तथा च कर्मणो(२) वैजात्यमसिद्धमिति व्याप्तेरसिद्धिः ।

ननु कमलदलकर्माकाशादिदेशादपि विभागं जनयत्वेवेत्यत आह—कर्मविशेष इति । विशिष्टादिति । कमलदलविभागस्यातथात्वादित्यर्थः । ननु वंशे पाट्यमाने तद्दलक्रिया, ततो दलयोर्विभागः, ततो वंशदलसंयोगनाशः, ततो वंशदलावष्टब्धनभोविभागोऽस्तु, किं द्रव्यनाशापेक्षयेत्यत आह—अयमभिसंधिरिति । विभागेन हीति । कारणाकारणविभागेन कार्याकार्यविभागे जनयितव्ये कर्मानपेक्षं समानाधिकरणं कार्यद्रव्यमेवापेक्ष्यत इति भावः । विभागोत्पत्तिरिति । अङ्गुरीतरुविभागाद्धस्ततरुविभागोत्पत्तेरित्यर्थः । तस्मादिति । कार्यद्रव्यविनाशविशिष्टं कालमपेक्ष्यावयवविभागो नभोदेशविभागमारभत इत्यर्थः । विवक्षेति । एकत्र कालो विशेष्यो(३)ऽपरत्रावयव इति विवक्षावैचित्र्यमित्यर्थः । द्रव्यं त्विति । अवयवविभागो हि सति द्रव्यारम्भकसंयोगे द्रव्ये वा स एव

(१)-संयोगजनक-इति (क) पु० ।-संयोगजन्य-इति (ख) पु०

(२) कर्मणोर्न—इति (ख) पु० ।

(३) विशिष्टो—इति (ख) पु० ।

विभागं जनयति यो द्रव्यारम्भकसंयोगाविरोधी(१)ह्यङ्गुरीतरुविभागादौ तथा(२) दर्शनादिति भावः । (३)नन्ववयवक्रिया द्रव्यानारम्भकसंयोगप्रतिद्वन्द्विनमेव विभागमारभत इत्येवास्तु । न च वेणुदलकर्माणि व्यभिचारः । तस्यापि तथात्वात् । वेणुदलविभागस्तु विभागज एवास्तु । न च क्रियानन्तरमेव वेणुदलविभागदर्शनान्नैवमिति वाच्यम् । वेणुदलाकाशविभागेऽपि तत्त्वापत्तेः ।

मैवम् । यौगपद्यबुद्धेरन्यथासिद्धेः । द्रव्यारम्भकसंयोगाविरोधिविभागजनकं कर्म न तद्विरोधिनं विभागं करोतीत्युक्तत्वात् । तादृशश्च विभागो द्रव्यारम्भकसंयोगविरोधिनं न जनयतीति कमलदलविभाग एव सिद्धत्वात् । अन्यथा सर्वत्र तन्नाशप्रसङ्गात् । न च कर्मणो विशेषोऽध्यक्षः किन्तु विभागयोर्वैलक्षण्यात् कल्प्यः । तथा च परस्परासंभिन्नावेव विशेषाविति क्व सांकर्यम् । वंशदलकर्मणः प्रथमोपस्थितदलद्वयविभागमेव प्रति कारणत्वमित्यप्याहुः । न च वंशैकदलकर्मणा दलयोर्जनितो विभागो निःकर्मदलाकाशविभागमपि जनयेदविशेषादिति वाच्यम् । तत्र चरणाद्यवष्टम्भस्यैव प्रतिबन्धकत्वात् ।

उत्पत्तेरनन्तरमिति । वस्तुतः कालान्तरेऽप्येकस्य कर्मणो

(१) संयोगाविरोधी—इति (ख) पु० ।

(२) तथा—इति नास्ति—इति (क) (ख) पु० ।

(३) नन्ववयवे क्रिया—इति (ख) पु० ।

न विरुद्धजातीयविभागजनकत्व(१)मिति भावः। नन्ववयवान्तराद्विभागं कुर्वत एव कर्मणः कमलदलाकाशादिग्देशविभागजनकत्वादवयवान्तराद्विभागमकुर्वदित्ययुक्तमिसत आह—द्रव्यारम्भकसंयोगेति। अपेक्षाकारणमिति। निरपेक्षकत्वे कर्मत्वप्रसङ्गादित्यर्थः। ननु संयोगनिरूपणावसर एव संयुक्तसंयोगस्य व्यवस्थापनादिदानीमप्रकृतं तद्व्यवस्थापनं पुनरुक्तं चेत्यत आह–नन्विति(२)। यथैवमिति। अवयवचलनादिसामग्री यद्यवयविचलनादिसामग्र्यव्याप्या न स्यादित्यर्थः। असंयोगित्वादिति। ययोरेव संयोगस्तयोरेव विभागादित्यर्थः। अप्राप्तेरिति।

न चाप्राप्तत्वमेव चलाचलत्वेना(३)पाद्यम्। भूमिसंयुक्ते वृक्षे चलत्यपि भूमेरचलत्वदर्शनादनैकान्तिकत्वात्(४)। गुणादावपीति(५)। चलाचलत्वेना(६)समवेतत्वे साध्येऽनैकान्तिकं चेत्यर्थः। न च द्रव्यत्वेन हेतुर्विशेष्यः। गुणादाविवावयविन्यपि समवायासिद्धेर्बाधात्।

गुणगुणिनोरभेदवाद्याह—एवमस्त्विति। समवाया-

(१) विभागे जनकत्वम्—इति (क) (ख) पु०।
(२) ननु कारणवर्तिनेति। इति (क) (ख) पु०।
(३) चलनाचलनेना—इति (क) (ख) पु०।
(४) दर्शनेनैकान्तिकत्वात्—इति (ख) पु०।
(५) गुणादाविति—इति (क) (ख) पु०।
(६) चलनाचलनेना—इति (ख) पु०।

सिद्धाविति। गुणगुणिनोरभेदस्य च पूर्वमेव निरासादिति भावः। नन्ववयवे चलत्यवश्यमवयवी चलः तत्र समवेतद्रव्यत्वात्(१) उत्क्षिप्तशरादिवत्। न चाप्रयोजकत्वम्। यस्मिंश्चलत्यपि यद्द्रव्यं न चलति तत्तत्र न समवैति यथा वस्त्रम् उदक इति विपक्षे बाधकात्(२)।

मैवम्। अञ्चले चलत्यपि पटो न चलतीति प्रत्ययेन बाधात्। न च यत्र चले यत्कार्यद्रव्यमचलं(३) तत् पृथगाश्रयाश्रितमिति वाच्यम्। इष्टापत्तेः। अवयवावयविनोः स्वस्वसमवायिकारणे वृत्तेः।

एतावतै(४)वाक्षेपे निरस्तेऽग्रिमप्रबन्धोपयोगार्थमाह—अथेति(५)। परस्परेति।

नन्वेवं तन्तुपटयोरपि युतसिद्ध्यापत्तिः। तयोरन्योन्यपरिहारेणां—शुतन्तुलक्षणपृथगाश्रयसमवायात्।

मैवम्। अंशुतन्त्वोराश्रययोर्मिथः संबद्धत्वेनाप्रत्यासन्नपृथगाश्रयसमवायाभावात्।

अप्राप्तयोरिति। असमवेतयोरित्यर्थः। न चैवमयुतसिद्धानामित्यादिसमवायलक्षणे समवायिसिद्धानामित्यर्थे आत्मा-

(१) समवेतत्वात्—इति (क) पु०।
(२) पक्षे बाधकात्—इति (क) पु०।
(३) यत्कार्यमचलं—इति (ख) पु०।
(४) तावतैव—इति (ख) पु०।
(५) अथ भवत इति (क) (ख) पु०।

श्रयापत्तिः । नित्यसंबन्धत्वस्य(१) समवायलक्षणस्य तेनोक्तत्वात् । ननु विभागनाशे साध्ये उत्तरसंयोगावधिसद्भावादिति हेतुर्व्यधिकरण इत्यत आह—कारक इति । आशुतरविनाशित्वस्यासिद्धिमाशङ्क्याह – उत्तरेति । इष्टापत्तिं निराकरिष्यन् व्यतिरेकदृष्टान्तमुपपादयति—अयमिति(२) । नोदनादीति । आदिपदेनाभिघातसंग्रहः । नोदनं हि नोद्य(३)नोदकसंयोगे सति भवति । स चेद्यत्किञ्चिद्विभागाद्विनश्यति कथमुत्तरकाले नोदनमित्यर्थः । विनाशकारणाभावादिति । संयोगस्येति शेषः । उत्पादेति । अतः संयोगनाशानन्तरं संयोगान्तरोत्पत्तिर्नास्तीत्यर्थः । तत्र कार्यस्येति । अवयवसंयोगादिकार्यस्यावयव्यादेरित्यर्थः ।

कार्यं चेति । यद्यपि विभागस्य ज्ञानसुखादिकमपि कार्यमुत्तरकालभावि संभवत्येव तथापि यो विभागः स उत्तरसंयोगोत्पत्त्यनन्तरं नश्यतीत्याश्रयनाशनाश्ये विभक्तयोर्झटिति संयोगे च दृष्टमतोऽत्रापि तदनुमेयमित्यर्थः । न च कर्मैवेति । यदि कर्मविनाश्यो विभागः स्यात्तदोत्पत्त्यनन्तरमेव नश्येदित्युत्तरविभागो न स्यात् कार्यासमानकालस्यासमवायिकारणत्वाभावादित्यर्थः । ननु तन्तुद्वयविभागवत्तन्त्वाकाशविभागेऽपि तन्तुकर्म-

---

(१) नित्यसम्बन्धस्य लक्षणस्य-इति (क) पु० । नित्यसम्बन्धस्य—इति (ख) पु० ।

(२) अयमाशय इति—इति (क) (ख) पु० ।

( ) नुद्य—इति (क) (ख) पु० ।

THE PRINCESS OF WALES SARASVATI BHAVANA TEXTS.

Edited by

GOPINATH KAVIRAJ, M. A.

No. 1—The Kiraṇāvalī Bhāskara, (किरणावलीभास्कर) [वैशेषिक], a Commentary on Udayana's Kiraṇāvalī, Dravya section, by Padmanābha Miśra.
Ed. with Introduction and Index by Gopinath Kaviraj, M.A. Rs. 1-12

No. 2—The Advaita Chintāmaṇi, (अद्वैतचिन्तामणि) [वेदान्त], by Rangoji Bhaṭṭa,
Ed. with Introduction etc. by Nārâyaṇa S'āstri Khiste Sāhityāchārya. Rs. 1-12

No. 3—The Vedānta Kalpalatikā, (वेदान्तकल्पलतिका) [वेदान्त], by Madhusūdana Sarasvatī.
Edited with Introduction etc. by Rāmājñā Pāṇḍeya Vyākaraṇāchārya. Rs. 1-12

No. 4—The Kusumānjali Bodhanī, (कुसुमाञ्जलिबोधिनी) [न्याय], a Commentary on Udayana's Theistic Tract, Nyāya Kusumānjali, by Varadarāja.
Ed. with Introduction etc. by Gopinath Kaviraj, M.A, Rs. 2-0

No. 5—The Rasasāra (रससार) [वैशेषिक], a Commentary on Udayana's Kiraṇāvalī, Guṇa Section, by Bhaṭṭa Vādīndra.
Ed. with Introduction etc. by Gopīnath Kaviraj, M.A. Rs. 1-2

No. 6—(Part I)—The Bhāvanā Viveka (भावनाविवेक) [मीमांसा], by Maṇḍana Miśra, with a Commentary by Bhaṭṭa Umbeka.
Ed. with Introduction etc. by M. M. Gaṅgānātha Jhā, M. A., D. Litt. Rs. 0-12

No. 6-(Part II)—Ditto Ditto Rs. 0-12

No. 7-(Part I)-The Yoginīhṛdaya dipikā, (योगिनीहृदयदीपिका) [तन्त्र], by Amṛtānanda Nātha, being a Commentary on Yoginīhṛdaya, a part of Vāmakeśvara Tantra.
Ed. with Introduction etc. by Gopīnath Kaviraj, M.A. Rs. 1-8

No. 7—(Part II) Ditto Ditto Rs. 1-4

No. 8—The Kāvyaḍākinī (काव्यडाकिनी) [काव्यशास्त्र], by Gaṅgānanda Kavīndra.

Ed. with Introduction etc. by Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 0-10

No. 9—(Part I)-The Bhakti Chandrikā (भक्तिचन्द्रिका) [भक्ति], a Commentary on S'āṇḍilyas Bhaktisūtras, by Nārāyaṇa Tīrtha.
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A. Rs. 0-15

No. 10-(Part I)-The Siddhāntaratna, (सिद्धान्तरत्न) [गौडीयवैष्णवदर्शन], by Baladeva Vidyābhūṣaṇa.
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A. Rs. 1-2

No. 10-(Part II)—Do. Do. Rs. 2-12

No. 11-The S'rī Vidyā Ratna Sūtras, (श्रीविद्यारत्नसूत्र) [तन्त्र], by Gauḍapāda, with a Commentary by S'aṅkarāraṇya.
Ed. with Introduction etc. by Nārāyaṇa S'āstrī Khiste, Sāhityāchārya. Rs. 0-9

No. 12-The Rasapradīpa, (रसप्रदीप) [अलङ्कार], by Prabhākara Bhaṭṭa.
Ed. with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya. Rs. 1-2

No. 13-The Siddhasiddhānta Saṅgraha, (सिद्धसिद्धान्तसंग्रह) [नाथमार्ग], by Balabhadra.
Ed, with Introduction by Gopinath Kaviraj, M. A. Rs. 0-14

No. 14-The Triveṇikā, (त्रिवेणिका) [अलङ्कार], by Āśādhara Bhaṭṭa.
Ed. with Introduction by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 0-14

No. 15-(Part I)-The Tripurārahasya. (Jñāna Khaṇḍa) (त्रिपुरारहस्य, ज्ञानखण्ड) [तान्त्रिकदर्शन],
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A Rs. 0-14

No. 15-(Part-II)—Do. Do. Rs. 2-4

No. 15-(Part III)—Do. Do. Rs. 2-0

No. 15-(Part IV)—Do. with Introduction, etc. by Gopinath Kaviraj, M. A.

No. 16-The Kāvya Vilāsa, (काव्यविलास) [अलङ्कार], by Chirañjīva Bhaṭṭāchārya.
Ed. with Introduction etc. by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 1-2

No. 17-The Nyāya Kalikā, (न्यायकलिका) [न्याय], by Bhaṭṭa Jayanta.
Ed. with Introduction by M. M. Gaṅgānātha Jhā, M. A. D. Litt. Rs 0-14

No. 18-(Part I)-The Gorakṣa Siddhānta Saṅgraha. (गोरक्षसिद्धान्त-संग्रह) [नाथमार्ग],
Ed. with a Prefatory Note by Gopinath Kaviraj, M. A., Rs. 0-14

No. 19-(Part. I)-The Prākṛita Prakāśa (प्राकृतप्रकाश) [प्राकृतव्याकरण], by Vararuchi with the Prākṛita Sañjīvanī by Vasantarāja and the Subodhinī by Sadānanda.
Ed. with Prefatory note etc. by Batuk Nath S'armā, M. A. and Baladeva Upādhyāya, M. A. Rs 2-4

No. 19-(Part.II) Ditto Ditto Rs. 2-12

No 19—(Part. III) Introduction etc. (In Preparation.)

No. 20-The Mānsatattvaviveka (मांसतत्त्वविवेक) [धर्मशास्त्र], by Viśvanātha Nyāyapañchānana Bhaṭṭāchārya.
Edited with Introduction etc. by Pandit Jagannātha S'āstri Hoshing Sāhityopādhyāya, with a Foreword by Pandit Gopi Nath Kavirāja, M. A., Principal, Government Sanskrit College, Benares. Rs. 0-12

No. 21-(Part I) The Nyāya Siddhānta Mālā (न्यायसिद्धान्तमाला) [न्याय], by Jayarāma Nyāya Pañchānana Bhaṭṭāchārya.
Edited with Introduction etc. by Dr. Mangal Deva S'āstrī, M. A., D. Phil. (Oxon), Librarian, Govt. Sanskrit Library, Sarasvati Bhavana, Benares. Rs. 1-4

No. 21-(Part-II) Ditto Ditto Rs. 2-0

No. 22-The Dharmānubandhi S'lokachaturdaśī (धर्मानुबन्धिश्लोक-चतुर्दशी) [धर्मशास्त्र], by S'ri S'eṣa Kṛṣṇa with a Commentary by Rāma Pandit.
Edited with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya, Assistant Librarian, Government Sanskrit Library, Saraswati Bhavana, Benares. Rs. 1-0

No. 23-The Navarātrapradīpa (नवरात्रप्रदीप) [धर्मशास्त्र], by Nanda Pandit Dharmādhikārī.
Ed. with Introduction etc. by Vaijanātha S'āstrī Varakale, Dharmaśāstra-S'āstrī, Sādholāl Research Scholar, Sanskrit

College, Benares, with a Foreword by Pândit Gopinath Kaviraj, M. A., Principal, Government Sanskrīt College, Benares. Rs. 2-0

No. 24–The S'rī Rāmatāpinīyopaniṣad (रामतापिनीयोपनिषद्) [उपनिषद्], with the Commentary called Rāma Kāśikā in Pūrvatāpinī and Ānandanidhi in Uttaratāpinī by Ānandavana.
Ed. with Introduction etc. by Anantarāma S'āstrī Vetāla Sāhityopādhyāya, Post-Āchārya Scholar, Govt. Sanskrit College, Benares, with a Foreword by Pandit Gopī Nātha Kavirāja, M. A., Principal, Government Sanskrit College, Benares. Rs 3-12

No. 25–The Sāpiṇḍyakalpalatikā (सापिण्ड्यकल्पलतिका) [धर्मशास्त्र], by Sadāśivadeva alias Āpadeva with a commentary by Nārāyaṇa Deva.
Edited with Introduction etc. by Jagannātha S'āstrī Hośiṅga, Sāhityopādhyāya, Sādholāl Research Scholar, Govt. Sanskrit College, Benares. Rs. 1-4.

No. 26–The Mṛgāṅkalekhā Nāṭikā (मृगाङ्कलेखानाटिका) [नाटिका], by Viśvanātha Deva Kavi.
Edited with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya, Asst. Librarian, Government Sanskrit Library, Benares. Rs. 1-0

No. 27–The Vidvachcharita Panchakam (विद्वच्चरितपञ्चकम्) [निबन्ध], By Nārāyana S'āstri Khiste, Sāhityacharya, Assistant Librarian, Govt. Sanskrit College, Sarasvati Bhavana Library, Benares. With an Introduction by Gopināth Kaviraja, M.A., Principal, Govt. Sanskrit College, Benares. Rs. 2-0

No. 28–The Vrata Kos'a (व्रतकोश) [धर्मशास्त्र], by Jagannātha S'āstri Hosiṅga Sāhityopādhyāya, late Sadholal Research Scholar, Sanskrit College, Benares. With a Foreword by S'rī Gopinātha Kaviraja, M. A., Principal, Govt. Sanskrit College, Benares. Rs. 4-0

No. 29–The Vṛitti dīpikā (वृत्तिदीपिका) [व्याकरण], By Mauni S'rī Kṛṣna Bhatta.
Edited with Introduction etc. by Pt. Gangadhara S'astri Bhāradvāja, Professor, Govt. Sanskrit College, Benares. Rs. 1-2

No. 30–The Padārtha Maṇḍanam (पदार्थमण्डन) [वैशेषिक], By S'rī Venīdatta.

Edited with Introduction etc. by Pandit Gopāla S'āstri Nene, Professor, Govt. Sanskrit College, Benares. Rs. 0-14

No. 31 (Part I)–The Tantraratna (तन्त्ररत्न) [मीमांसा], by Pārtha Sārathi Mis'ra.
Edited by M. M. Dr. Ganganatha Jha, M. A., D. Litt, Vice-Chancellor, Allahabad University Allahabad. Rs. 1-14

No. 31–(Part II) Ditto. Ditto.
Edited by Pt. Gopāl S'āstri Nene, Govt. Sanskrit College, Benares.

No. 32–The Tattvasāra (तत्त्वसार) [न्याय], by Rākhāldas Nyāyaratna.
Edited with Introduction etc. by Harihara S'astri, Benares Hindu University. Rs. 1-0.

No. 33–(Part I) The Nyaya Kaustubha (न्यायकौस्तुभ) [न्याय], by Mahadeva Puntamkar.
Edited with Introduction etc. by Umes'a Miśra, M. A. Allahabad University, Allahabad. Rs. 3-4

No. 34–(Part I) The Advaita Vidyātilakam (अद्वैतविद्यातिलकम्) [शाङ्करवेदान्त], by S'rī Samarapuṅgava Dikṣita.
With a Commentary by S'rī Dharmayya Dikṣita.
Edited with Introduction, etc, by Ganapati Lal Jha, M. A., Sadholal Research Scholar, Govt. Sanskrit Library, Benares. Rs. 1-4

No. 35–The Dharma Vijaya Nāṭaka (धर्मविजयनाटक) [नाटक], by Bhūdeva S'ukla.
Edited with Introduction etc, by Pandit Nārāyana S'āstri Khiste, Asst. Librarian, Govt. Sanskrit Library, Benares. Rs. 1-4

No. 36–The Ānanda Kanda Champū (आनन्दकन्दचम्पू) [चम्पू], by Mitra Miśra.
Edited, with a Foreword by Gopinath Kaviraj, M. A., by Nanda Kishore Sāhityāchārya, Research Scholar, Sanskrit College, Benares. Rs. 3-8

No. 37–The Upanidāna Sutra (उपनिदानसूत्रम्) [वेद],
Edited with Introduction by Dr. Mangaldeva S'āstri, M. A., D. Phil. Rs. 1-0

No. 38–The Kiranāvali prakās'a didhiti (Guna), (किरणावलीप्रकाशदीधिति) [वैशेषिक], by Raghunāth S'iromani.
Edited by Pandit Badrināth Sāstri, M. A., Lucknow University. Rs. 1-12

No. 39–The Rāma Vijaya Mahākāvya, (रामविजयमहाकाव्य) [काव्य], by Rupanātha.
Edited by Pt. Ganapatilal Jha, M. A. Rs. 2–0

No. 40–(Part I) The Kālatattva Vivechana (कालतत्त्वविवेचन) [धर्मशास्त्र], by Raghunātha Bhaṭṭa.
Edited with a Foreword by Gopinātha Kaviraja M.A. by Nanda Kishore S'arma Sāhityāchārya, Research Scholar, Sanskrit College, Benares. Rs. 4–0

No, 40 (Part II) Do Do

No. 41–(Part I) The Siddhānta Sārvabhauma (सिद्धान्तसार्वभौम) [ज्योतिष], by S'rī Munīsvara.
Edited with Introduction etc. by Jyautiṣâchārya Pandit Murlidhara Thakkura, late Sadholal Scholar, Sanskrit College, Benares. Rs 3–0

No. 42–The Bheda Siddhi (भेदसिद्धि) [न्याय], by Vis'vanātha Panchānana Bhaṭṭāchārya.
Edited with notes etc., by Nyāya Vyākaraṇāchārya Pandit Sûrya Nārāyaṇa S'ukla, Professor, Govt. Sanskrit College, Benares.

No. 43–(Part I) The Smārtollāsa (स्मार्तोल्लास) [कर्मकाण्ड], by S'iva Prasāda.
Edited with Introduction, notes, etc, by Vedāchārya Pandit Bhagavat Prasad Miśra, Professor, Govt. Sanskrit College, Benares.

No. 44–(Part I) S'ūdrāchāra S'iromani (शूद्राचारशिरोमणि) [धर्मशास्त्र].
Edited by Sāhityāchārya Pandit Narayan S'astri Khiste.

No. 45–(Part I) Kiranāvalī Prakāśa (Guna) (किरणावली प्रकाश-गुण) [वैशेषिक], by Vardhamāna.
Edited with a Foreword by Pt. Gopinath Kaviraj, M., A., by Pandit Badrinath S'astri, M. A., Lucknow University.

No. 46–(Part I) Kāvya prakāśa dīpikā (काव्यप्रकाशदीपिका) [अलङ्कार], by S'rī Chaṇḍī Dāsa.
Edited by S'rī S'ivaprasāda Bhaṭṭāchārya, M. A., Professor, Presidency College, Calcutta.

No. 47–Bhedajayaśrī (भेदजयश्री) [माध्ववेदान्त], by S'rī Tarkavāgīśa Bhaṭṭa Venīdattāchārya.
Edited with Introduction etc, by Pandit Tribhuvan prasad Upādhyāya, M. A., Inspector of Sanskrit Pāṭhashalas, United Provinces, Benares.

THE PRINCESS OF WALES SARASVATI BHAVANA STUDIES:

Edited by

GOPINATH KAVIRAJ, M. A.

Vol. I—

(a) Studies in Hindu Law (1) : its Evolution, by Gaṅgānātha Jhā.
(b) The View-point of Nyāya Vaiśeṣika Philosophy, by Gopinath Kaviraj.
(c) Nirmāṇa Kāya, by Gopinath Kaviraj. Rs. 1–12

Vol. II—

(a) Paraśurāma Miśra alias Vāṇī Rasāla Rāya, by Gopinath Kaviraj.
(b) Index to S'abara's Bhāṣya, by the late Col. G. A. Jacob.
(c) S'tudies in Hindu Law (2):—its sources, by Gaṅgānāth Jha.
(d) A New Bhakti Sūtra, by Gopinath Kaviraj.
(e) The System of Chakras according to Gorakṣa nātha, by Gopinath Kaviraj.
(f) Theism in Ancient India, by Gopinath Kaviraj.
(g) Hindu Poetics, by Batuka nātha S'armā.
(h) A Seventeenth Century Astrolabe, by Padmākara Dvivedi.
(i) Some aspects of Vīra S'aiva Philosophy, by Gopinath Kaviraj.
(j) Nyāya Kusumāñjali (English Translation), by Gopinath Kaviraj.
(k) The Definition of Poetry, by Nārāyaṇa S'āstri Khiste.
(l) Sondala Upādhyāya, by Gopinath Kaviraj. Rs. 5

Vol. III—

(a) Index to S'abara's Bhāṣya, by the late Col. G. A. Jacob.
(b) Studies in Hindu Law (3): Judicial Procedure: by Gaṅgānātha Jha.
(c) Theism in Ancient India, by Gopinath Kaviraj.
(d) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinath Kaviraj.
(e) Naiṣadha and S'rī Harṣa by Nīlakamala Bhaṭṭāchārya.
(f) Indian Dramaturgy, by P. N. Pātankar. Rs. 5.

Vol. IV—

(a) Studies in Hindu Law (4): Judicial Procedure: by Gaṅgānātha Jha.
(b) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinath Kaviraj.
(c) Analysis of the Contents of the Ṛgveda-Prātiśākhya, by Maṅgala Deva S'āstrī.
(d) Nārāyaṇa's Gaṇita kaumudī, by Padmākara Dvivedi.
(e) Food and Drink in the Ramayanic Age, by Manmatha natha Roy
(f) Satkāryavāda: Causality in Sāṅkhya, by Gopinath Kaviraj.
(g) Discipline by Consequences, by G. L. Sinha.
(h) History of the origin and expansion of the Aryans. by A. C. Ganguly.
(i) Punishments in Ancient Indian Schools, by G.L. Sinha. Rs 5

Vol. V—

(a) Ancient Home of the Aryans and their migration to India, by A. C. Ganguly.
(b) A Satrap Coin, by Shyamalal Mehr.
(c) An Estimate of the Civilisation of the Vanaras as depicted in the Rāmayaṇa, by Manmatha nātha Roy.
(d) A Comparison of the Contents of the Ṛgveda, Vajasaneya, Taittirīya & Atharvaveda Prātiśākhyas, by Maṅgala Deva S'āstri.
(e) Formal Training and the Ancient Indian Thought, by G.L Sinha.
(f) History and Bibliography of Nyāya Vais'eṣika Literature, by Gopinath Kavirāj.
(g) A Descriptive Index to the names in the Rāmāyaṇa, by Manmatha nātha Roy.
(h) Notes and Queries, (1) Virgin Worship, by Gopinath Kaviraj. Rs. 5

Vol. VI—

(a) Index to S'abara's Bhāṣya, by the late Col. G. A. Jacob..
(b) Some Aspects of the History and Doctrines of the Nāthas, by Gopinath Kaviraj.
(c) An Index etc. the Ramayana, by Manmatha nātha Roy.
(d) Studies in Hindu Law by M. M. Gaṅganatha Jha.
(e) The Mimamsa manuscripts in the Govt. Sanskrit Library (Benares), by Gopinātha Kavirāj.
(f) Notes and Queries, by Gopinātha Kavirāj.

Vol. VII.

(a) Bhāmaha and his Kāvyālaṅkāra, by Baṭukanātha S'armā and Baladeva Upādhyāya.
(b) Some variants in the readings of the Vais'eṣika Sūtras, by Gopinātha Kavirāj.
(c) History and Bibliography of Nyāya Vais'eṣika Literature, by Gopinātha Kavirāj.
(d) An attempt to arrive at the correct meaning of some obscure Vedic words, by Sītāram Joshi.
(e) A comparison of the contents of the Rig Veda, Vajasaneya, Taittiriya, and Atharva Veda (Chāturadhyāyika) Prātis'ākhyas, by Mangal Deva Shāstri.
(f) An Index to the Ramayana, by Manmatha Nāth Roy.
(g) An Index to S'abara's Bhāṣya, by the late Col. J. A Jacob.
(h) Gleanings from the Tantras, by Gopinātha Kavirāj.
(i) The date of Madhusudana Saraswati, by Gopinātha Kavirāj.
(j) Descriptive notes on Sanskrit Manuscripts, by Gopinātha Kavirāj.
(k) A note on the meaning of the word Parārdha, by Umes'a Mis'ra.

Vol. VIII.

(a) Indian Philosophy, by Taraknath Sanyal.
(b) An Index to the Rāmāyaṇa, by Manmatha Nath Roy.
(c) Index to S'abara's Bhāṣya, by the late Col. J. A Jacob.
(d) Hari Svāmi, the commentator of S'atapatha Brāhmana and the date of Skanda Svami the commentator of the Rigveda, by Mangaladeva S'āstri.
(e) Mysticism in Veda, by Gopināth Kaviraj.
(f) The Deva dāsī: a brief history of the Institution, by Manmatha Nātha Roy.

Vol. IX (In progress)

(a) The Life of a Yogin, by Gopinātha Kavirāj.

THE PRINCESS OF WALES SARASVATI BHAVANA STUDIES

(SANSKRIT)

SARASVATALOKA

Edited by

GOPINATH KAVIRAJ, M. A.

Kirana 1 (In progress)

(a) Mangalam, etc, by Nārāyana S'āstri Khiste.

(b) Mimansaka mata samgraha, by Haranchndra Bhaṭṭācharya.

(c) S'rimad Ācharya Mandana Mis'ra by Chinna Swami S'astri

(d) Bhagavato Buddhasya Charitam Upades'as'cha : by Gopinatha Kaviraj

Kirana I (Supplement)

Sanskrita Kavi Parichaya-(Bharavi) by Nanda Kishore Sharma.

Kirana II (In progress)

(a) S'āradā Prasādanam by Nārâyana S'āstri Khiste.

(b) Chūḍāmani Dars'anam by S'as'adhara Tarkachūḍāmani.

To be had of
The Superintendent
Government Press, U. P.,
Allahabad.

VOLUME 2

THE

PRINCESS OF WALES

SARASWATĪ BHAVANA TEXTS

Edited by

Mahāmahopādhyāya

GOPI NĀTH KAVIRĀJA, M. A.

No. 45.

(Part II)

THE

KIRAṆĀVALĪ PRAKĀŚA

(**Guṇa**)

Printed by K. B. Pawagi at the Hitchintak Press,

Ramghat, Benares City

&

Published by

The Superintendent, Printing and Stationery,

Government Press, Allahabad.

1936.

श्रीः

किरणावलीप्रकाशः

(गुणग्रन्थः)

वर्द्धमानविरचितः

लखनौ विश्वविद्यालयाध्यापकेन 'एम. ए.' इत्युपाधिधारिणा
शास्त्र्युपाह्वबदरीनाथ शर्मणा संस्कृतः ।

THE

KIRAṆĀVALĪ PRAKĀŚA

(Guṇa)

BY

VARDHAMĀNA UPĀDHYĀYA

Edited by

Badri Nath Shastri, M. A.,

Lecturer in Sanskrit, Lucknow University (Lucknow).

1936.

Introduction.

No apology is needed at this late hour, I hope, for the publication of Vardhamāna's commentary on Udayana's Kiraṇāvalī (Guṇa section), because the sub-commentary on Vardhamāna's work has already appeared in print in this series. The study of Praśastapādabhāṣya can not be properly undertaken until all the late works which have a bearing, either direct as commentary or sub-commentary or indirect as an independent treatise affiliated to the main stock of the school, on Praśastapādā's masterpiece have been published. The Sūkti, Setu, Vyomavatī, Nyāyakandalī & Kiraṇāvalī have appeared already. If Śrīvatsa's Nyāyalīlāvatī refers to Vallabha's famous work of the same name, it has also come out. The present commentary is on Kiraṇāvalī and is from the pen of Vardhamāna Upādhyāya, son of the great Gaṅgeśa Upādhyāya of Mithilā, author of Tattvachintāmaṇi in four sections and father of the so-called Neo-Logic of Bengal & Mithilā.* The age of Vardhamāna is not precisely determinable, but it is believed that he belonged to the fourteenth century of the Christian era. He is said to have been the author of the following works:—

---

* This Vardhamāna is to be differentiated from an earlier author of the same name associated with the composition (in 1140 A. D.) of Gaṇaratnamahodadhi and also from a later jurist of the same name, son of Bhaveśa and author of Daṇḍaviveka, Dharmapradīpa, etc.

A—In Nyāya.

(1) Nyāyapariśiṣṭaprakāśa, commentary on Nyāyapariśiṣṭa of Udayana.

(2) Nyāyanibandhaprakāśa, com. on Nyāyavārtikatātparyapariśuddhi of Udayana.

(3) Nyayakusumāñjaliprakāśa, com. on Nyāyakusumāñjali of Udayana.

(4) Tattvachintāmaṇiprakāśa, com. on his father's Tattvachintāmaṇi.

(5) Prameyatattvabodha.

B—In Vaiśeṣika.

(6) Kiraṇāvalīprakāśa, com. on Kiraṇāvalī of Udayana.

(7) Nyāyalīlāvatīprakāśa, com. on Nyāyalīlāvatī of Vallabha.

C—In Vedānta.

(8) Khaṇḍanakhaṇḍakhādyaprakāśa, com. on Khaṇḍanakhaṇḍakhādya of Śrī Harṣa.

It is unfortunate that the personal views of Vardhamāna are not available in the form of a separate treatise, but these can be easily gleaned from the numerous commentaries of which he was the author.

It is hoped that students of Indian philosophy, especially those of the Vaiśeṣika System, will find the work highly useful and serviceable in the interpretation of many a knotty passage of Udayana's text.

Lucknow University. } Badrinath Shastri.

णा जन्यतां तन्तुविभागेनैव वा स्वाव्यवहितोत्तरकाल एव तज्जननं स्यादित्यत आह–कारणे चेति(१) । उत्तराविभागस्तन्त्वाकाशविभाग इत्यर्थः । स चेति । तन्तुविभाग इत्यर्थः । अपेक्षाकारणं द्वितन्तुकनाश इत्यर्थः(२) पूर्वसंयोगेति । पूर्वसंयोगस्य तन्त्वाकाशसंयोगस्येत्यर्थः । ननु परमाणुकर्मणा न द्व्यणुकपरमाण्वोर्विभागः तस्य संयोगपूर्वकत्वात् आरम्भकपरमाणुना सह द्व्यणुकस्यासंयोगादित्यत आह–अनारम्भकादिति । अनारम्भकेन परमाणुना सह द्व्यणुकस्य संयोगपूर्वको विभागः सम्भवत्येवेत्यर्थः । विनाशकारणाभावादिति । आश्रयनाशविरोधिगुणान्तराभावादित्यर्थः । कर्मण इति । कर्माजन्ये च विभागे तस्यासमवायिकारणत्वादित्यर्थः । अंशवन्तरविभागमिति । द्रव्यारम्भकसंयोगाविरोधिनमारभ्यारम्भकवादनिषेधादित्यर्थः ।

ननु यत्कर्म द्रव्यारम्भकसंयोगविरोधिविभागजनकं न तत्तदविरोधिविभागजनकमिति न व्यवस्था, किन्तु मूर्तमात्रविभागजनकममूर्तविभागं(३) न जनयतीति । एतावतापि विभागजविभागसिद्धिः(४) । तथाच द्रव्यारम्भकस्यापि(५)

(१) कारणविभागेन हीति–इति (क) (ख) पु० ।

(२) नाशमित्यर्थः—इति (ख) पु० ।

(३) अमूर्तवृत्तिविभागं—इति (क) पु० ।

(४) सिद्धेः—इति (क) पु० ।

(५) द्रव्यानारम्भकस्यापि—इति (क) पु० ।

तन्त्वंश्वन्तरतन्तुसंयोगस्य विरोधी विभागो द्रव्यारम्भकसंयोगविरोधिविभागजनकेन कर्मणा जन्यताम् मूर्तवृत्तित्वात्(१) न त्वाकाशतन्तुविभागोऽमूर्तवृत्तित्वादित्याशङ्क्य निराकरोति—**मूर्त्तामूर्त्तेति** । प्रत्यक्षेण तथा सहचारानवसायाद्व्याप्तौ मानाभावादित्यर्थः । **मूर्त्तेति**(२) । यदि नैवं तदा पद्मपत्रकर्मणाप्याकाशविभागो न स्यादिति(३) । तत्रापि विभागजविभागोऽङ्गीक्रियेतेत्यर्थः(४) । **आपरमाण्वित्ति** । साक्षात्परम्परासाधारणद्रव्यारम्भकसंयोगविरोधित्वमात्रस्य विवक्षितत्वादित्यर्थः । **तस्मादिति**(५) ।

ननु द्वितन्तुकारम्भकांशुसंयोगस्य द्वितन्तुकपटे नासमवायिकारणत्वं समवायिकारणवृत्तेरेव तथात्वात् । नापि समवायितया । आरभ्यारम्भकवादनिषेधेन पटं प्रत्यंशूनामतत्त्वात् । नापि निमित्ततया । तन्तुत्वेनैवान्यथासिद्धत्वात् । तथाच द्रव्यासमवायिकारणतन्तुसंयोगविरोधिविभागजनककर्मणः कथमसमवायिकारणेतरसंयोगविरोधिविभागजनकत्वं विरोधात् ।

अत्राहुः । अंशुसंयोगः पटनिमित्तकारणम् । न च तत्र मानाभावः । अवयवावयवसंयोगविशेषादपि कार्यविशेषदर्शनात् ।

---

(१) मूर्तमात्रवृत्तित्वात्—इति (क) पु० ।
(२) मूर्तविभागजनकत्वेनेति—इति (क) पु० ।
(३) न जन्येतेति—इति (क) पु० ।
(४) नाङ्गीक्रियेतेत्यर्थः—इति (क) पु० ।
(५) तस्माद्द्रव्यारम्भकेति-इति (क) पु० ।

अकारणविशेषस्य च कार्यविशेषत्वात् । अतस्तदाश्रया अंशवोऽपि तत्कारणानि संयोगमात्रस्याकारणतया संयोगिविशेषितस्य तस्य कारणत्वात् । अन्यथा संयोगेनान्यथासिद्धमिन्द्रियाद्यपि प्रत्यक्षादौ कारणं न स्यात् । द्रव्यारम्भकसंयोगविरोधित्वेन च द्रव्यमात्रस्य निमित्तकारणसाधारणतया विवक्षितत्वात् । एतल्लभ्यत इति । क्रमेण तन्तोरंशुकर्म्मांशुविभागारम्भकसंयोगनाशतन्तुनाशाः । अंशुकर्मकाले वीरणे कर्म्म । ततो विभागस्ततः संयोगनाशोऽथोत्तरदेशसंयोग इत्युभाभ्यां स्वाश्रयनाशोत्तरदेशसंयोगाभ्यां तन्तुवीरणविभागो नाश्यत इत्यर्थः ।

परत्वनिरूपणावसर एवापरत्वनिरूपणमुपपादयति । **परस्परेति** । परत्वापरत्वयोरन्योन्यमाश्रयमवधिमपेक्ष्यैवोत्पत्तेः । परस्परसामग्रीनैयत्यात् । परस्परोत्पत्तित्ववद्व्यवहारविषयत्वज्ञापनमेव व्युत्पत्तिवैषम्यमित्यर्थः । मिलितस्यासम्भवं निराकुर्वन्नाह—**यथायथमिति** । निमित्तत्वमदृष्टादिष्वतिव्याप्तं मत्वाह—**यद्विशिष्ट इति** । **लक्षणमिति** । यद्यपि दिक्कृतकालकृतपरत्वापरत्वयोः शब्दमात्रसाधारण्यात् परापरव्यवहारयोर्नैकत्वम् अपेक्षाबुद्धिजन्याविभुवृत्तिमात्रवृत्तिगुणत्वव्याप्यजातिमत्त्वञ्च न लक्षणं परस्परलक्षणस्य परस्परास्मिन्नव्याप्तेः । तथापि शृङ्गग्राहिकया व्यक्तिविशेषं निर्दिश्य एतद्वृत्तिगुणत्वव्याप्यजातिमत्त्वं लक्षणमेकैकस्य । न च तादृशजातौ मानाभावः । सामग्रीवैलक्षण्येन कार्यवैजात्यस्यावश्यकत्वात् । दिक्कालकृतयोः परत्वयोरपरत्वयोश्चाल्पीयस्त्वविषयापेक्षाबुद्धिजन्यमूर्त्तमात्रगुणत्वेनोपाधिना एकगुणत्वम् । प्रमाण-

श्चेति। उक्तमेव प्रत्यक्षमित्यर्थः। ननु किञ्चिदवध्यपेक्षसंयुक्तसंयोगभूयस्त्वाल्पीयस्त्वविषयापेक्षाबुद्धिजन्यत्वात् परत्वापरत्वयोरावश्यकत्वाल्लाघवाच्च ताभ्यामेव परापरव्यवहारौ स्तां किं गुणान्तरकल्पनयेत्याह—**संयुक्तसंयोगेति**। प्रमातर्यपीति। ननु तादृशसंयोगाश्रयत्वे यत् प्रतीयात् तत्र परापरव्यवहारो न तु तदवधित्वेन प्रतीयमाने। प्रमातापि यदा तादृशसंयोगाश्रयत्वेन ज्ञायते न त्ववधित्वेन तदा प्रमातर्यपि वाराणसीतः परोऽहमिति व्यवहारो भवत्येव। अत एवान्यत्राप्यवधौ संयुक्तसंयोगाविशेषेऽपि न परत्वाद्युत्पत्तिः। तथाच यदेव परत्वाद्युत्पत्तौ नियामकं तदेव व्यवहारनिमित्तमस्तु।

अत्राहुः। प्रमातात्मा न शरीरमिति विभुत्वात्तत्र व्यवहारानास्पदेऽपि तादृशसंयोगाश्रयत्वेन परव्यवहारापत्तिः। न च मूर्त्तत्वमपि तद्व्यवहारनिमित्तमस्तु। संयोगस्य सावधित्वाभावात्। इदमस्मात् संयुक्तमित्यप्रतीतेः। परत्वादेस्तु सावधित्वेन प्रतीतेः। परत्वादेरेकवृत्तितया प्रतीतेर्व्यासज्यवृत्तिसंयोगाद्भेदात्। संयोगभेदापरिगणनेऽपि परव्यवहाराच्च।

अन्ये तु संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वे नाकाशादिदेशापेक्षया, तेषामविशिष्टत्वादतीन्द्रियत्वाच्च। किन्त्वालोकादिमध्यवर्त्यपेक्षया। तथाचैकदिगवस्थितयोरेव द्वयोरेकस्य घनतरालोकवर्त्तिनः संयुक्तसंयोगस्य भूयस्त्वे यदपरत्वं विरलालोकमध्यवर्त्तिनः संयुक्तसंयोगाल्पीयस्त्वे यत् परत्वमुत्पद्यते तन्न स्यादित्याहुः।

ननु व्यवहारेति। अज्ञातात् कारणात् कार्योत्पत्तिनियमो

भवति व्यवहारविशेषश्च व्यवहर्त्तव्यविशेषं विना नेत्यर्थः। एवं सत्यनुमानमप्याहुः। घटः समानाधिकरणसंयोगासमवायिकारणकैकवृत्तिगुणवान् मूर्त्तत्वात् पार्थिवपरमाणुवत्। दृष्टान्ते तादृशो गुणः पाकजो गन्धादिः।

अयं पार्थिवः परमाणुरेतद्वृत्तिविशेषगुणभिन्नसंयोगासमवायिकारणकैकवृत्तिगुणाश्रयः पार्थिवत्वात् पार्थिवान्तरवदिति न युक्तम्। एकेनापरस्यान्यथासिद्धावुभयासिद्धेः। दिक्कालकृतत्वं कार्यमात्रस्येत्यतोऽन्यथा व्याचष्टे—**दिक्संयोगेति**।

दिश एकत्वाद्विशेषासम्भव इत्यन्यथा व्याचष्टे—**दिग्विशेषः कालादिति**।

दिशः स्वापेक्षया न विशेषः किन्तु कालापेक्षयेत्यर्थः।

एवमिति। कालस्यापि दिगपेक्षया विशेषो न स्वापेक्षयेत्यर्थः।

दिशि विशेषो दिगुपाधिलक्षणः।

ननूत्पत्त्यभिधानप्रतिज्ञा व्यर्था, उत्पत्तेरेवाभिधातुं युक्तत्वादित्यत आह—**शिष्याणामिति**। ननु परत्वाधार इत्ययुक्तमपेक्षाबुद्ध्यनन्तरं परत्वाद्युत्पत्तेरित्यत आह—**भविष्यादिति**।

तर्हि कारणाविशेष इति। दिक्कृतकालकृतपरत्वापरत्वयोः कार्ययोः कारणे विशेषाभावात् कथं विशेष इत्यर्थः।

न हीति। दिक्कृतपरत्वादिविलक्षणपरत्वाद्यनुमेयत्वात् कालस्येत्यर्थः।

अवर्त्तमानस्येति। यद्यप्यविद्यमानस्य समवायिकारणत्वाभावेऽपि अवधित्वेन दोषाभावः, मृतापेक्षया वर्त्तमानस्य परत्वादि-

व्यवहारात् । तथापि परत्वापरत्वयोः परस्पराश्रयणवधीकृत्यैवोत्पादादविद्यमानस्य समवायिकारणाभावेऽवधित्वस्याप्यभावात् । मृतापेक्षया च वर्त्तमाने परत्वादिव्यवहारस्तथाविधापेक्षाबुद्धिविषयत्वगुणनिबन्धनः ।

ननु कालकृतपरत्वापरत्वयोर्मानाभावः । तथाहि परत्वापरत्वाश्रयाभिमतावच्छेदकाद्यसूर्यक्रिया प्रागभावसमानफलत्वालम्बना वा (?) अपरत्वधीस्तु परत्वाधाराभिमतपिण्डसमानकालपदार्थध्वंसकालोत्पत्तिमत्त्वविषया तदुत्पत्तिकालाश्रयत्वे तदुत्तरकालत्वविषया वास्तु किं ताभ्याम् ।

मैवम् । प्रागभावोत्पत्त्यास्तदानीमतीतत्वे परत्वापरत्वयोर्वर्त्तमानताभावानुपपत्तेः । इदानीमयमेतस्मात् पर इति वर्त्तमानताभानात् प्रागभावादेरवध्यनिरूप्यत्वेन परत्वादेश्च सावधित्वेन तद्भिन्नत्वात् ।

केचित्तु । प्रतियोग्यन्यूनानतिरिक्तकालीनावधिकसामवायिक्रयावत्परत्वाश्रयसमानकालीनकादाचित्काभावत्वं प्रागभावत्वम् । अतः परत्वेनैव प्रागभावनिरूपणान्न तेनैवान्यथासिद्धिरित्याहुः ।

तन्न । गन्धानाधारकालानाधारत्वाभावेन प्रागभावनिर्वचनात् ।

बहुतरतपनेति । यत्प्रागभावावच्छेदकक्षणावच्छिन्नजन्म यदपेक्षया तद्विप्रकृष्टं यज्जन्मावच्छेदकक्षणध्वंसक्षणाधिकरणजन्म यदपेक्षया तत्सन्निकृष्टमित्यर्थः ।

अत्र केचिदाहुः । जन्मान्तर्भावो व्यर्थः । बहुतरतपनपरिस्पन्दावच्छिन्नत्वबुद्धेरेव परत्वोत्पादकत्वात् । एवञ्चानित्यद्रव्यापेक्षया

नित्यद्रव्येऽपि तादृशापेक्षाबुद्ध्या परत्वमुत्पद्यते । ज्येष्ठेऽतीते चिरं जीवतः कनिष्ठस्य न परत्वोत्पत्तिः । तत्प्रागभावकालावच्छिन्नत्वबुद्धेरेव परत्वोत्पादकत्वादिति ।

विप्रकृष्टत्वेनेति । परत्वापरत्वयोरुत्पत्तिक्षणानव्यवहितप्राक्क्षणवृत्तिविप्रकृष्टत्वसन्निकृष्टत्वाभ्यां प्राप्तत्वादित्यर्थः ।

तस्मादिति । द्रव्यनाशापेक्षाबुद्धिनाशयोरभावात् । पारिशेष्येण संयोगनाश एव परत्वादिनाशक इत्यर्थः ।

यद्यपीति । एताभ्यां पर्यायशब्दाभ्यामभिधेया बुद्धिरित्यसाधारणतया व्यवच्छेदकत्वात् पर्यायाभिधानमपि लक्षणम् । यद्यपि सङ्केतमात्राधीनप्रवृत्तयः शब्दाः सर्वत्र संभवन्ति तथापि प्रादेशिकस्य सङ्केतस्यातथात्वेऽपि सर्वजनीन ऐश्वरः सङ्केतः शक्नोति बुद्धिं व्यवच्छेत्तुम् । तेनापि करणव्युत्पत्त्या बुद्धिज्ञानशब्दौ यद्यपि मनसि वर्त्तेते तथापि भावव्युत्पत्त्यात्र लक्षणम् । ननु बुद्धिज्ञानशब्दौ चैत्रादिपदवत् यत्र सङ्केत्येते तत्रातिव्याप्तिः । द्वादशेऽह्नि पिता नाम कुर्यादिति सामान्येन रूपेण तस्यापीश्वरसङ्केतविषयत्वादिति चेत् । बुद्धिज्ञानशब्दद्वयवाच्यत्वस्य विवक्षितत्वात् । द्वादशेऽह्नि पिता नाम कुर्यादित्यत्र विधेयगतसंख्यात्वेनैकत्वस्य विवक्षितत्वे नामद्वयस्यैकत्र तात्पर्यागोचरत्वात् ।

यद्वा । पर्यायशब्दाभिधानेन बुद्धिरिति लक्ष्यनिर्देशः । ज्ञानपदस्य स्वप्रवृत्तिज्ञानत्वनिमित्तज्ञानत्वजातौ तात्पर्यं तेन ज्ञानत्वं लक्षणम् । तत्सिद्धिश्चानुगतबुद्धेराश्रयासिद्धिं निवारयति ।

तस्मिन् सतीति । न च ज्ञानग्रहणसामग्र्यास्तद्ग्रहणोत्तर-

मपि सत्त्वादेकज्ञानधीपरम्परया विषयान्तरसञ्चारो न स्यात् । विषयान्तरधीसामग्र्याः प्रतिबन्धकत्वात् । कार्यदर्शनेन तथा कल्पनात् । सांख्या हीति । प्रथमः परिणाम आद्या विकृतिः । सत्त्वरजस्तमःसाम्यरूपायाः परिणामिन्याः सत्त्वभेदः प्रथमः परिणामो बुद्धिरन्तःकरणभेदः । सांख्यानां बुद्धिमनोऽहङ्कार-भेदेन तत्त्रैविध्यात् ।

बुद्धेरिति । बुद्धेस्त्रयोंऽशाः पुरुषोपरागविषयोपरागव्यापारा-वेशभेदात् । मयेदं कर्त्तव्यमित्यध्यवसायात् । तत्र मयेत्यतात्त्विको महच्चेतनयोर्भेदाग्रहादेकत्वाभिमानः पुरुषोपरागः ।

नीलादिष्विन्द्रियसन्निकर्षात् तत्स्वभावस्य महत्तत्त्वस्य नीला-द्याकारपरिणतिभेदोत्पादो मलदर्पणसम्बन्धवत् पारमार्थिको विषयोपरागः । पुरुषोपरागविषयोपरागाभ्यां कर्त्तव्यविषयस्य प्रतिभासात्तदधीनः करोमीत्यध्यवसायो व्यापारावेशः । तत्राद्योंऽशो बुद्धिर्द्वितीयो ज्ञानं तृतीयश्चोपलब्धिरित्यर्थः ।

बुद्धिस्थामिति । बुद्धेर्भावाष्टकसम्पन्नत्वात् सुखादिकं भावनान्तं तद्धर्म इत्यर्थः ।

यदीति । करणव्युत्पन्नस्यान्तःकरणवाचितयास्माभिरुप-गमादित्यर्थः ।

तद्भिन्नान्तःकरणे बुद्धिर्नास्ति मानाभावादित्याह—ततोऽपीति । भावव्युत्पन्नस्य बुद्धिशब्दस्य नान्तःकरणवाचिता, करण-फलयोर्भेदादित्याह—बोध इति । अन्तःकरणस्यातीन्द्रियत्वात् प्रत्यक्षाया बुद्धेर्भेदमाह—स चेति । ननु फलमपि महदन्तःकरणस्य

धर्मो धर्मधार्मिणोश्चाभेदादन्तःकरणाभिन्नं स्यादित्यत आह—अत एवेति । अहं बुद्ध इत्यनुभवस्य सर्वजनीनत्वादित्यर्थः ।

स चायमनुभवो भ्रम इत्याह—न चेति । ननु बुद्धेरात्मधर्मत्वे-ऽनित्यधर्मानाश्रयत्वं कौटस्थाश्रुतिसिद्धं विरुध्यत इत्यत आह—न चैवमिति । नित्यत्वं कौटस्थ्यमनुक्तरूपम् । तच्च धर्मधर्मि-णोर्भेदाद्धर्मानित्यत्वेऽपि न विरुद्धमित्यर्थः ।

एतेनेति । बुद्धेरात्मधर्मत्वव्युत्पादनेन तद्वदभिमान आत्मनि ज्ञानाभिमानः । ज्ञानाभिन्नाया बुद्धेरात्मधर्मत्वे सिद्धे ज्ञानमप्यात्म-वृत्तीति सिद्धमित्यर्थः ।

अधिकामिति । बुद्धेरिति शेषः । परिभाषैवेति । "शब्दमात्रं न त्वर्थोऽधिक" इत्यादिना तस्याः समानतन्त्रनिरासादित्यर्थः ।

स्वरूपकृत इति । साक्षात्कारित्वादित्यर्थः ।

वैयाधिकरण्यं परिहरति—अनन्तार्थत्वादिति । व्यासो विस्तारः ।

यथार्थमिति ।

ननु यथार्थज्ञानत्वं स्मृतावतिव्याप्तं यथार्थानुभवत्वञ्च संशय-विशेषेऽतिव्यापकम्, अन्यतरत्वस्य वाशब्दार्थत्वात्, तस्य क्वाचित् सत्त्वात् ।

न यथार्थनिश्चयत्वम् । यथाऽर्थस्तथा ज्ञानमित्यर्थे यथा-शब्दार्थसादृश्यस्य सर्वथैकदेशाभ्यामव्याप्त्यतिव्याप्तिभ्यामनुपपत्तेः ।

नापि विशेष्यवृत्तिप्रकारत्वं निर्विकल्पकाव्याप्तेः ।

नापि विशेष्यावृत्त्यप्रकारकत्वम् । एकैकविशेष्यावृत्तिनाना-

प्रकारकसमूहालम्बनाव्याप्तेः । न च प्रकारस्यैकविशेष्यवृत्तितया न विशेष्यावृत्तित्वम् । प्रमाऽप्रमारूपसमूहालम्बनाव्याप्तेः ।

न च यावद्विशेष्यावृत्तित्वं विवक्षितम् । एकैकविशेष्यवृत्ते-र्यावद्विशेष्यावृत्तित्वेन समूहालम्बनाव्याप्तेः ।

नाप्यबाधितानुभवत्वम् । बाधस्य प्रमात्वात् । नापि जाति-विशेषः । योग्यवृत्तितया तत्संशयानापत्तेः ।

प्रमात्वस्य नित्यानुमेयत्वात् । प्रत्यक्षत्वादिना सङ्करप्रसङ्गाच्च । उच्यते । यत्र यदस्ति तत्र तस्यानुभवः प्रमा । यद्यत्र नास्ति तत्र तस्यानुभवोऽप्रमा । अत एव रजतमिदमिति ज्ञानमिदन्त्ववति तदनु-भवात् प्रमा । रजतत्वाभाववति तदनुभवादप्रमा । न चाव्याप्यवृ-त्तिप्रमायामव्याप्तिः । भिन्नावच्छेदेन हि तत्र भावाभावयोर्वृत्तिः । तथाच यत्र यस्य भावो न तत्र तस्याभावः । अविद्यायाः पश्चादनुमाने विद्यापूर्वकत्वादिति हेतुः अविद्यायाः प्रथमविभागे लघुप्रतिपत्तिकत्वादिति हेतुः । धर्म्यंशे सर्वधियां यथार्थतया सकल-ज्ञानव्यापकत्वेन विद्याया गुरुप्रतिपत्तिकज्ञानत्वात् । सूचीकटाह-न्यायेनाविद्यायाः प्रथमं विभाग इत्यर्थः ।

अथेति । तर्कस्यायथार्थज्ञानत्वादविद्यायां तद्विभागो युक्त इत्यर्थः ।

संशयात्प्रच्युता इति । संशयो हि दोलायितानेककोटिकः । तर्कस्तु नियतां कोटिमालम्बत इत्यर्थः ।

प्रमाकरणनिष्ठः प्रमाणसहकारी न तु तत्समवेतः । **अविज्ञात-तत्त्व इति** । न विज्ञातं विशेषतो ज्ञातं तत्त्वं वास्तवं रूपं यस्यार्थ-

स्येति विशेषनिषेधात् सामान्यज्ञानलाभे धर्मिज्ञानं संशायकं लभ्यते । **कारणोपपत्तिरिति** । कारणं व्याप्यं तदुपपत्तिराहार्यारोपरूपा । परेणाभ्युपगतस्य हेतोर्निर्वह्नित्वस्य व्याप्यस्य य आरोपस्ततो-ऽनिष्टस्य निर्धूमत्वस्यापसञ्जनं तर्क इत्यर्थः ।

यद्यपि संशयजिज्ञासे अप्यविज्ञाततत्त्वे प्रवर्त्तेते । तथापि प्रमा-णोपपत्तित इति तद्व्यवच्छेदः ।

अनियतजिज्ञासाविच्छेदेनेति । साध्यतदभावविषयक-समकोटिकजिज्ञासा निवृत्तेत्यर्थः ।

संशयस्य त्वनियतजिज्ञासात एव निवृत्तेः । संशयो हि वि-रोधिविषयकतया स्वसमानविषयामनुमितिं प्रतिबध्नाति । न हि वि-रोधिनो ज्ञानस्य निश्चयत्वं तन्त्रं किन्तु ज्ञानत्वमात्रं लाघवात् । एवं तज्जनिताऽनियतकोटिका जिज्ञासापि तत्प्रतिबन्धिका । तत्प्रतिबन्ध-कत्वे विरोधिविषयत्वमात्रस्यैव प्रयोजकत्वाल्लाघवादिति । तन्निवृत्ति-स्तर्कादित्यर्थः ।

ननु विरोधिविषयत्वेऽपि संशयस्याव्यवस्थितकोटिकतया हीन-बलत्वान्न प्रतिबन्धकत्वम् । अन्यथा तेन प्रतिबन्धादनुमान-वत्तर्कोऽपि न प्रवर्त्तेत । न वा तर्कात् संशयनिवृत्तिः । वैषयिको हि विरोधस्तत्र तन्त्रम् । न च निवर्त्तनीयनिर्वह्नित्वादिकोटिविरुद्ध-विषयो यद्ययं निर्वह्निः स्यान्निर्धूमः स्यादिति तर्कः । अत एव साध्यविरोधिजिज्ञासापि नानुमितिप्रतिबन्धिका । तस्या अपि संश-यवद्धीनबलत्वात् । तृतीयलिङ्गपरामर्शानन्तरं विरोधिजिज्ञासया-नुमितिविलम्बे मानाभावाच्च । न च साध्यैककोटिका जिज्ञासा-

नुमितिहेतुः । सा तर्क्केण कोट्यन्तरेऽनिष्टमुपनयता जन्यते, तद्व्यतिरेकेऽप्यनुमित्युत्पत्तेः ।

मैवम् । कामिनीजिज्ञासोः धूमपरामर्शेऽप्यग्न्यनुमितेर्जिज्ञासाविशेषस्यानुमितिप्रतिबन्धकत्वे विरोधिविषयस्यैव तन्त्रत्वात् । एवं विरोधिनानाविषयस्य जिज्ञासा । तद्बोधकजिज्ञासानुसरणञ्च वास्तवकोटिप्रमाणप्रवृत्तावंशतः परिपन्थि । तत्र कोट्यन्तरे तर्क्केणानिष्टमुपनयता सा जिज्ञासापनीयते । इदमेव वक्ष्यति " न हि कुर्यामित्यादि । "

इह भूतल इति । ननु तर्क्कस्य न प्रत्यक्षानुग्राहकत्वम् । तर्कं विनाप्युन्मीलिताक्षस्याभावधीदर्शनात् तत्प्रामाण्यानुग्राहकानुमानानुग्राहकत्वे तु अनुमान एव तत्त्वम् ।

मैवम् । प्रत्यक्षस्य घटाभाववति भूतले वर्त्तमानस्य विरोधिधीनिरासरूपोऽनुग्रहः क्रियत इति विरोधिधीपूर्वकप्रत्यक्षे सावधारणप्रत्यक्षविशेषे च तर्क्कापेक्षणात् ।

ननु यद्यपि नियतकोटिकजिज्ञासा ज्ञानेष्टसाधनताज्ञानेन जन्यते । तथाप्यन्वयव्यतिरेकाभ्यां तर्क्कोऽपि तद्धेतुः ।

यद्यपि च यथोक्ततर्क्कं विनाप्यनुमितिदर्शनाद्व्यभिचारेण तर्क्कस्तत्र न कारणम् । तथापि पुरुषप्रयत्नसाध्या यत्रानुमानप्रवृत्तिस्तत्रैतादृशस्तर्क्कः कारणम् ।

अनियतकोटीति । तर्क्कस्यारोपिता, व्यवस्थितसत्त्वौपाधिकसत्त्वविषयत्वेनानिश्चायकतया प्रमारूपत्वाभावादित्यर्थः ।

प्रमितहानिरिति । प्रमितस्य धूमस्य हानिरप्रमितस्य निर्द्धू-

मत्वस्योपगम इत्यर्थः । एवमन्यत्रापि । न्यायाङ्गतयेति । संशयवदिति शेषः । विरोधिनानार्थावमर्ष इति ।

नन्वेतत् स्थाणुः पुरुषश्चेति भ्रमेऽतिव्याप्तम् । विरोधे भासमान इति विशेषणेऽपि धूमाभाववानयं यदि धूमवान् स्यात् वह्न्यभाववानपि वह्निमान् स्यादित्यत्र तर्क्केऽतिव्याप्तिः । न च तत्र वह्न्यभावविशिष्टे वह्निवैशिष्ट्यं विषयः । संशये तु तुल्यवदुभयवैशिष्ट्यं विषयः । तथापि विरोध्युभयविशिष्टमिति शब्दजन्यज्ञानेऽतिव्याप्तिः । न च जिज्ञासाजनकं ज्ञानं संशयः । उपेक्षणीयसंशयाव्याप्तेः । योग्यतायाश्च तदवच्छेदकधर्मप्रतीताप्रतीतेः । अनुव्यवसायेऽतिव्याप्तिश्च । नापि स्थाणुर्वा पुरुषो वेति स्मरणाभावात् संस्काराजनकं ज्ञानं संशयः । तथाविधनिश्चयेऽतिव्याप्तेः । तस्यापि किञ्चिदवच्छिन्ने ग्रहः ।

उच्यते । एकस्मिन् धर्म्मिणि विरोधिनानाप्रकारकं ज्ञानं संशयः । न चैतन्निरुक्तजन्यज्ञानेऽतिव्याप्तिः । तत्र विरोधिनानाप्रकारकत्वस्य प्रकारत्वात् । संशये च विरोधिनोरेव प्रकारत्वात् । विरोध्युभयविशिष्टमितिशब्दस्यायोग्यतया ज्ञानाजनकत्वात्तज्जनकत्वज्ञानेऽतिव्याप्त्यभावात्तदेव वा लक्षणम् ।

ननु समानधर्मदर्शनात्तद्भिन्ने धर्म्मिणि कथं संशय इत्यत आह–उभयेति । संशयस्य चेति । ननु कस्यचित् संशयस्य सुखमात्रजनकत्वाद्धर्मजन्यत्वमपि ।

अत्राहुः । संशयो न संसारविरोधी । किन्तु य आत्मगोचरः । संसारविरोधीति दर्शयितुं दुःखपदं संसारे उपचर्य

संसारहेतुत्वेन धर्मस्याप्यधर्मत्वेनाभिधानम्। ज्ञातृधर्मेति। ज्ञातुरपि ज्ञेयत्वात् गोवृषन्यायेन विभागः। भ्रान्तोऽहमिति। यद्यप्ययमात्मधर्मिकः संशयस्तथापि ज्ञानधर्मिक एवोचितः। तथैवोपक्रमात्।

ननु समानधर्मज एव न संशयः। उपलब्ध्यनुपलब्धिविप्रतिपत्तीनामपि संशायकत्वादित्यत आह—एतदुक्तमिति। तद्विषयेऽपि समानधर्मसद्भावं दृष्टान्तेनाह—यथाहीति। व्याहतेति। ननु विप्रतिपत्तिर्विरुद्धधर्मविषयकः शब्दप्रयोगः। कारणेन कार्यस्य लक्षणात्। वादिगतायास्तस्याः परोक्षत्वात्। स च समानधर्मवद्धर्मिनिष्ठत्वेनाप्रतिसन्धीयमान एव संशयहेतुः। न। तस्यापि विषयविषयिभावेन सम्बन्धेन धर्मिनिष्ठतया प्रतिसंहितस्यैव संशायकत्वात्। अन्यथातिप्रसङ्गात्। ननु समानधर्मो न संशयमात्रे हेतुः। व्यभिचारात्। न। तद्विशेषे जातिकृतस्य तस्यासिद्धेः। कारणत्वग्रहात्तत्कल्पनेऽन्योन्याश्रयात्।

किञ्च। न तस्य स्वरूपतः संशायकत्वं किन्तु तत्सहचरितकोटिस्मारकतयेति तत्रैवान्यथासिद्धिः। न च कोटिस्मरणं तद्व्यापारः। केवलाददृष्टादपि कोटिस्मृतेः। अत एव स्मर्यमाणकोटिके संशये तत्कारणत्वमपास्तम्। तस्मात् कोट्युपस्थितिर्धर्मिज्ञानविशेषादर्शनान्येव संशयकारणानि।

मैवम्। उत्कटकोटिकसंशयस्यान्यथासिद्धेः। यत्र कोटौ भूयःसहचरितधर्मग्रहस्तत्रैवोत्कटत्वात्। तथाच तत्र विशेषे तत्कारणत्वादन्यत्रापि तत्र तथा। यद्वा वेगेन गच्छतस्तत्तत्कोटिस्मृतौ विशेषादर्शने च समानधर्मज्ञानाज्ञानयोः

संशयतदभावाभ्यां तत्कारणत्वम्। केवलादृष्टस्मारितकोटिकश्च संशयो नास्त्येव येन तस्य बहिर्भावः स्यात्। सर्वत्र समानधर्मस्यान्वयादिदर्शनात्।

ननु समानधर्मेषु समानशब्दो न सादृश्यार्थः। किन्तु साधारणार्थ इति स्थाणुपुरुषसंशयो न स्यात्। तयोः परिमाणस्यासाधारणत्वात्। तज्जातेश्चाद्रव्यवृत्तित्वात्।

न। जातेरपि परम्परासम्बन्धेन द्रव्यवृत्तेः।

सारूप्यज्ञानादिति। स्थाणुपुरुषसदृशोऽयमिति ज्ञानात् विरुद्धनानाप्रकारकज्ञानस्यैकस्मिन् धर्मिण्यनुभवसिद्धत्वादित्यर्थः।

वाकारार्थश्च विरोधः।

परस्परेति। आरोप्यारोपविषययोर्मिथो भेदार्थं वैधर्म्यमुक्तम्। सामर्थ्यानुपलब्धाविति। तोयजातीयस्य पिपासोपशमनसामर्थ्यानुपलब्धावित्यर्थः।

तद्धेतुत्वासम्भवेनेति। इष्टानिष्टसामर्थ्यानुपलम्भसम्भवेनेत्यर्थः।

अनुपलब्ध इति। आरोपणीय इत्यर्थः।

आरोप्यज्ञानस्यारोपप्रयोजकत्वमुक्त्वारोपविषयज्ञानस्य तत्प्रयोजकत्वमाह—आरोपविषयेति। आरोप्यज्ञानेति। ननु सारूप्यं न सरूपसम्भ्रमहेतुर्मानाभावादिति, ज्ञातस्य तस्य हेतुत्वे तस्य भेदाधिष्ठानतया भेदग्रहात्तदनुपपत्तिः। न साधारणधर्ममात्रग्रहस्यारोप्यस्मारकतया प्रत्यक्षभ्रमे तन्त्रत्वात्। अन्यथा तद्विषयनियमानुपपत्तेः।

न च विशेषाग्रहमात्रं तन्नियामकम् । अगृहीतविशेषेऽप्यसरूपे भ्रमादर्शनात् । अत एव सारूप्यस्यैकदेशकार्त्स्न्ये विकल्पोऽप्यपास्तः । आरोप्योपस्थापकत्वमात्रस्य प्रयोजकत्वात् । एवञ्च स्मर्यमाणारोपे सारूप्यग्रहः कारणम् । पीतः शङ्ख इत्यादौ च नयनादिसम्भिन्नपित्तपीतिमानमनुभूय शङ्खे तदारोपः । किञ्च । नात्र शङ्खे पीतगुण आरोप्यते । किन्तु शङ्खपीतगुणावारोपविषयौ संसृष्टत्वमारोप्यम् । तथाच संसृष्टस्वभावाभ्यां गुणगुणिभ्यां सारूप्यमारोपप्रयोजकम् । तच्चासम्बन्धाग्रहरूपमत्रास्त्येवेत्याह—न च पीतिमातिक्तत्वे इति । संसृष्टत्वस्यारोपे तस्य केवलान्वयितया तत्र विशेषादर्शनादित्यर्थः ।

न चैवं प्रतीतेर्भ्रमत्वानुपपत्तिः केवलान्वयिधर्म्मिविषयज्ञानस्य यथार्थत्वस्य नियमादिति वाच्यम् । संसृष्टविषयत्वे तथात्वे धर्मद्वयप्रकारत्वांशे भ्रमत्वात् ।

नन्वेवं शङ्खपीतगुणौ संसृष्टाविति धीः स्यात् । मैवम् । संसर्गस्य ससम्बन्धिकतया तन्निरूप्यत्वेनोपस्थितपदार्थेनैव तन्निरूपणात् । तथाप्यसंसर्गाग्रहस्य स्वरूपसत एवारोपहेतुत्वादारोप्यारोपविषयसारूप्यस्य च ज्ञातस्योपयोगात् ।

अत्राहुः । यत्र तादात्म्यारोपः तत्र सारूप्यं ज्ञातमुपयुज्यते संसर्गारोपे तु स्वरूपसदेव प्रयोजकमिति भवत्यसंसर्गाग्रहः सारूप्यम् । यद्वा । यत्र सारूप्यमेव दोषस्तत्रारोप्योपस्थापकतया सारूप्यमुपयुज्यते न तु यत्र पित्तादिर्दोषः । तत्रारोप्योपस्थितेरनुभवरूपायाः सम्भवात् । ननु दोषानैसर्गिककार्य-

प्रतिबन्धका न त्वागन्तुककार्यजनका इति । ततो यथार्थज्ञानं मा जनिष्टायथार्थज्ञानन्तु कुत इत्यत आह—**न च दोषा इति** । स्वच्छत्वमभास्वररूपविरहः । व्यूहनं वाजीकरणम् । विष्टम्भनं गतिप्रतिबन्धः । ननु चक्षुर्म्मात्रग्राह्यत्वं पीतादौ तत्सामान्ये चास्तीति तदपि सारूप्यादारोप्येतेत्यत आह—**नियमादृष्टवशादिति** । यथा मण्डूकवसाञ्जनाद्दोषाद्वंश एवोरगभ्रमो नान्यत्रेति नियमस्तथा नियमादृष्टवशादत्राप्यारोपनियम इत्यर्थः ।

पारलौकिकपथदर्शनानुपायत्वात् पाखण्डदर्शनानामाह-**दर्शनप्रतिरूपकेष्विति** । तेष्वेव वेदवृद्धेष्वेव ।

ननु नित्यद्रव्याविषयको भ्रमः केवलान्वय्यत्यन्ताभावप्रतियोगिमात्रविषयको न वेति विप्रतिपत्तृभ्रमः प्रमाविषयाविषयकः भ्रमान्यज्ञानान्यत्वात् आकाशवत् । न चाप्रयोजकत्वम् । तथाहि पुरोवर्त्तिनि रजते च न भ्रमत्वं तयोः सत्त्वात् किन्त्वेतयोर्वैशिष्ट्ये । तच्चासदेव । नेदं रजतमिति च कस्यापि न पुरोवर्त्तिरजते बाध्येते । अपि तु तयोर्वैशिष्ट्यं बाध्यमतो भ्रमे तदुपस्थितिरेव युक्ता । न हि कारणत्वं विषयत्वम् । अतीतत्वादेरपि तत्त्वात् । किन्तु स्वकारणाधीनः स्वभावविशेषः । स चासत्यपि विरुध्यत इत्यत आह-**इह विभ्रम इति** । भ्रमत्वञ्च नासद्विषयत्वं किन्तु सद्विषयत्वेऽपि । विशेष्यावृत्तिप्रकारकत्वात् । **किञ्चासदिति** । नाभावः तत्प्रतियोगि वा प्रमासाधारणत्वात् । नाप्यत्यन्तासदखण्डम् । तद्भाने कारणाभावात् । इन्द्रियाणां सन्निकृष्टार्थबोधकत्वात् । तदभावे व्याप्त्याद्यग्रहेऽनुमानाद्यप्रवृत्तेः । ननु सविषयकोऽयं भ्रमः ज्ञानान्यविषयको

२

न वेति विप्रतिपद्य भ्रमो ज्ञानान्याविषयको भ्रमान्यज्ञानान्यत्वात् व्योमवत्। न चाप्रयोजकत्वम्। तथाहि। यद्यपि रजतादेर्ज्ञानाकारत्वं नानुभवाद्व्यवस्थाप्यम्। स हीदमनहङ्कारास्पदं रजतमादर्शयति न त्वहं रजतमिति। तथापि नेदं रजतमिति बाधकप्रत्ययापनीते बाह्यस्य रजतत्वे ज्ञानस्यैवाकार इति निश्चीयते पारिशेष्यात्। आकारश्चाकारिणोऽभिन्नः भिन्नस्य विषयत्वेऽतिप्रसङ्गात् इत्यत आह—**एव ज्ञानाकारेति**। न च परिशेषः। नेदं रजतं न वा ज्ञानं रजतमिति बाधकस्याविशेषात्। यथा च ज्ञानभिन्नस्य विषयत्वं तथा च समानतन्त्रे व्यवस्थापितम्। ननु विवादाध्यासितानि भ्रमविषयविषयकवाक्यानि वचनदूषणाक्रान्तानि न वेति विप्रतिपद्य तानि तथा तद्विषयकवाक्यत्वात् संप्रतिपन्नवदित्यनिर्वचनीयख्यातिरेवास्त्वित्यत आह **विचारसहेति**। सद्विषयकत्वे बाधकादसद्विषयत्वे चाप्रवृत्तेः सत्त्वासत्त्वाभ्यामनिर्वाच्यतैव विचारासहत्वम्। **तथेति**। इहापि प्रवृत्त्यनुपपत्तिर्दूषिकेत्यर्थः। अनिर्वचनीयत्वञ्च न तावन्निरुक्तिविरहः। इदं रजतं नेदं रजतमित्यादिनिरुक्तेरनुभूयमानत्वात्। नापि सम्यङ्निरुक्तिविरहः। एतन्निरुक्तेरेव सम्यक्त्वासम्यक्त्वयोर्विरोधादिति भावः।

अस्तु तर्ह्यख्यातिः। तथाहि। ज्ञानत्वं व्यधिकरणप्रकारावच्छिन्नवृत्ति न वा, तत्प्रसिद्धिश्च भेदाग्रहप्रसञ्जितायां रजतत्वप्रकारकशुक्तीच्छायामिति विप्रतिपद्य ज्ञानत्वं न विशेष्यावृत्तिप्रकारकवृत्ति ज्ञानमात्रवृत्तित्वात् प्रमात्ववत्। न चेदमप्रयोजकम्। अन्यथाख्यातौ बाधकात् साधकाभावाच्च। तथाहि। प्रत्यक्षेणेद-

मिति शुक्तिर्गृह्यते, दोषात्तस्य शुक्तित्वं न गृह्यते। दोषात् तद्गतविशेषाग्रहात्। तन्मात्रञ्च गृहीतं सादृश्यग्रहात् संस्कारोद्बोधाद्रजतस्मृतिं जनयति। सा च दोषवशात् दुष्टतत्तांशा तत एव ज्ञानद्वयाच्छुक्तौ रजतार्थी प्रवर्त्तेत इत्येवमुपपत्तौ विशिष्टज्ञानोत्पत्तौ मानाभावात्। न चेयं शुक्तिस्तद्रजतमिति भेदाग्रहे प्रवृत्तिः। स्वरूपतो विषयतश्च तयोर्भेदाग्रहस्यापि प्रवर्त्तकत्वात्। लाघवात्त्वयाप्यारोपनियमार्थं तस्योपेयतयावश्यकत्वाच्च। न च रजते प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वादिहापि तत्सिद्धिः। प्रवृत्तिमात्रे भेदाग्रहे सतीष्टपुरोवर्त्तिज्ञानस्य हेतुत्वात् लाघवात् विशिष्टज्ञानस्य सतोऽपि गौरवेणाप्रवर्त्तकत्वादित्यत आह—**अन्यज्ञानादिति**। अयमभिसन्धिः। रजतज्ञानस्य शुक्तिविषयतां विना न तद्विषयकप्रवृत्तिजनकत्वं सर्वैरेवाद्यप्रवृत्तौ लाघवादुपस्थितत्वाच्च ज्ञानं स्वविषये प्रवर्त्तकमित्यनन्यथासिद्धकारणताग्राहकमानेनावधृतत्वात्। सर्वैरेव प्रथमं गृहीतत्वेन तस्य बलवत्त्वादिति। अतिप्रसङ्गं नियामकं शङ्कते—**प्रवर्त्तकज्ञानेति**। अतिप्रसङ्गस्थले भेदग्रहान्न प्रवृत्तिरित्यर्थः।

तर्हि निवर्त्तकस्याभेदाग्रहस्य सत्त्वान्निवृत्तिरपि स्यादिति युगपत् प्रवृत्तिनिवृत्ती स्यातामिति परिहरति—**निवर्त्तकेति**। अभेदग्रहो न प्रवर्त्तको येन तदभावान्निवृत्तिः स्यात्। किन्त्विष्टभेदाग्रहः सत्यरजतेऽपि प्रवर्त्तकः। इयांस्तु विशेषः। क्वचिदसत्त्वादेवेष्टभेदस्याग्रहः क्वचित् सतोऽपि भेदस्याग्रह इति नानियतहेतुकत्वम्। न चेष्टस्थले इष्टभेदाप्रसिद्धेर्न तदभावः। पुरोवर्त्तिनीष्टभिन्नत्वप्रकारकज्ञानविषयत्वाभावस्य प्रवर्त्तकत्वादित्याह—**न वय-**

मिति । प्रवृत्तिस्थले प्रवर्त्तकेष्टभेदाग्रहवन्निवर्त्तकानिष्टभेदाग्रहस्य सत्त्वान्निवृत्तिरपि स्यादित्याह—**अस्मन्नय इति** । यदि चानिष्टाद्भेदग्रहस्तदानिष्ट एवानिष्टभेदग्रहादन्यथाख्यातिः स्यादित्याह—**अन्यथेति** । अथानिष्टाभेदग्रहो निवर्त्तक इति प्रवृत्तिस्थले तदभावान्न निवृत्तिः तदा इष्टाभेदग्रहस्य प्रवर्त्तकस्याभावान्न प्रवर्त्ततापीति शङ्कोत्तराभ्यामाह—**तथापीति** । न च स्वातन्त्र्योपस्थितानिष्टभेदाग्रहो निवर्त्तको न चानिष्टस्याभावविशेषणत्वोपस्थितेर्न्न तद्भेदाग्रहो निवर्त्तक इति वाच्यम् । अभावविशेषणत्वेनोपस्थितेः प्राक् तत्रापि स्वातन्त्र्येणानिष्टोपस्थितेः । यदि च भेदाग्रहात् प्रवृत्तिस्तदा क्वचिदपि विशिष्टज्ञानं न सिध्येत्तत एव सर्वव्यवहारसिद्धेरित्याह—**न च सर्वत्रेति** । अधिकस्तु पल्लवोऽन्वीक्षातत्त्वबोधे तात्पर्यपरिशुद्धिप्रकाशे चास्माभिः कृत इति नेह प्रतायते ।

विशेष इति । उपलब्धे धर्म्मिणि विशेषतोऽनुपलब्धकोटिकमित्यन्वयः । यद्यपि घटोऽयमिति निश्चयोऽप्युपलब्धे धर्म्मिणि घटे भवति, विशेषतश्च नीलः पीत इत्यनुपलब्धकोटिकः । तथाप्यनध्यवसायस्य सामान्यतो विरोध्युभयकोटिकत्वम् । घटोऽयमित्यत्र न तथा । **अत एवायमिति** । विरुद्धनानाप्रकारकमेकधर्म्मिकं ज्ञानं संशयः । अनुल्लिखितनानाप्रकारकमेकधर्म्मिकं ज्ञानमध्यवसायः ।

यद्वा । सामान्यतो विरोधिनानाकोटिकं ज्ञानमनध्यवसायः । ननु पनसः स्विदयमिति ज्ञानं न संशयः । विशेषतो विरोधिकोट्यनुल्लेखात् । नानध्यवसायः । अनुल्लिखितनानाप्रकारकाविरोध्युल्लेखे हि सः । अत्र च पनसस्य तदन्यस्य च किञ्चित्त्वेन कोट्युल्लेखात् ।

अत्राहुः । विशेषतोऽनुल्लिखितनानाकोटिकं ज्ञानमनध्यवसायः । अत्रापि विशेषतः कोट्युल्लेखो नास्ति । किञ्चित्त्वस्य सामान्यरूपत्वात् । किंस्विदित्यत्रापि तथा, विशिष्टस्योभयत्रापि सत्त्वात् । तत्र निश्चयसंशयभिन्ने तादृशज्ञाने किं मानम् । उच्यते । न तावज्जिज्ञासा निर्णयजन्या । अनुच्छेद्यापत्तेः । नापि संशयजन्या । विशिष्टकोटिद्वयानुल्लेखे तदभावात् । ततः संशयाभिन्नाजिज्ञासाजनकं ज्ञानमेषितव्यं तदेवानध्यवसायः ।

व्यासङ्गशब्देनेति । कारणवाचकशब्दस्य तत्कार्ये लाक्षणिकत्वादित्यर्थः। तस्य प्रयोजनत्वमाह-**घटेति** । नन्वेतद्विशेषनिश्चये सत्यपि भवतीत्यत आह—**विशेषनिश्चयाभाव इति** । **मात्रशब्देनेति** । मात्रशब्दस्य सामान्यवाचित्वादित्यर्थः । ननु सामान्येन रूपेण विशेषोऽपि निश्चीयत एवेत्यत आह—**विनिश्चय इति** । तर्हि निश्चयाभावो ज्ञानसामान्याभावेऽप्यस्तीत्यत आह—**निश्चयनिषेधेनेति** । एतदेव विशदयति—**सामान्येन हीति** । तर्ह्यनध्यवसायः कुत्रेत्यत आह—**का पुनरिति** । यद्यपीदं ज्ञानं न भ्रमस्तथाप्यनिश्चयमात्रेणाविद्यात्वम्—**अनुमानविषयेऽपीतीति** । ननु पनसवत् सास्नापि प्रत्यक्षैव प्राणिविशेषसम्बन्धित्वं पनसवत् पदवाच्यत्वं वोभयत्राप्यप्रत्यक्षमेव । न । चेष्टमानावयवस्य यत्राप्रत्यक्षत्वं तस्य विवक्षितत्वात् ।

उपरतशब्दस्य विनष्टमर्थं निवारयति—**स्वकार्यादिति** । तत्र हेतुमाह—**प्रलीनेति** । मनसः प्रलयाभावादाह—**निरिन्द्रियेति** ।

इन्द्रियद्वारेणैवेति। यथेन्द्रियव्यापारजे ज्ञाने चक्षुरादिना जानामीति तथेन्द्रियव्यापाराभावेऽपि चक्षुषा पश्यामीति ज्ञानमित्यर्थः। इवशब्दार्थे सादृश्यमाह—पूर्वज्ञानेति। क्वचिदिन्द्रियद्वारेणैवेति पाठः। तत्र ह्युपरतेन्द्रियवर्गस्य स्वप्नः कथमिन्द्रियद्वारेणैवेत्यत आह— पूर्वज्ञानेति। पूर्वज्ञानप्रत्यवेक्षकृत्वमिन्द्रियद्वारकृतानुव्यवसायः। तेनेन्द्रियद्वारेण यदनुभवनमित्यस्य व्याख्येयग्रन्थस्यायमर्थः। इन्द्रियद्वारेणैव योऽनुभवोऽनुव्यवसीयत इत्यध्याहारात्। एतदेव स्पष्टयति—यत्रासत्यपीति।संविष्टः सुप्तः—तथापीन्द्रियद्वारकृतेति। यद्यप्येतावता स्वप्नानुव्यवसायस्यायथार्थत्वसिद्धौ शय्यायां संविष्टस्तिष्ठामीत्यनुव्यवसायात्मकस्वप्नस्य नायथार्थत्वं सिध्यति। तथापि स्वप्नत्वेन तत्रापि बाधितविषयत्वमनुमेयम् बुद्धिर्न साक्षात् प्रयत्नजननीत्यत आह-इच्छेति।वातादिजन्यशरीरस्पन्दव्यावर्त्तनार्थमाह—चेष्टेति। हृदयान्तर्मनःप्राप्तिं विना मनो न हृदयान्तर्निश्चलं तिष्ठति प्राप्तिपूर्वकत्वादवस्थानस्येत्यर्थः। पूरयति—अन्तर्हृदयं प्राप्येति। ननु निश्चलत्वं स्पन्दशून्यत्वं तिष्ठत्यर्थोऽपि सएवेति पौनरुक्त्यमित्यत आह—सहसैवेति। पूर्वग्रन्थेन सम्बद्धीकर्तुमुक्तं- पुनः सहसैव न चलति। तदेतीति। अत्राप्यदृष्टकारितेति।

ननु शरीरतदवयवक्रियैव प्रयत्नवदात्मसंयोगासमवायिकारणिका प्राणक्रिया तत्प्राणवहनाड्यभिघातादेव। तत्र हि प्रयत्नवदात्मसंयोगासमवायिकारणत्वेऽपि प्राणवहनाडीक्रियायाः प्रयत्नवदात्मसंयोगोऽसमवायिकारणं वाच्यः तस्याश्चेष्टात्वात्। तथा च

तदभिघातादेव प्राणक्रियोपपत्तौ तत्र प्रयत्नवदात्मसंयोगस्यासमवायिकारणत्वे प्रमाणाभावः।

अत्राहुः। प्राणक्रियायां प्रयत्नवदात्मसंयोगस्य नासमवायिकारणत्वं किन्तु कारणत्वमात्रं तच्च परम्परया कारणत्वेऽप्युपपद्यते। एवञ्चात्मप्राणसंयोग इति व्याख्येयग्रन्थस्यायमर्थः। प्राणवहनाड्या सममात्मसंयोगः प्राणक्रियायां परम्पराकारणं नाडीप्राणसंयोगोऽभिघाताख्यः प्राणक्रियायामसमवायिकारणमिति।

एतेनेति। शयनं ज्ञानविशेषः। तत्पदार्थः निरिन्द्रियप्रदेशावस्थितमनःसंयोगासमवायिकारणकं ज्ञानमित्यर्थः।

यद्वा। स्वप्नवहनाडीविशेषसंयुक्तमनोजन्यं ज्ञानमित्यर्थः। यानान्हिकानिति। आह्निकत्वेन दिनभवत्वेन यानर्थान् पश्यतीत्यर्थः। न च ते तथेति। न ते आह्निका इत्यर्थः।

वाराणस्यामिति। वाराणस्यधिकरणकः पुरुषः पाटलिपुत्रे पश्यति, पाटलिपुत्राधिकरणोऽहम्, एते च पाटलिपुत्रीयाः पदार्थाः वाराणसेया इति पश्यतीत्यर्थः। तेनाग्रेतनग्रन्थसामञ्जस्यं भवति। अयमेवमाहेति। यद्यपि लिङ्गोदाहरणप्रस्तावे शब्दोदाहरणं न युक्तं तथापि वैशेषिकाणां शब्दस्यानुमानान्तर्भावात् तथोक्तम्। यद्यपि सर्वत्रेति।

धातुदोषस्य सकलस्वप्नकारणत्वं वैद्यकादवगन्तव्यम्। ननु स्वयमनुभूतेषु प्रसिद्धेष्वित्यत्र पौनरुक्त्यम् अनुभवप्रसिद्धिशब्दयोरेकार्थत्वादित्यत आह—स्वयमनुभूतेषु प्राप्तेष्विति। सम्बद्धेष्वित्यर्थः।

भू प्राप्तावित्यस्यानित्यण्यन्तत्वेन रूपम् । ननु संस्कारधर्माभ्यामित्ययुक्तम् एतज्जन्माननुभूतविषयत्वेन एतज्जन्मसंस्काराभावात् । जन्मान्तरीयसंस्कारस्य च नियतविषये बालस्तनपानादावेव ज्ञानजनकत्वादन्यथातिप्रसङ्गादित्यत आह—**यदि पूर्वेति** । एवञ्च एतज्जन्मन्यननुभूतस्येत्यस्य एतज्जन्मन्यसाक्षात्कृतस्येत्यर्थः सम्पद्यते । एवमग्रेऽपि व्याख्येयम् । अत्यन्तार्थं व्याचष्टे—**आरोपतोऽपीति** । ननु स्वप्नमात्रे संस्कारस्य कारणत्वादत्यन्ताप्रसिद्धे कथं स्वप्न इत्यत आह—**संसर्गविषयश्चेति** । संसृज्यमानस्य प्रत्येकमनुभवोऽस्त्येवेत्यर्थः ।

अत एवेति । संसर्गस्याननुभूतत्वेन स्मृतेरसम्भवात् । पटीयसी बहुतरविशेषावगाहिनीत्यर्थः । स्वप्नस्य प्रत्यक्षयाम्यनुभवामीत्याद्यनुभवाद्बाधकाभावाच्चानुभवत्वमेवेति भावः ।

सामान्यज्ञानं विना न विभागावतार इति सामान्यलक्षणं स्मारयति——**यथार्थेति** । चतुर्विधेत्यनेनैव विभागस्य दर्शितत्वात् प्रत्यक्षेत्यादि पुनरुक्तमित्यत आह—**किंनामधेया इति** । प्रत्यक्षादिविद्याया नेतरव्यावर्त्तकत्वमिति व्याचष्टे—**लक्ष्यत इति** । अक्षाणामप्रतीतानामेव प्रत्यायकत्वाद्व्याचष्टे—**प्रतीत्य प्राप्येति** । अर्थेन सहेन्द्रियप्राप्त्या यज्ज्ञानं जायत इत्यर्थः ।

नन्वेवमव्ययीभावसमासे नपुंसकलिङ्गत्वात् प्रत्यक्षशब्दस्याभिधेयलिङ्गता न स्यादित्यत आह—**तदेतदर्थकथनमिति** । कथं तर्हि समास इत्यत आह—**प्रतिगतमिति** । तेन प्रादिसमासे प्राप्तापन्नालंपूर्वगतिसमासेषु परवल्लिङ्गताप्रतिषेधादभिधेयलिङ्गता सि-

ध्यतीत्यर्थः । अन्ये तु । अक्षं प्रतीति विग्रहे समाससूत्राभाव इत्यत आह—**तदेतादिति** । अक्षपदवत् प्रत्यक्षपदे बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षजिति षच्प्रत्ययान्तस्याक्षिशब्दस्य प्रयोगस्तथा च वासनादिप्रत्यक्षाव्याप्तिरिति शङ्कां निराकर्तुमाह—**अक्षशब्दस्येति** । षडित्यस्य तात्पर्यमाह—**न त्विति** । सांख्यानां कर्मेन्द्रियैः पञ्चभिः सममेकादशेन्द्रियाणि बौद्धानां मनोऽनङ्गीकारात् पञ्चैव तानि, तन्निरासार्थं षट्कीर्तनमित्यर्थः । तत्रेन्द्रियलक्षणं सांख्यानां दूषयति—**उत्कटेति** । यत्तु लक्षणमिन्द्रियाणां तन्न पाय्वादावित्यत आह—**शरीरसंयुक्तमिति** । एतच्च यद्यपि घटादौ शरीरे चातिव्याप्तं, शरीरसंयुक्तत्वस्य शरीरवृत्तिसंयोगाश्रयत्वस्य शरीरे सत्त्वात् । तथापि शब्दव्यतिरिक्तोद्भूतविशेषगुणशून्याकाशसंयुक्तमिन्द्रियलक्षणम् । **तदेतदिति** । **प्रतिगतमक्षमित्यादि** । **स्मृतीति** । स्मृतिरपिमनोलक्षणमिन्द्रियं प्रतिगता, संशयोऽपि चक्षुरादिकं प्रतिगतस्तज्जन्यत्वात् । आदिशब्देनात्मानुमित्यात्मस्मृतीनामप्यात्ममनोलक्षणेन्द्रियार्थसंनिकर्षजत्वात्प्रत्यक्षत्वप्रसङ्ग इत्यर्थः । ईश्वरप्रत्यक्षाव्याप्तिश्चेत्यपि द्रष्टव्यम् ।

न च साक्षात्कारित्वे जातौ मानाभावः । चाक्षुषादिबुद्धौ साक्षात्करोमीत्यनुगतप्रत्ययात् । नापि व्यञ्जकाभावः । गोलकजत्वादेरेव तत्त्वात् । योगीश्वरबुद्धौ च धर्मिग्राहकं मानमेव तद्व्यञ्जकम् । गोत्वादाविव व्यञ्जकेऽननुगमस्यादोषत्वात् । प्रत्युत व्यञ्जकस्यानुगमे तत एवानुगतबुद्ध्युपपत्तौ जातौ मानाभावः । यत्त्वग्रे **एतदस्मदादीनां संयोगिनां त्वित्यादि** वक्ष्यति तज्ज-

न्यमस्मदादीनां योगिनां प्रत्यक्षमभिप्रेत्य।

ननु प्रतिगतमक्षमिति केन सम्बन्धेन साक्षात्त्वस्य लक्षणत्वमित्यनुपपत्तावेकप्रकरणाम्नातत्वमेव सम्बन्धोऽस्तीत्याह—**तत्र बुद्ध्यधिकारेणेति**। महतीत्यत्र महत्त्वं नोपलक्षणं किन्तु विशेषणमित्यभिप्रेत्याह—**तेनेति**। ननु बहिरिन्द्रियजद्रव्यप्रत्यक्षं प्रति महत्त्वोद्भूतरूपवत्त्वयोः स्वरूपयोग्यतावच्छेदकत्वात् दण्डत्ववन्न सहकारित्वमित्यत आह—**अकारणत्व इति**। वस्तुतस्तादृशयोरपि विषयतया सहकारित्वादननुगतत्वेनावच्छेदकत्वादुभयरूपत्वेऽपि न विरोध इति भावः। तथापि यत्र तदुत्कर्षानुविधानं तत्र कारणत्वेऽपि बहिरिन्द्रियजद्रव्यसाक्षात्कारमात्रे तस्य कारणत्वे किं मानम्।

अत्राहुः। यद्विशेषो यद्विशेषप्रयोजकस्तत्सामान्यमसति बाधके तत्सामान्ये प्रयोजकमिति व्याप्तेः अनेकद्रव्यवत्त्वस्य तत्त्वे मानमाह—**न च परिमाणेति**। तथा च परस्पराविनाभूतयोः द्वयोरप्यन्वयव्यतिरेकाभ्यां तुल्यत्वादुभयमपि कारणमित्यर्थः।

वस्तुतो महत्त्वमेव कारणं लाघवात्। अनेकद्रव्यवत्त्वात् कार्यं विनापि तूलकादौ प्रचयस्योत्कृष्टमहत्त्वात् प्रत्यक्षोत्कर्षदर्शनाच्च। दूरस्थकेशादौ राशीभूते द्रव्यान्तरानुत्पादेन महत्त्वाभावेऽप्येककेशस्य सजातीयसंयोगेनानेकद्रव्यवत्त्वं तद्धेतुरिति चेत्। न। समवायेन तस्य प्रयोजकतया संयोगेनातत्त्वात्। दूरस्थग्रहे तस्य सजातीयसंयोगः सहकारीति चेत्। न। महत्त्व एव तथास्तु क्लृप्तत्वाद्विषयस्थं च रूपमुद्भूतं सहकारीत्याह—**रूपं चोद्भूतस्वभावमिति**। उद्भूतत्वं च रूपवृत्तिर्जातिविशेषः।

न च तत्र मानाभावः। इन्द्रियालोकादिप्रत्यासन्नस्यावयविनो वायूपनीतस्य सुरभिद्रव्यस्याप्रत्यक्षत्वेन तिमिरस्थघटवत् साक्षात्कारकारणकिञ्चित्समवधानशून्यत्वानुमानात्। तच्च लाघवात् सामान्यरूपं न द्रव्यवृत्ति। ऊष्मप्रभयोः स्पर्शरूपग्रहे रूपस्पर्शग्रहापत्तेः तदेकार्थसमवायाविशेषात्। रूपस्पर्शयोश्च तद्भेदः। एकस्य ग्रहेऽप्यन्यस्याग्रहात्।

न च रूपत्वादिना जातिसंकरः। तारत्वादिवन्नानात्वात्। रूपादिप्रत्यक्षतायामेकैकोद्भवत्वस्यैव तन्त्रत्वात्। **आलोक इति**। एतच्चाक्षुषप्रत्यक्षमात्रे द्रष्टव्यम्। अन्धकारेऽपि त्वचा द्रव्यग्रहात्। सारूप्यज्ञानं भ्रमोऽपीति व्याचष्ट—**अविपरीतस्येति**। अनारोपितस्येत्यर्थः। **निर्विकल्पकं प्रत्यक्षमिति**। ननु तत्र प्रत्यक्षं न मानमसिद्धेरनभ्युपगमाच्च न व्यवहारः। तस्य सविकल्पकजन्यत्वात्। अथ गौरिति प्रत्यक्षं विशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वादनुमितिवत्। न च परोक्षत्वमुपाधिः। प्रत्यभिज्ञाने साध्याव्यापकत्वात्। नापि विशिष्टविशेषणकत्वम्। पक्षेतरत्वात्। न च प्रतिबन्धासिद्धिः। साध्यादीनां विशेषणतया विशिष्टधीमात्रे विशेषणज्ञानमात्रस्य हेतुत्वात्। न। स्मृतिवत् प्रागनुभवस्य संस्कारद्वारा जनकत्वात्। न चाव्यवहितविशेषणधीजन्यत्वं साध्यम्। प्रत्यभिज्ञाने व्यभिचारात्।

अथ जागराद्यविशिष्टज्ञाने संस्कारोद्बोधकमन्यत्र दृष्टं ज्ञानमेव कल्प्यते। न च तद्विशिष्टज्ञानमेव। तत्रापि विशेषणज्ञानापेक्षायामनवस्थानात्। न संस्कारोद्बोधत्वेन नियतो हेतुरिति।

जागराहेतोरेव तथात्वकल्पनात् ।

मैवम् । प्राथमिकगौरितिप्रत्यक्षस्य जन्यविशिष्टज्ञानत्वात् विशेषणज्ञानजन्यत्वानुमानात् । तज्जन्मनि गोत्वाननुभवेन संस्काराभावात् प्राग्भवीयसंस्कारोद्बोधको गोत्वेन्द्रियसंनिकर्षः कल्प्यते । आद्यप्रवृत्तिवत् सबलादिवदिति चेत् । तर्हि ततो गोत्वानुभव एव स्यात् । अन्यत्र तस्य हेतुत्वकल्पनात् । पूर्वं च विशेषणज्ञानाभावादर्थात्तन्निर्विकल्पकम् । तत्रापि ज्ञानत्वात्तद्विशिष्टज्ञानत्वानुमितिः स्यादिति चेत् । न । कारणबाधेन बाधादनवस्थानाच्च । विशिष्टज्ञानत्वादित्यत्र व्यावर्त्यस्याविशिष्टज्ञानस्याप्रसिद्धिः । ज्ञानत्वं च स्वतोऽसिद्धव्याप्तिकमिति चेत् । न । येन विशेषणेन विना व्याप्तिर्ग्रहीतुं न शक्यते तद्विशिष्ट एव व्याप्तेः । व्यभिचारवारकविशेषणस्यापि सार्थकत्वे तस्यैव तन्त्रत्वात् । अत्रापि विशेषणं विनाऽनवस्थानादव्याप्तेरग्रहात् ।

विशेष्यज्ञानमिति । विशिष्टज्ञानमित्यर्थः । **सहकारिविशेषमिति** विशेषणज्ञानं विशिष्टज्ञाने इन्द्रियार्थयोः सहकारीत्यर्थः । **तुच्छत्वादिति** । व्यावृत्तिमतोऽन्याया इत्यर्थः । **अत एवेति** । वस्तुविषयत्वादेव न निर्विकल्पकोपाधिकं साक्षात्त्वमित्यर्थः । **देशाकालेति** । आकारः स्वरूपम् । तेनाग्रे स्वरूपविपर्यासनिषेधः संगच्छते । कुञ्चिका कपाटोद्घाटको लोहविकारविशेषः । तस्य विवरं तस्य कपाटमध्यसुषिरमित्यर्थः ।

अस्थिरस्य स्थिरत्वेनेत्यादौ यथासंख्यं क्षणभङ्गस्य भङ्गादित्यादि योजनीयम् । **विभ्रमादन्यत्रेति** । इन्द्रियाणां

विषयप्रतिनियमो हि प्रमामात्रे व्यवस्थितिः । अत एव मनसो बहिःस्वप्नजनकत्वं स्मृतिजनकत्वं चेत्यर्थः । कर्मत्वमैन्द्रियकवृत्ति न वेति विप्रतिपत्तावाह—**कर्म प्रत्यक्षमिति** । यदि कर्म न प्रत्यक्षं तदा कथं तत् प्रत्येतव्यमित्यत्राह—**संयोगविभागपरम्परैवेति** । तथा च तत्रैवेन्द्रियव्यापार उपक्षीण इत्यर्थः । युक्तं चैतत् । न हि संयोगविभागाववजानन् कर्म प्रत्येति । रथस्य देशान्तरप्राप्तिं प्रतिसंदधानस्य रथिनो रथो मे गच्छतीति प्रतीतेः । सारथेस्तु देशान्तरप्राप्त्यप्रत्याकलने स्थिरत्वेनैव प्रतीतेः । न च चलतीति प्रत्यक्षात् कर्मविषयेत्याह । **यः पुनरिति** । न च तस्यानुमितित्वमसिद्धम् । कर्मप्रत्यक्षत्वेऽपि पूर्वदेशविभागोत्तरदेशसंयोगाभ्यां तद्व्यञ्जनीयम् । अत एव संयोगविभागौ न प्रत्यक्षौ । तत्र कर्मापि न प्रत्यक्षं भूकम्पादौ । तथा चोत्तरदेशसंयोगे सति कर्म नष्टमेव प्रत्यक्षं च वर्तमानविषयम् । किञ्च संयोगोऽपि ज्ञातो व्यञ्जकः, संयोगे चोत्पन्ने तत्साक्षात्कारः, तदनन्तरं च कर्मसाक्षात्कारदशायामव्यवहितप्राक्कालीनमपि कर्म नास्ति । संयोगसाक्षात्कारकाल एव कर्मणो नष्टत्वात् कर्म कथं प्रत्यक्षमिति भावः ।

व्यभिचारादिति । सुखादिनेत्यर्थः । **समनन्तरसंयोगव्यवहितत्वादिति** । उत्तरदेशसंयोगानिवर्तनीयत्वादित्यर्थः । **व्यभिचारादिति** । विभागेत्यनुषञ्जनीयम् । उत्तरदेशसंयोगव्यङ्ग्यं न कर्म किन्तु पूर्वदेशविभागव्यङ्ग्यमिति नोक्तदूषणावकाशः ।

विभागसाक्षात्कारस्तदुत्पत्त्यव्यवहितोत्तरक्षणे तत्काले च कर्मणः सत्त्वादिति भावः । परमाणुमात्रविवरवृत्तित्वादिति को-

ऽर्थः । किं परमाणुमात्रमेव विवरमवकाशो येषां जलस्यन्दानुमितसूक्ष्मावकाशानाम् अथवा परमाण्वाश्रयाणामित्यर्थः । आद्ये तत एव विभागेन व्यभिचारादेव। द्वितीयेऽसिद्धेश्चेति । **संयोगविभागयोरपीति** । एकस्यामपि कर्मव्यक्तौ संयोगविभागयोरुत्पन्नयोः संयोगविभागप्रत्ययः कुतो न भवतीति तुल्यमित्यर्थः ।

आश्रयामहत्त्वमेवेति। ननु कालादिगुणेषु साध्याव्यापकमेतत् । न च कार्यमहत्त्वानधिकरणत्वं तदर्थः । गुरुत्वादौ साध्याव्यापकत्वात् । न च बाधोन्नीतस्य पक्षेतरत्वस्य विवक्षितत्वात् गतिरनुमीयत इत्यस्यानन्तरम् अनुमाय चलतीति शेषः । एवं तर्हि यथादित्यस्य देशान्तरप्राप्त्यनुमानेऽपि न चलतीति धीस्तथा चैत्रेऽपि न स्यादित्यत आह—**आदित्यादाविवेति** । **न तर्हीति** । तत्रापि देशान्तरस्याकाशादेरतीन्द्रियतया तत्प्राप्तेरज्ञानेतया गत्यननुमानात् खद्योतश्चलतीति धीर्न स्यादित्यर्थः। **तस्य भागैरिति**। खद्योतालोकभागैरित्यर्थः । एवं तर्हि सूर्यालोकसंयोगविभागाभ्यां गतिमनुमायादित्यश्चलतीत्यपि धीः स्यादित्याह—**गभस्तिमालिन इति** । **अव्यापकेनापीति** । खद्योततदालोकयोर्युगपत्सञ्चारितया नुद्यनोदकयोरिवाव्यापकेनापि खद्योतालोकेनापि खद्योतसंयोगविभागौ न प्रतीयेते इति। तत्रापि चलतीति प्रतीतिर्न स्यादित्यर्थः । किञ्च खद्योतवत् खद्योतालोकोऽपि गच्छतीति प्रतीतिरस्ति। न च खद्योतालोकस्य स्वावयवेन संयोगविभागौ स्त इत्याह—**अवयवावयवितयेति**। अपि च कर्मानुमितौ न संयोगमात्रं विभागमात्रं वा लिङ्गम् । तस्य श्येनवत् स्थाणावपि सत्त्वात् ! नापि

मिलितादुत्प्रेक्ष्य निपतिते श्येने स्थाणौ चलतीति प्रतीत्यापत्तेः । तत्रापि संयोगविभागयोर्गत्यनुमानलिङ्गयोः स्थाणौ दर्शनाद्गत्यनुमानं स्यादिति चेत् । न । मम योग्यस्य कर्मणोऽनुपलम्भेनाभावनिश्चयेन बाधितविषयत्वात् । न तर्हि सूर्ये ताभ्यां गत्यनुमानम् स्थाणुनानैकान्तिकमिति चेत् । न । यो विभक्तः संयोगव्यभिचारी स कर्मवानिति व्याप्तिः । स्थाणुस्तु नैवम् । किञ्च । कर्मातीन्द्रियत्वेन कर्महेतोरेव संयोगविभागौ कृतं कर्मणा । चलतीति धीरपि तत एव भविष्यतीति भावः **आत्मसमवेतानामिति** । परबुद्धेः परंप्रत्ययोग्यत्वादित्यर्थः ।

प्राभाकरः स्वप्रकाशपक्षसाधकमाह—**बुद्धिः स्वव्यवहार इति** । तत्र वर्तमानज्ञानव्यवहारो व्यवहर्तव्यभिन्नज्ञानसाध्यो न वा, उभयसिद्धप्रत्यक्षविषयो ज्ञानं मानसप्रत्यक्षविषयो न वेति संशयः ।

अत्र सपक्षाभावान्नासाधारण्यम् । युक्तं चैतत् । वर्तमानज्ञानं स्वयमेव व्यवहारं करोति । स्वस्मिन् सत्येव स्वव्यवहारात् । न ज्ञानान्तरमपेक्षते । तदन्वयव्यतिरेकानुविधानाभावात् । ज्ञानान्तराभावदशायां स्वविरहादेव स्वव्यवहारविरहात् । स्वत एव व्यवहारोपपत्तौ ज्ञानान्तराकल्पनाच्च । इच्छादिकं तु न तथा। व्यवहारस्य ज्ञानजन्यत्वनियमेन इच्छादिव्यवहारे ज्ञानापेक्षणात्। अथ ज्ञानमात्रं न व्यवहारहेतुरतिप्रसङ्गात्, किन्तु व्यवहर्तव्यविषयमिति ज्ञानव्यवहारोऽपि तद्विषयकज्ञानाद्भवेदिति चेत् । न । स्वस्यैव स्वविषयत्वात् । यद्व्यवहारानुकूलशक्तियोगि यज्ज्ञानं तस्य तद्विषयत्वात् । न च व्यवहारस्य स्वाभिन्नज्ञानसाध्यत्वम् । गौरवादिति भावः ।

परेणेति। परवेदनेत्युपलक्षणम्। स्वीयमप्यतीतमनागतं च स्वव्यवहारे ज्ञानान्तरमपेक्षते। व्यवहारकाले तेषामभावात्। ज्ञानान्तरान्वयव्यतिरेकानुभवाच्च। अथ स्वकीयं वेदनं वर्तमानं पक्षोऽतो न बाधक इत्यत आह—**तत्परिहारिणेति**। **विपक्षगामितयेति**। स्वकीयातीतानागतज्ञानपरकीयज्ञानागतत्वाद्वेदनत्वस्येत्यर्थः।

एतेनेति। बाधेन विरुद्धत्वेन वेत्यर्थः। ज्ञानं च न स्वविषयं स्वजनकेन्द्रियप्रत्यासत्त्यनाश्रयत्वात्। विषयत्वनियामकेन्द्रियसन्निकर्षाभावे तु विषयत्वानुपपत्तेः। मनःसंनिकर्षाश्रयत्वे च मानसत्वं युक्तम्। विवादपदम् इन्द्रियजन्यं ज्ञानं नैतज्ज्ञानविषयः एतज्जनकेन्द्रियप्रत्यासत्त्यनाश्रयत्वात् असंनिकृष्टत्ववत्। चाक्षुषं ज्ञानं न चक्षुर्जन्यज्ञानविषयः चक्षुरसंनिकृष्टत्वात् व्यवहितघटवत्। ननु परप्रकाशकज्ञानमेव न सिध्येत् इन्द्रियसंनिकर्षादेः सर्वदा सत्त्वेन ज्ञानधारायामनवस्थानात् विषयान्तरसञ्चारश्च न स्यादित्यत आह—**अनवस्थाप्रसङ्गस्त्विति**। ननु संयुक्तसमवायेन मनोवेद्यत्वादपेक्षणीयान्तराभावाच्च कुतो वित्तिर्नावश्यवेद्या। सुखादितज्ज्ञानादिसामग्रीप्रतिबन्धात्। विषयान्तरसंचारदर्शनेन तस्या बलवत्त्वात्। अनुभवात् किञ्चिज्ज्ञानमयोग्यमित्यन्ये। अथ यथा तद्गुणसंविज्ञानसिद्धं कूटादिपदमशक्यमपि कूटं गुणमादायैव प्रधानमन्यपदार्थं बोधयति तथा ज्ञानमविषयमात्मानमादाय स्वविषयव्यवहारं करोति संस्कारं च। स्वजन्यव्यवहारविषये ज्ञानस्य संस्कारजनकत्वात् स्वजन्यव्यवहारविषयश्चात्माविषयश्चेति। न। अन्यत्र लाघवेन ज्ञानस्य स्वविषयव्यवहारसंस्काराजनकत्वात् व्यवहारसंस्कारयोः

स्वविषयज्ञानसाध्यत्वेन स्वविषयकज्ञानासाध्यत्वात्। सजातीयत्वानपेक्षत्वे साध्ये यदि प्रकाशकत्वं ज्ञानत्वमेव हेतुस्तर्ह्यसाधारण्यम्। अथालोकज्ञानसाधारणत्वं प्रकाशत्वं तर्ह्यसिद्धिरित्याह—**प्रकाशकत्वादिति**। बुद्धेः प्राकट्यानुमेयत्वं दूषयति—**कार्यलिङ्गेति**। नन्वपेक्षाबुद्धिभिन्ना घटबुद्धिर्घटनिष्ठधर्मचरमकारणं घटबुद्धित्वात् अपेक्षाबुद्धिवत्। न च भट्टैरपेक्षाबुद्धेर्द्वित्वाभिव्यञ्जकत्वाङ्गीकाराद्दृष्टान्तासिद्धिः। अस्माभिरपेक्षाबुद्धेर्द्वित्वादिजनकत्वेन तैश्च प्राकट्यजनकत्वेन व्याप्त्यङ्गीकारात्। एवं च घटविषयकबुद्धेः प्राकट्यजनकत्वे सिद्धे तद्दृष्टान्तेनापेक्षाबुद्धेरात्मविषयकबुद्धेश्च प्राकट्यजनकत्वमनुमेयम्। न। आद्यानुमानेऽपेक्षाबुद्धित्वस्योपाधित्वात्। ननु ज्ञातो घट इति विशिष्टप्रतीतेर्ज्ञातताख्यः संबन्धः सिध्येत् वर्तमानविषये बाधकाभावात्। न। अतीतानागतादेस्तदभावे ज्ञातव्यवहारानापत्तेः। तस्य ज्ञातताजन्यत्वात्। न च ज्ञानविषयावेव तद्धीविषयौ। वर्तमानेऽपि तथापत्तेः। प्रतीत्योर्विषयवैलक्षण्याननुभवात्।

वस्तुतो जानामीति। मानसानुव्यवसायगम्यं ज्ञानं प्रत्यक्षम् अन्यथा सुखादिप्रत्यक्षत्वे कः समाश्वासः। क्षणिकात्मविशेषगुणत्वाच्च सुखवन्मानसप्रत्यक्षत्वमनुमेयम्। **अन्यथा परमाण्वादिष्विति**। ननु परमाणुवृत्तिः सत्तादिर्घटादौ प्रतीयत एव परमाणुवृत्तितया च तद्ग्रहः परमाणोरतीन्द्रियत्वेन तदप्रतीत्यैव न स्यात्। न। परमाण्वघटितसंनिकर्षेण स्वयोग्यतामात्रात् सत्तादिः प्रतीयेतेत्यर्थात्।

अन्ये तु । आश्रयाग्रहणेन सत्ता गृह्यतेत्यर्थः । परमाणुष्वपीति तु सत्ताया इन्द्रियसंनिकर्षनिर्वाहार्थमित्याहुः । रूपत्वादाविति । रूपत्वादिसिद्धिश्चान्वीक्षातत्त्वबोधे न्यायनिबन्धप्रकाशे च निपुणतरमुपपादिता । शब्दत्वादीत्यादिशब्दात् कत्वादिपरिग्रहः ।

ननु संयुक्तसमवायो न प्रत्यासत्तिः, आश्रयसंयोगादेव रूपादिग्रहोपपत्तेः, तथाश्रयाश्रयसंयोगाद्रूपत्वादिग्रहसंभवात् संयुक्तसमवेतसमवायोऽपि न प्रत्यासत्तिरित्याह—किमनेनेति । वयं हीति । यद्यपि शब्द इन्द्रियसमवेत एव गृह्यते न त्विन्द्रियसंबद्धसमवेतस्तथापि प्रायिकत्वेनाभिधानम् । वस्तुतो रूपसमवायिसंयोगे रूपसमवायस्य विशेषणत्वे हेतुत्वादुपलक्षणत्वे च संयुक्तद्रव्यमात्रस्योपलक्ष्यत्वे घटसंयोगात् पटरूपग्रहापत्तेरिति भावः । ननूक्तरूपा पञ्चैव चेत्प्रत्यासत्तिस्तर्ह्यभावः कथं प्रत्यक्ष इत्यत आह—अभावस्य त्विति । विशेषणता च द्विविधा । इन्द्रियविशेषणता इन्द्रियसंबद्धविशेषणता च । तत्राद्या शब्दाभावग्रहे अन्त्याऽभावग्रहे हेतुः । सा चेन्द्रियसंयुक्तविशेषणत्वादिभेदात् पञ्चविधा । ज्ञानसामान्यलक्षणे अपि प्रत्यासत्ती तत्रैवान्तर्भूते । योगजधर्मः प्रत्यासत्त्यन्तरम् । षोढा परिगणनं तु तदजन्यजन्यप्रत्यक्षाभिप्रायेण । तद्व्युत्पादनं चास्माभिस्तत्रैव निपुणतरं कृतमिति नेह प्रतायते । अस्मदादीत्यत्रादिशब्दस्य प्रकारवाचित्वादेकं प्रकारमाह—अयोगिनामिति । न प्रत्यक्षैकहेतुतेति । न प्रमारूपप्रत्यक्षैकहेतुत्वेनेत्यर्थः । तस्य प्रमाणगृहीतार्थविषयत्वात् । तेषामिति । यथा कर्मणामाशुविनाशित्वात् कालान्तरीयफलानुकूलो धर्मः कल्प्यते । तथा योगानुष्ठानस्यापी-

त्यर्थः । स्वस्यात्मनि ततोऽन्यस्मिन्निति । नन्वात्मनि श्रवणमननश्रवणाच्चिन्तासन्ततेश्च साक्षात्कारजननस्य दृष्टत्वादात्मनि साक्षात्कारसंभवेऽप्याकाशगोचरश्चिन्तासन्तानेन साक्षात्कारो जन्यत इत्यत्र मानाभावः । तत्र श्रवणमनननिदिध्यासनाश्रवणात् । अथात्मसाक्षात्कारणात्मन्यनात्मभ्रमे निवृत्तेऽप्यनात्मन्यात्मभ्रमस्तावन्न निवर्तते, यावत्तत्र साक्षात्कारो न जायत इति चेत् । न । आत्मनि विशेषदर्शनेन यथात्मनि नानात्मारोपस्तथानात्मन्यात्मारोपो न संभवति । विशेषदर्शनाविशेषात् । अथात्मा चिन्त्यमान इतरभिन्नत्वेन चिन्तनीय इतीतरेष्वपि साक्षात्कारो जायते । न । श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति सामानाधिकरण्यात् । यथा श्रवणं तथा मननं तथात्मा चिन्तनीयः । श्रवणादि चेतरभिन्नत्वेनेत्यत्र न मानम् ।

अत्राहुः । श्रोतव्यः श्रुतिवाक्येभ्य इत्यसङ्कुचितस्वरसाद्यावदात्मगोचरश्रुतिवाक्येभ्य आत्मश्रवणे श्रुतौ चेतरभिन्नत्वेनात्मप्रत्यायनात्तथैव श्रवणमननादिकमपि तथोपस्थितामिति । तथैव निदिध्यासनसाक्षात्कारोऽपीतरेष्वा (का ?) शादिषु वाच्यः ।

यद्यपीति । तथा चास्मदादिप्रत्यक्षप्रस्तावे विषयतयात्मा किमिति नोक्त इत्यर्थः । चतुष्टयसंनिकर्षादित्यनेनेति । यदि चतुष्टयसंनिकर्षोऽत्र विवक्षितः स्यात्तदेन्द्रियसंनिकर्षाभावे योगिनामात्मसाक्षात्कारो न स्यादित्यर्थः । कस्य चिदिति योग्यानुपलम्भनिराकरणार्थम् । योगजस्यापि धर्मस्येति । ननु योगविषयकत्वेन योगजो धर्म आत्मसाक्षात्कारहेतुरस्तु परमाण्वादिसाक्षात्कारे कथं हेतुः ।

अत्राहुः । शब्दानेव शृणोति योजनशतादिति योगजधर्मविशेषफलादन्यत्रापि योगजधर्मस्य साक्षात्कारजनकत्वम् ।

स्वर्गादीनामिति। यद्यपि स्वर्गिणां स्वर्गः प्रत्यक्ष एव तथापि मर्त्यलोकस्थातीन्द्रियत्वमभिप्रेत्योक्तम् । जन्यसविकल्पकाजन्यजन्यसाक्षात्कारविषयत्वमत्र साध्यमतो नोपनीतसाक्षात्कारेण सिद्धसाधनम्। यद्यप्यनेन विमुक्तमात्रस्य सिद्धिर्न मुक्तस्य, मुक्तसाक्षात्कारस्य जन्यसविकल्पकजन्यत्वात् । तथाप्यागमात्तस्यापि सिद्धिः ।

धर्मिग्राहकमानबाधमङ्गीकृत्याह—**मीमांसका गुरव इति** । उत्तरप्रबन्धोपयोगार्थमाह—**नान्विति**।**स्वरूपालोचनमात्रमिति**। मात्रपदाद्विशिष्टविषयकत्वव्यवच्छेदः । यदि प्रत्यक्षं फलमात्रं विवक्ष्येत तदा तस्य पूर्वमुक्तत्वात् पौनरुक्त्यं स्यादिति विशिनष्टि—**प्रत्यक्षं प्रमाणमिति**। **सामान्यविशेषज्ञानमपीति** । निर्विकल्पकमपीत्यर्थः ।

दूषणं निरस्यति—**आलोक्यतेऽनेनेति** । तत्र मात्रपदव्यवच्छेद्यं नास्तीत्यन्यथा व्याचष्टे—**स एवेति** । संनिकर्षोऽपि योगजः फलं भवत्येवेत्यत आह—**प्रमारूपामिति** ।

ननु कार्यस्य कारणसाध्यत्वे कारणस्यापि कार्यतया कारणान्तरसाध्यत्वेऽनवस्था स्यादित्यत आह—**न चैवमनवस्थेति** । **संशयविपर्ययरहितामिति**। यद्यपि संशयविपर्ययात्यन्ताभाववद्विशिष्टज्ञानमपि भवति तथापि संशयविपर्ययभिन्नमित्यर्थः । तथापि सत्यं विशिष्टज्ञानमपि तथा भवत्येवेत्यत आह—**अव्यपदेश्यमिति**। तस्य विवरणं **शब्दाजन्यमिति** । ननु व्यपादिश्यतेऽनेनेति

व्यपदेशो नाम जात्यादि तत्कर्म व्यपदेश्यं तद्भिन्न भवति तदव्यपदेश्यं वैशिष्ट्यानवगाहीत्यर्थः प्रतीयते । तथा च सविकल्पकं व्यवच्छिद्येतेत्यत आह—**शब्दाजन्यमिति चेति** । **तद्व्यवच्छेदार्थमिति** ।

ननु व्युत्पन्नस्य शब्दश्रवणानन्तरं यद्गौरिति ज्ञानं तद्यदि शाब्दं तदा नेन्द्रियार्थसंनिकर्षजम् । अथ तज्जन्यं तदा न शाब्दम् । उभयजन्यत्वे जातिसंकरापत्तिः । अत्राहुः । प्रत्यक्षोपस्थिते धर्मिणि यत्र शब्दादितरधर्मवैशिष्ट्यं प्रतीयते तत्र परम्परेन्द्रियसंनिकर्षस्य प्रयोजकत्वेन प्रत्यक्षत्वं मा भूदित्येवपरमर्थव्यपदेश्यमित्युक्तम् । यद्यपि तदिति तद्गुणदोषमाध्यस्थ्यं, तस्य चेति तज्जातीयलिङ्गदर्शनस्य, तदिति प्रत्यक्षफलत्वमिति ।

यद्यपीति । ननु बुद्धेरत्र विभागः सा च फलमेव न तु करणं तत्कथं करणव्युत्पादनमत्र प्रसक्तम् । उच्यते । करणस्यापि बुद्धिरूपत्वसंभवात् करणव्युत्पत्त्याऽनेन च बुद्धेर्व्युत्पादनमेवात्र । शब्दादीनामप्यनुमानेऽन्तर्भाव एतत्सुनिश्चितार्थमनुमानमित्यादि भाष्यदर्शनाद्भावव्युत्पत्तिमुपजीव्य करणव्युत्पत्तावपि तात्पर्यं वा । लिङ्गं जन्यं तत्प्रत्यक्षमपि संभवत्यत उक्तम्—**अनुमितिरूपामिति**। ननु लिङ्गदर्शनात्संजायमानमिति लक्षणं संस्कारेऽतिव्यापकमित्यत आह—**बुद्ध्यधिकारादिति**। **संशयविपर्ययेति** । ननु लिङ्गदर्शनस्य परामर्शस्यानुमितिचरमकारणत्वान्न ततः संशयः । न च सत्प्रतिपक्षस्थलेऽनुमित्यनुत्पादनात् ततः संशयः । तत्रापि संशयस्य साधारणधर्मदर्शनजतया लिङ्गदर्शनादनुत्पत्तेः ।

मैवम् । लिङ्गदर्शनविषयस्य साक्षात्कारिणः संशयस्य लिङ्गदर्शनजतया तस्य व्यवच्छेद्यत्वात् ।

ननु स्मृतिर्यथार्था नासम्यगर्थेत्यत आह—**स्मृतिरपीति** । रज्जुं सर्पतयानुभूय पलायितस्य तथैव स्मृतेरित्यर्थः। अत्र व्याप्तस्य पक्षधर्मतावैशिष्ट्यं लिङ्गत्वं, तद्विषयं ज्ञानं तृतीयलिङ्गपरामर्शः, तज्जन्योऽसाक्षात्कार्यनुभवोऽनुमितिः । अनुमिनोमीत्यनुगतानुव्यवसायाद्वानुमितित्वं जातिः ।

ननु संजायमानमिति वर्तमानतानिर्देशाद्वर्तमानज्ञानस्यानुमानता नत्वतीतस्यानागतस्य वेत्यत आह—**वर्तमानापदेशस्येति**। **निरुपाधीति** । अत्र पक्षधर्मत्वे सतीति द्रष्टव्यम् । **इतिकर्तव्यतेति** । इतिकर्तव्यता व्यापारः तद्वत एव करणत्वात् ।

एतेनेति । प्रमाणं त्वत्र धूमवानयमग्निमानित्यनुमितिः ज्ञायमानविशेषणजन्या विशेषणसमानकालाशाब्दविशिष्टज्ञानत्वात् दण्डी पुरुष इति प्रत्यक्षवत् । युक्तं चैतत् । लिङ्गज्ञानस्य प्रमात्वं विद्यमानलिङ्गविषयकत्वमतः परामृश्यमानस्यैव लिङ्गत्वम् । यत्र चातीतानागतयोर्लिङ्गत्वं तत्र यद्यपि कारणविशेषो लिङ्गं न सम्भवति । तथापि धूमप्रागभावध्वंसावेव तत्र लिङ्गे तयोरपि धूमवद्वह्निव्याप्यत्वात्। **यच्छब्दसापेक्षत्वादिति**। यच्छब्दस्योद्देश्याभिधायित्वात् तच्छब्दस्य विधेयाभिधायित्वादुद्देश्यविधेययोश्च मिथः साकाङ्क्षत्वादित्यर्थः। ननूद्देश्यविधेययोस्तथात्वेऽपि तद्वाचकपदयोः कथमाकाङ्क्षा, आकाङ्क्षायामपि तद्वाचकपदार्थमात्राकाङ्क्षास्तु, नियमेन तत्पदाकाङ्क्षा कथम् । उच्यते । तयोरेकस्मिन् शब्दादु-

पस्थितेऽपरस्यापि पदादेवोपस्थितिरन्वयबोधाङ्गमित्यन्यत्र व्यवस्थापितमिति पदजन्यपदार्थोपस्थितयोरुद्देश्यविधेययोः साकाङ्क्षत्वमिति तदुपस्थापकयोरपि साकाङ्क्षत्वम् । तत्रापि व्युत्पत्तिसिद्धोऽयमर्थो यद्यत्पदार्थोपस्थितमेवोद्देश्यमादाय तत्पदार्थस्य विधेयस्यान्वयः । एवं यत्पदार्थस्यापि तत्पदोपस्थापितमादायेति ।

पक्षधर्मतेति । सिषाधयिषाविरहसहकृतसाधकप्रमाणाभाववान् धर्मी पक्षः । व्यापकतावच्छेदकप्रकारानुमितिप्रतियोगिकविषयताश्रयः पक्ष इत्यन्ये । **एवं च सतीति** । यद्यपि पक्षैकदेशवृत्तिरपि पक्षवृत्तिर्भवत्येवेति न ततो भागासिद्धिनिरासस्तथापि बद्धमित्यनेन सम्बन्धमात्रलाभे **संशब्देन** सम्यक्त्वं पक्षव्यापकत्वं लभ्यते। ननु सिद्धमित्यत एव सपक्षवृत्तित्वे प्रशब्दात् प्रकर्षवाचिनः सपक्षव्यापकतारूपः प्रकर्षोऽवगम्यते, तथा च पक्षैकदेशवृत्तिर्हेतुर्न स्यादित्यत आह—**चशब्द इति** ।

सपक्षेति । निश्चितसाध्यवान् सपक्ष इत्यर्थः। तच्छब्देनानुमेयधर्मिपरामर्शेऽनन्वयादाह—**तच्छब्देनेति** । ननु विशेषसंज्ञायाः किं फलमित्यत आह—**एतेनेति** । उक्तलक्षणहीनत्वं बाधितसत्प्रतिपक्षितयोरप्यस्तीति तयोरपि लिङ्गत्वं स्यादिति विशिनष्टि—**कालात्ययेति** ।

ननु यत्र द्वितयत्रितयलिङ्गलक्षणव्यतिरेकस्तत्राप्येकलक्षणव्यतिरेक आवश्यक इति तावन्मात्रमेव लिङ्गाभासलक्षणमस्तु कृतं द्वितीयादिव्यतिरेकोद्भावनेनेत्यत आह—**एतेनैतदुक्तमिति** । **सिद्धे हेतुस्वरूप इति** । ननु सिद्धत्वं व्याप्तस्य पक्षधर्मत्वं तद्वय-

तिरेकश्चासिद्धत्वं तथा सिद्धे हेतुस्वरूपे विरुद्धादिदोषाणामवकाश इति व्याहतम्, न हि व्याप्तस्य पक्षधर्मत्वे विरुद्धादिसंभवः। मैवम्। असिद्धिरनुमितिकारणाभावरूपतया साक्षाद्दूषणं विरुद्धादयस्त्वसिद्ध्युपजीवकत्वेन। परम्परादूषणानामुपजीव्यत्वात् समानतन्त्रे प्रथममसिद्धिरुद्भावितेत्याशयः। **स्फुटप्रतिभासमिति**। उभयवादिसंप्रतिपन्नमित्यर्थः।

बलवदिति। उपजीव्यमित्यर्थः। ननु संदिग्ध इत्यत्र संदिग्धपदं नानैकान्तिकवाचकमित्यपदार्थव्याख्यानमित्यत आह। **संदिग्ध इति**। यद्वस्तु यत्काले यत्कोटिकत्वेन संदिग्धं भवति न तत्काले तद्वस्तु तत्कोटावनैकान्तिकत्वेन निश्चिनोतीति संदिग्धपदं लक्षणयानैकान्तिकं ब्रूत इत्यर्थः। लक्षणमुदाहरणेन स्फुटयितुमाह—स हि धर्मद्वयेत्यादिनापि विपक्षाद्व्यावृत्तिरित्यन्तेन। नन्वनैकान्तिकं द्वाभ्यामपि लिङ्गलक्षणाभ्यां हीनं भवति तत्किं नोदाहृतं यथा जलह्रदो धूमवान् वह्निमत्त्वादित्यादि। इदं हि पक्षावृत्ति सपक्षाविपक्षवृत्ति चेति। न। स्वरूपासिद्ध्यसंकीर्णानैकान्तिकस्योदाहियमाणत्वात्। **विरुद्धास्त्विति**। यद्यपि विरुद्धस्त्रिभिरपि धर्मैर्विपरीतो भवति, यथाऽनित्यः शब्दोऽकृतकत्वादिति। अयं हि पक्षसपक्षावृत्तिर्विपक्षवृत्तिश्चेति। तथाप्यसिद्धासंकीर्णो विरुद्धोऽत्रोदाहियत इति नोक्तः।

द्वाभ्यां चेति। ननु चाप्रमेयस्याप्रसिद्ध्या कुत्रासिद्धिर्निरूप्या। अत्राहुः। अप्रमेयत्वादित्यनेनावृत्तिराकाशादिर्हेतुत्वेन विवक्षितः।

यद्यपि चेति। नन्वनुमेयः पक्षः क्वचिद्देशे काले च भवतीति देशकालनैयत्यमेवानुमाने। अत्राहुः। सर्वत्रानुमाने तयोः स्वरूपसतोरेव प्रयोजकत्वं ज्ञायमानयोः क्वचित्त्वमित्यभिप्रेत्योक्तम्—**तथापि क्वचिदिति**। यत्र देशविशेषकालविशेषविशिष्ट एव पक्ष इत्यर्थः। **एतच्चेति**। क्वचिद्देशकालप्रयोजकत्वम्। **भूयो भूय इति**। ननु भूयोदर्शनगम्या व्याप्तिर्न तु व्याप्तेर्भूयोदर्शनमनुमानोपयोगि। मैवम्। संवादेन यत्र व्याप्तिग्रहस्य प्रामाण्यं गृह्यते तदभिप्रायेणोक्तत्वात्। **व्यतिरेकदृष्टान्तस्यापीति**। एतच्चात्राप्रमाणत इत्यनुषङ्गाल्लभ्यते। **अन्यथेति**। हेत्वाभासस्यापि केवलानैकव्यतिरेकदृष्टान्तसंभवादित्यर्थः। **इति व्युत्पत्त्येति** सपक्षेऽप्रसिद्धोऽगृहीतव्याप्तिक इति व्युत्पत्त्येति योजनीयम्। **किन्तु पक्षेऽसन्निति**। न चैवं स्वरूपासिद्धस्यैव संग्रहे व्याप्यत्वासिद्धस्यासंग्रहः। तस्य पूर्वोक्तव्युत्पत्त्यैव लब्धत्वात्। **चकारादिति**। न च चकारादेवान्यहेत्वाभाससंग्रहात् कृतमनपदेशपदावृत्त्येति वाच्यम्। आवृत्तेनानपदेशपदेन लक्ष्याभिधानाच्चकारेण च कालात्ययापदिष्टप्रकरणसमयोर्लक्षणाभिधानात्। **अप्रसिद्धपदेनेति**। चकारेणेत्यर्थः। नन्वेवं हेत्वाभासलक्षणे तयोरुपग्रहेऽपि हेतुलक्षणपरसंग्रहश्लोके कथं तयोर्निराकरणमित्यत आह—**प्रसिद्धं चेति**। तयोः कालात्ययापदिष्टप्रकरणसमयोरित्यर्थः। आपातत इति बाधसत्प्रतिपक्षानुपजीवने। व्याख्यान इति बाधसत्प्रतिपक्षोपजीवने।

ननु सत्प्रतिपक्षे व्याप्यत्वासिद्धिरपक्षधर्मता च नावश्यकी, सदनुमानस्यापि कदाचित्सत्प्रतिपक्षत्वात्।

अत्राहुः। प्रसिद्धं च तदन्वित इत्यत्र प्रकर्षेण सिद्धं प्रसिद्धमित्युच्यते । प्रकर्षश्चायमेव यदसत्प्रतिपक्षितत्वमबाधितत्वं च । **सर्वमसिद्ध एवेति** । सर्वत्र हेत्वाभासे व्याप्तिपक्षधर्मताप्रमित्यभावादित्यर्थः ।

अधिकस्येति । अबाधितस्य चासत्प्रतिपक्षितस्य चेत्यर्थः । **न वाच्येति** । नोदाहर्तव्येत्यर्थः । **निराश्रयस्य हेतोरिति** ।

ननु वन्हौ धूमो गमको न, गमकं च प्रमेयत्वमिति निराश्रयोऽपि हेतुरुपन्यस्यते विधीयते प्रतिषिध्यते च । अथ पक्षतां विना न हेतोर्गमकत्वं तर्हि बाधकत्वादिज्ञानव्यतिरेकेणापि न हेतोर्गमकत्वमिति तुल्यम् ।

अत्राहुः । बाधसत्प्रतिपक्षत्वज्ञानाभावमात्रमनुमितिहेतुर्न बाधितत्वादिज्ञानमपि । पक्षधर्मताज्ञानं च सर्वत्रानुमितौ हेतुरिति विभावयितुं पक्षधर्मतोदाहृतेति ।

तत्रानुमेयेनेति । यद्यप्येतदन्वयव्यतिरेकिण्यतिव्यापकम् । तथाप्यनेनोपाधिनाऽन्वयव्यतिरेक्यप्यन्वय्येव । लक्षणं तु अत्यन्ताभावाप्रतियोग्यत्यन्ताभावाप्रतियोगित्वम् । एतावन्मात्रमनैकान्तिकेऽप्यस्तीति हेतुत्वेन विशेष्यम् । **पदमेव चेति**–अनुमेयेन सम्बद्धमित्येतावन्मात्रमेव चेत्यर्थः । एतदसाधारणानैकान्तिकेऽप्यस्तीति हेतुत्वेन विशेष्यम् । लक्षणन्तु पक्षवृत्तित्वे विपक्षव्यावृत्तत्वे च सति असत्प्रतिपक्षत्वमेव । समस्तान्त्विति । प्रसिद्धं च तदन्विते तदभावे च नास्त्येवेति द्वयविशिष्टमित्यर्थः । यद्वा । उभयव्याप्तिरनेन साध्यसाधकत्वं तल्लक्षणम् । अबाधितसत्प्रतिपक्षितत्वञ्च

समानम्। **अन्वयव्यतिरेकाविति**। सहचारदर्शनं व्यभिचारादर्शनञ्चेत्यर्थः। यद्यप्येतत् केवलव्यतिरेकिणि केवलान्वयिनि च न सम्भवति । तथाप्यन्वयव्यतिरेकिणि तत्सम्भव इति तदभिप्रायेणैतस्याभिधानम् । ननु न भूयोदर्शनगम्या व्याप्तिः। तथाहि न भूयांसि दर्शनानि व्याप्तिग्राहकाणि । एकत्रैव धारावाहिकेन तद्ग्रहापत्तेः। नापि भूयःसु स्थानेषु दर्शनम् । एकाश्रयाश्रितरूपरसयोस्तदभावात् । नापि भूयसां दर्शनं गोत्वद्रव्यत्वयोस्तदभावात् । भूयोदर्शनेऽपि पार्थिवत्वलोहलेख्यत्वयोर्व्यभिचारे व्याप्त्यग्रहात् । अतः पारिशेष्यात् सकृद्दर्शनगम्यैव व्याप्तिः। उपाध्यभावस्य व्याप्तित्वात् । तस्य च केवलाधिकरणरूपतया चक्षुरादिना प्रथमदर्शनगम्यत्वादित्यत आह–**अन्वयव्यतिरेकाभ्यामिति** । व्यापकान्वयव्यतिरेकप्रयुक्तव्याप्यान्वयव्यतिरेकाभ्यामित्यर्थः । नन्वेवं प्रथमदर्शन एव व्याप्तेर्निश्चयादग्रे संशयानुपपत्तिरित्यत आह–**शङ्कामात्रन्त्विति** । व्याप्तिज्ञानेऽपि किं सन्नप्युपाधिर्मयोपाधित्वेन न ज्ञातः किं वोपाधिरेवात्र नास्तीति संशयात्तदुपपत्तेः । न ह्यग्रिमसंशयानुरोधात् पूर्वं व्याप्तिनिश्चयसामग्र्यामपि न तन्निश्चय इति युज्यते । घटसामग्र्यामपि तथा कल्पनापत्तेः । न चैवं प्रथमदर्शनानन्तरमेवानुमितिः । उपाधिस्मरणसहकृतस्य योग्योपाध्यनुपलम्भस्यानुमितावुपाध्यभावव्यवहारे च कर्त्तव्ये व्याप्तिज्ञानसहकारित्वादिति भावः । नन्वेतावतापि सकृद्दर्शनगम्यत्वं न व्याप्तेर्निराकृतमित्यत आह–**इदमत्रेति** । **यथा वह्निरिति** । आर्द्रेन्धनवत्त्वमुपाधिमादाय वह्निर्धूमेन सह व्याप्त इति तदभावेऽयं धूमवान् वह्निमत्त्वा-

दित्यत्र वह्निर्न धूमस्य गमक इत्यर्थः । यथाहारेति । मनुष्यश्यामत्वे शाकपाकजत्वस्यैव गमकत्वं न तु तद्विशिष्टस्य मैत्रतनयत्वस्य व्यर्थविशेष्यत्वादित्यर्थः ।

ननु भूयांसि दर्शनानि प्रत्येकं न गमयन्ति । सकृद्दर्शनगम्यत्वापत्तेः । नापि मिलितानि । आशुविनाशिनां क्रमभाविनां मेलकासंभवादित्यत आह–भूयोदर्शनं हीति । यथा प्रत्याभिज्ञायां संस्कारसहितमिन्द्रियं हेतुस्तथा तावद्दर्शनजन्यसंस्कारसहितमत्रापि तथेत्यर्थः ।

तथाहीति । विशेषैरवान्तरजात्यादिभिर्मणिः पद्मरागादिव्यवहारविषयो धारकस्य शुभाशुभजनकश्चानुमीयत इत्यर्थः । अनौपाधिकत्वज्ञानस्य व्याप्तिज्ञानहेतुतया साध्यसहचरितानामनुपाधित्वनिश्चयस्य साध्याव्यापकत्वसाधनव्यापकत्वनिश्चयसाध्यत्वात्तस्य च भूयोदर्शनसाध्यत्वादित्याह–ततश्चेति । ननु भूयो दर्शनं त्रिचतुरादिरूपतयाऽननुगतं न हेतुरित्यत आह–न चात्रेति ।

इदमत्राभिसंहितम् । उपाध्यभावो नानौपाधिकः । यत्किञ्चित्साध्यव्यापकसाधनाव्यापकधर्मशून्यत्वस्य धूमेऽप्यसत्वात् । व्यभिचारिण्यपि गतत्वाच्च । प्रकृतसाध्यव्यापकसाधनाव्यापकधर्मशून्यत्वस्य च सिद्ध्यसिद्धिभ्यां व्याहतत्वात् । किन्तु यावत्स्वव्यभिचारिव्यभिचारिसामानाधिकरण्यम् । तच्च न सकृद्दर्शनगम्यम् । किन्तु वस्तुगत्या या व्याप्तिस्तज्ज्ञानं नानुमितिहेतुरतिप्रसङ्गात् । किन्तु व्याप्तित्वेन । तच्चोपाधेरेव ज्ञाने तथात्वेन ज्ञानं संभवति ।

विशेषणज्ञानं विना विशिष्टज्ञानानुत्पत्तेरिति । ननु तथाप्यनौपाधिकत्वं भूयोभिरपि दर्शनैर्ज्ञातुमशक्यम् । योग्यानामुपाधीनां योग्यानुपलब्ध्याऽभावनिश्चयेऽप्ययोग्यानामुपाधीनामभावस्य ग्रहीतुमशक्यत्वात् । अनुमानात्तद्ग्रहे तत्राप्यनौपाधिकत्वग्रहायानुमानान्तरापेक्षायामनवस्थानात् । तथा च भूयोदर्शनस्यापि संशायकत्वात्ततोऽपि न व्याप्तिग्रहः । इह समव्याप्तस्यैवोपाधित्वपक्षमाश्रित्य समाधिराचार्येणैव रक्ष्यते । विषमव्याप्तस्याप्युपाधित्वपक्षे व्यभिचाराभावज्ञानसहकृतं सहचारज्ञानं व्याप्तिग्राहकम् । न च सर्वेषां व्यभिचाराभावज्ञानं ज्ञातुमशक्यं स्वीयतया ज्ञानाभावज्ञानं च व्यभिचारिसाधारणमिति वाच्यम् । न हि व्यभिचारज्ञानाभावो ज्ञात उपयुज्यते । किन्तु स्वरूपसन्नेवेन्द्रियसहकारी । व्यभिचारज्ञानं च तन्निश्चयस्तच्छङ्काशङ्का च क्वचिदुपाधिसंदेहात् क्वचिद्विशेषादर्शनसहकृतसाधारणधर्मदर्शनात् । तद्विरहश्च क्वचिद्विपक्षबाधकतर्कात् क्वचित् स्वतः सिद्ध एव । न च तर्कव्याप्तिमूलत्वेऽनवस्था । यावदाशङ्कं तर्कानुसरणात् । यत्र व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्तिग्रहः । तथाहि । धूमो यदि वन्ह्यसमवहितसामग्र्यजन्यत्वे सति वन्हिसमवहिततदजन्यः स्यान्नोत्पन्नः स्यादित्यत्र किं धूमो वन्हेरेव भविष्यति, क्वचिद्वन्हिं विनापि स्यादकारणक एवोत्पन्नः स्यादेवाशङ्का स्यात् । सर्वतस्तु क्रियाव्याघातः । यदि गृहीतान्वयव्यतिरेकं हेतुं विना कार्योत्पत्तिं शङ्केत कथं नियमेन धूमार्थं वन्हिमुपाददीत । न हि यद्व्यतिरेके यस्योत्पत्तिराशङ्क्यते तदर्थं नियमतस्तदुपादीयत इति संभवति । न च केवलान्वयिनि व्यभिचारशङ्काया असम्भवः ।

अत्रापि साधनसमानाधिकरणात्यन्ताभावप्रतियोगि साध्यं न वेति तस्याः सम्भवात् । व्यापकतागोचरत्वेऽपि तस्याः समानसंवित्संवेद्यतया व्याप्यतागोचरत्वात् ।

अन्ये तु । काश्चिद्व्याप्तयः सर्वप्राणिसाधारणा अनादिसिद्धा एव । यथा कार्यकारणभावविरोधादिः । कथमन्यथा जातमात्रस्य स्तनपानादौ प्रवृत्तिः अहिते निवृत्तिश्चेत्याहुः ।

तथाविधामिति । यद्रूपावच्छिन्ने व्याप्यत्वं तद्रूपोपस्थितादनुमितिः । तथा च धूमपदेन तादृग्धूमाभिधानं लक्षणया स्यात् । न च वादिवाक्ये लक्षणायां प्रमाणमस्ति । न हि तेन समीचीनमेव वक्तव्यम् । अज्ञानस्यापि संभवात् । अन्यथा हेत्वाभासेऽप्युक्ते सद्धेतुलक्षणया वादिभङ्गो न स्यादित्यर्थः ।

प्रथमत एकामिति । व्याप्तिग्रहणरूपामित्यर्थः । **दूरादिति** । यत्र धूमाविषयक एव दूराद्वस्तुत्वेन परामर्शः, दैवाच्च धूमो वन्हिव्याप्य इति स्मृतेस्तत्र वस्तुगत्या यल्लिङ्गं तस्य ज्ञानं व्याप्तिस्मृतिश्चेत्येतावतोऽनुमितिहेतोः सत्त्वेनानुमित्यापत्तेरित्यर्थः ।

द्वितीयस्त्विति । तस्य पक्षधर्मताविषयत्वेऽपि व्याप्तिवैशिष्ट्यविषयत्वादित्यर्थः ।

लिङ्गत्वोल्लेखीति । व्याप्तिविशिष्टपक्षधर्मस्य लिङ्गपरामर्शस्तृतीय इत्यर्थः । तथा च व्याप्तिस्मृतिः करणं तृतीयलिङ्गपरामर्शो व्यापार इत्युक्तम् ।

अन्ये तु । क्रियया अयोगव्यवच्छेदेन संबन्धित्वस्य करणत्वाद्व्यापाराभावेऽपि तृतीयलिङ्गपरामर्शः करणमित्याहुः ।

ननु व्याप्तिस्मृतिः व्याप्यतावच्छेदकरूपेण, पक्षधर्मताज्ञानमित्येवानुमितिहेतुर्लाघवात् तृतीयलिङ्गपरामर्शहेतुत्वेनावश्यकत्वाच्च । तथा च धूमो वन्हिव्याप्यो धूमवांश्चायमिति ज्ञानद्वयादेवानुमितिरस्तु । न चैवं गोत्वादेरनुमितिर्न स्यात् । तत्रापि तदितरावृत्तित्वे सति तद्वृत्तित्वस्य धर्मान्तरस्य व्याप्यतावच्छेदकत्वात् पर्वतीयधूमे धूमत्वेन ज्ञाते वन्हिव्याप्योऽयं न वेति संशये तद्विपर्यये वानुमितिः स्यादिति चेत् । न । धूमो वन्हिव्याप्य इति स्मरतो धूमज्ञानस्य विशेषदर्शनत्वेन तयोरसिद्धेः । अन्यथा परामर्शस्याप्यापत्तेः । अथ सामग्र्येव तत्र मानम् इन्द्रियसंनिकृष्टे धूमे व्याप्तिस्मृतिसत्त्वादिति चेत् । न । तत्र व्याप्याभेदप्रत्यक्षसामग्रीतोऽनुमितिसामग्र्या बलवत्त्वेनानुमितेरेवोत्पत्तेः । अन्यथा तवापि परामर्शान्तरापत्तेः । इन्द्रियसन्निकृष्टेऽतीन्द्रिये च लिङ्गे तत्सामग्र्यभावाद्व्यभिचारः । न चानुमानात्तत्र लिङ्गपरामर्शः । तत्रापि तदपेक्षायामनवस्थापत्तेः । उच्यते । पक्षधर्मस्य व्याप्यत्वज्ञानमनुमितिहेतुः लाघवादुपजीव्यत्वाच्च । न तु तस्य व्याप्यतावच्छेदकप्रकारकज्ञानम् । गौरवात् । न च तस्यानुमितिः पूर्वमसिद्धौ युगपदुपस्थित्यभावान्न लाघवावतारः । यत्र व्याप्तिधूमत्वयोर्वैशिष्ट्यं प्रथममेव प्रत्यक्षेण युगपत् पक्षधर्मे भासते शब्दाद्वा तत्र उभयोर्युगपदुपस्थितेः । न चैवमतिरिक्तविशिष्टधीकल्पनायां गौरवम् । सिद्ध्यसिद्ध्योर्व्याघातेन फलमुखगौरवस्यादोषत्वात् । किञ्च वन्हिव्याप्यवानिति शाब्दज्ञाने व्याप्यतावच्छेदकधूमत्वाद्यज्ञानाद्व्याप्यत्वज्ञानसत्त्वात्तदेवानुमितिकारणम् । न च वन्हिव्याप्यमपि व्याप्यतावच्छेदकं

वन्हिनिरूपितधूमाद्येकैकवृत्तिव्याप्तेः सकलधूमादिव्याप्यतावच्छेदकत्वादाश्रयभेदेन व्याप्तिभेदादिति वाच्यम् । सकलधूमादिवृत्तिव्याप्तौ मानाभावात् । यत्र वन्हिव्याप्यस्तत्र वन्हिरिति व्याप्तिबुद्धावेकैकवृत्तिव्याप्त्याश्रयस्यैव विषयत्वात् । अतीन्द्रियेऽसंनिकृष्टे लिङ्गे व्याप्तिस्मरणधूमत्वज्ञानसहितेन मनसा तदुत्पादनमिति ।

ननु व्याख्येयग्रन्थेऽग्न्यध्यवसायो भवतीत्यभिधानात्तद्विरोध इत्यत आह–**अग्निरध्यवसीयत इति** ।

भावव्युत्पत्तिपरित्यागे हेतुमाह–**तत्परमिति** । अग्निज्ञानपरम् । तद्भवति परामर्शज्ञानं भवतीत्यर्थः । ननु तत्परत्वमेवास्य कथमित्यत आह–**प्रमाणमिति** । ननु द्वितीयलिङ्गदर्शनस्यानुमित्यव्यवहितप्राक्कालतयानुमितिजनकत्वे को दोष इत्यत आह–**यद्यपीति** । **जिज्ञासावशादिति** । ननु धूमनिवृत्तौ परामर्शो न प्रत्यक्षेणेन्द्रियासन्निकर्षात् । नाप्यनुमानेन । तस्य परामर्शजन्यत्वेन सोऽपि परामर्शो धूमविषयक एव केन जननीयः । नानुमानेनैव । अनवस्थानात् । न च व्याप्तिपक्षधर्मताबुद्धिभ्यामेव तज्जननम् । प्रमाणान्तरत्वापत्तेः । नापि तत्सहकृतेन मनसैव । तस्य बहिरस्वातन्त्र्यात् ।

अत्राहुः । प्रमेयत्वादावतीन्द्रिये ज्ञानोपनीतत्वेन व्याप्तिग्रहः तत्रापि लिङ्गपरामर्शः । **तेन वाक्यस्येति** । तस्य परामर्शोत्थापकत्वादित्यर्थः । हेतुवाक्यस्य पक्षधर्मतारहितलिङ्गमात्रोपस्थाकत्वाद्वादिवाक्यस्य सिद्धस्वेनोपपत्त्यनाक्षेपकत्वात् । परार्थानुमाने उपनयस्य पक्षधर्मताप्रतिपादनमेव व्यापारः । स्वार्थानुमाने तु द्वितीयलिङ्गदर्शनादेव तल्लाभान्न परामर्शोपयोग इत्याह–**पक्षधर्मतेति** ।

न च तदनुमानेति । यो धूमवान् सोऽग्निमानिति केवलव्याप्तिज्ञानादनुमित्यनुत्पत्तेरित्यर्थः ।

उपनयार्थ इति । व्याप्तिविशिष्टस्य पक्षधर्मत्वमित्यर्थः । अनौपाधिकः सम्बन्ध इति । यद्यप्यनौपाधिकत्वस्य साध्यव्यापकसाधनाव्यापकधर्मशून्यत्वज्ञाने व्यापकज्ञानस्य व्याप्यज्ञानसापेक्षतया न परस्पराश्रयः । तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वस्य व्यापकत्वात् । नापि प्रतियोगित्वस्य विरोधित्वात्तस्य च सहानवस्थानानियमरूपत्वादात्माश्रयः । न हि प्रतियोगित्वं विरोधित्वम् । गोत्वाश्वत्वयोर्विरोधेऽपि प्रतियोगित्वाभावात् । किन्तु भावविरहात्मकत्वम् । तथापि यत्किञ्चित्साध्यव्यापकसाधनाव्यापकधर्मशून्यत्वं व्यभिचारिण्यपि । नापि प्रकृतसाध्यव्यापकसाधनाव्यापकधर्मशून्यत्वं तत् । तादृशधर्मज्ञानं विना तदभावानिरूपणे सिद्ध्यसिद्धिव्याघातात् । यावद्वन्हिमत्त्वव्यापके धूमवत्त्वाव्यापकत्वं यावद्धूमवत्त्वाव्यापके वाह्निमत्त्वव्यापकत्वमिष्यत इति चेत् । न । तादृशधर्मनिषेधस्य व्यधिकरणतया धूमत्वेऽनुपयोगात् । साध्यव्यापकव्याप्यत्वे चात्माश्रयात् । साध्यं यावदव्यभिचारि तदव्यभिचारित्वं तदिति चेत् । न । साध्याव्यभिचारित्वस्यैव प्रयोजकत्वे शेषवैयर्थ्यात् । न चेष्टापत्तिः । साध्यवद्भिन्नसाध्यात्यन्ताभाववदवृत्तित्वस्य केवलान्वयिन्यसंभवात् । नापि स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसामानाधिकरण्यं व्याप्तिः । यत्किञ्चिद्वन्ह्यत्यन्ताभाववति धूमस्य वृत्तेः, संयोगादेरव्याप्यवृत्तेर्द्रव्यत्वाद्यव्याप्यतापत्तेः । न च संयोगित्वं द्रव्यव्याप्यम् । संयोगस्यैव तत्सम्बन्धस्याव्याप्य-

वृत्तित्वात् । नापि साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वम् । साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्त्वस्येति षष्ठ्यर्थो न व्याप्यव्यापकभावः । व्याप्यत्वस्याव्याप्यनिरुक्तेः । नापि ज्ञाप्यज्ञापकभावस्तदर्थः । व्यभिचारिसाधारण्यात् ।

अथ संबन्धमात्रं व्याप्तिः । व्यभिचारिसंबन्धस्यापि केनचिद् व्याप्तित्वात् । धूमादिव्याप्तिस्तु विशिष्यैव निर्वक्तव्येति चेत् ।

इदं व्याप्तिस्वरूपं निरूच्यते व्याप्तिपदप्रवृत्तिनिमित्तं वा ?

नाद्यः । तृतीयलिङ्गपरामर्शविषयव्याप्तिस्वरूपानिरूपणप्रस्तावेऽस्यार्थान्तरत्वात् । सम्बन्धमात्रज्ञानादनुमित्यनुत्पत्तेः । नापरः । संबन्धज्ञानेऽपि व्याप्तिपदाप्रयोगात् । नाप्यविनाभावः । केवलान्वयिन्यभावात् । नापि कात्स्न्र्यसंबन्धः । न हि कृत्स्नस्य साधनस्य साध्येन संबन्धः । कस्या अप्यग्निव्यक्तेः सकलधूमसंबन्धाभावात् । नापि कृत्स्नस्य साध्यस्य साधनेन संबन्धः । कस्यापि धूमस्य कृत्स्नवह्निसंबन्धाभावात् । उच्यते । यावत्स्वव्यभिचारिव्यभिचारिसामानाधिकरण्यमनौपाधिकत्वम् ।

वस्तुतो यत्संबन्धितावच्छेदकरूपवत्त्वं यस्य तस्य सा व्याप्तिः । धूमस्य वन्हिसंबन्धित्वे धूमत्वमेवावच्छेदकम् । धूममात्रस्य वन्हिसंबन्धात् । वन्हेस्तु धूमसंबन्धित्वे न वन्हित्वमवच्छेदकम् धूमासंबन्धिनि गतत्वात् । किन्त्वार्द्रेन्धनप्रभववन्हित्वम् । तादृशं व्याप्यमेव । अधिकस्तु पल्लवोऽन्वीक्षातत्त्वबोधे न्यायनिबन्धप्रकाशे चास्माभिः प्रदर्शित इति तत एवाधिगन्तव्यः ।

अयमपीति । अनौपाधिकः संबन्ध इत्यर्थः । तन्निदानीभूतेति । अव्यभिचारज्ञानानिदानीभूतेत्यर्थः । नन्वनौपाधिकत्वमुपाध्यभाव इति कथं तेनैव तन्निश्चयः । मैवम् । अनौपाधिकत्वविशिष्टः संबन्धो व्याप्तिरिति विशिष्टज्ञानस्य विशेषणज्ञानजन्यत्वात् ।

आकस्मिकत्वेति । यदीदं कार्यमकारणकं स्यात् कादाचित्कं न स्यादित्यर्थः । निःस्वभावत्वेति । एतद्व्यतिरिक्तवृत्तिधर्मशून्योऽयं यद्येतद्व्यभिचारी स्यात् एतद्धर्मवान् न स्यादित्यर्थः । ताभ्यामिति । येनोपायेन तादात्म्यतदुत्पत्ती गृह्येते तेनैव प्रतिबन्धोऽपि गृह्यत इत्यर्थः । तयोरेवेति । तादात्म्यतदुत्पत्तिव्याप्यत्वं प्रतिबन्धस्येत्यर्थः । ते एवेति । तादात्म्यतदुत्पत्ती एवेत्यर्थः । तयोर्व्याप्यव्यापकाभिमतयोरित्यर्थः । उपाधिदर्शनाद्वेति । यथोपाधिनिश्चयेऽपि व्यभिचारसंशयस्तथा वक्ष्यामः । भूयो भूयः सहचारितयोः पार्थिवत्वलोहलेख्यत्वयोरित्यर्थः ।

चतुर्थविकल्पस्याद्यं विकल्पं दूषयति—तत्रेति । व्यभिचारशङ्काप्युपाधिदर्शनादिति दूषयति—व्यभिचारशङ्कापीति । तच्छङ्कया वेति पक्षं दूषयति—अतीन्द्रियाणामिति । प्रमाणपथेति । तादृशशङ्कया तदुत्पत्तेरप्यनिश्चयान्न ततः प्रतिबन्धनिश्चय इत्यर्थः ।

भूयो भूय इति चरमं पक्षं दूषयति—सहचारितयोरिति । सिद्धौ सिद्ध्यर्थमित्यर्थः । तादात्म्यतदुत्पत्ती एव प्रतिबन्ध इति दूषयति—विशेषास्त्विति । अवश्यं हि प्रथमपक्षनिराकरणपरत्वमस्य वाच्यम् । अन्यथा प्रतिबन्धग्राहकतादात्म्यादेरननुगमस्य तद्ग्राहकचक्षुर्लिङ्गादिवददोषत्वात् । तादात्म्यस्य गमकत्वं दूषयति—तादात्म्यं चेति । नियामकमाशङ्क्य दूषयति—संयोगित्वेति ।

द्वितीयं पक्षं निराकर्तुमाह–**न च समानेति**। **प्रतिबन्धानिश्चयोऽपीति** । प्रतिबन्धकतादात्म्यतदुत्पत्तीनामेकोपायनिश्चेयत्वेन प्रतिबन्धनिश्चये तदुत्पत्त्याद्यनिश्चयो न स्यात् । तन्निश्चये च प्रतिबन्धानिश्चयो न स्यान्न चैवमित्यर्थः। **यदनतीतामिति** । वर्तमानसाध्यावभासितानुमितेः । अन्यथा तदर्थिनः प्रवृत्तिर्न स्यादिति भावः

तृतीयं पक्षं दूषयति–**न च तयोरेवेति** । न च भेदे सतीति तादात्म्यव्यावर्तनायोक्तम् । तथा च रसाद्रूपानुमानेऽपि तदुत्पत्तिरस्त्येव । तल्लक्षणसत्त्वादिति भावः ।

स चेदिति । स कार्यकारणभावस्तद्रूपो व्याप्यव्यापकभावरूप इत्यर्थः। **अन्यथाभ्युपायमाहेति**। यादृशेन पूर्वरूपेण जनितो रसस्तादृशमेव पूर्वरूपमनुमापयति । स च रसः । समानकालीनं यद्रूपं तज्जनकेन जनिते तादृशे कारणे रूपेऽनुमीयमाने विशेषणतया रससमानकालं रूपं सिध्यति । प्रयोगस्तु । रसो रससमानकालरूपजनकरूपजन्यो रसत्वादित्यर्थः ।

यद्यप्याद्यः पक्षः पूर्वमेव निराकृतस्तथापि दूषणान्तरमाह–**न च ते एवेति**। **अभिन्नाध्यवसेयेति**। अध्यवसेयशिंशपावृक्षरूपमेकं स्वलक्षणमित्यर्थः । **स यदीति** । स्वलक्षणभेदे तद्वृत्तिव्यावृत्त्योरभेदेऽतिप्रसङ्गादित्यर्थः । ननु यदा स्वाभाविकत्वावधारणमनौपाधिकत्वेन तदा तद्व्यतिरेकोऽप्युपाध्युद्भावनानियतः स्यान्न चैवमित्यत आह–**यद्यपि चेति** ।

ननु सोपाधाववश्यं व्यभिचार इति नास्ति । साधनाव्यापकसाध्यव्यापकोपाधौ पक्षधर्मतामात्रव्यतिरेकात् । यथा तौतातित (क?) दिशा नित्यः अद्रव्यद्रव्यत्वादित्यत्र बहिरिन्द्रियाग्राह्यत्वमुपाधिः । मैवम् । साध्यव्यापकसाधनाव्यापकोपाधिमादाय विचारात् । **व्यभिचारे चावश्यमिति** । ननु व्यभिचारादेवागमकत्वे व्यभिचारादुपाध्यनुमानं व्यर्थम् । अत्र व्यभिचारिण्येकत्र साधने साध्यतदभावसंबन्धोऽवच्छेदभेदं विना नेति साध्यसंबन्धितावच्छेदकमेकमवश्यमिति तदेवोपाधिरित्यस्मत्पितृचरणाः ।

तथापीति । यद्यपि यद्यव्यभिचरितः सबन्धो व्याप्तिः स्यात् तदा व्यभिचारस्यैव व्याप्त्यभावत्वे तन्निश्चयार्थमुपाध्युद्भावनमनुपयुक्तं स्यात् । न चैवम् । किन्तु निरुपाधिः संबन्धो व्याप्तिरित्युक्तम् । तथापि निश्चितेऽपि व्यभिचारे व्याप्तिभङ्गायोपाधिरवश्यमनुसर्तव्यः । तथा च व्यभिचारेऽवश्यमुपाधिसत्त्वाद्व्यतिरेकानिश्चयेन सामान्यत उपाधौ निश्चिते विशिष्य तदनुसरणं व्यर्थम् । तस्य व्यभिचारस्य तदर्थत्वादुपाधिनिश्चयादित्यर्थः । वस्तुतस्त्वव्यभिचरितः संबन्धो व्याप्तिर्लाघवात् । अनौपाधिकत्वं तु तल्लक्षणमिति व्यभिचारस्य साक्षान्निश्चये उपाध्यनुसरणं व्यर्थमित्येवंपरो ग्रन्थः । न चैवमव्यभिचारस्य व्याप्तित्वे व्यभिचारस्तदभावत्वेनासिद्धः स्यान्न त्वधिक इति वाच्यम् । साध्याभाववद्गामित्वं हि व्यभिचारस्तदभावश्च नाव्यभिचारः । केवलान्वयिन्यभावात् । किन्तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यम् । न चानयोः परस्पराभावरूपत्वम् ।

नन्वेवमुपाधिरसिद्ध्युपजीव्यत्वेन सव्यभिचारवद्धेत्वाभा-

सान्तरं स्यात् । न तु व्याप्त्यभावत्वेनासिद्धिः ।

नैवम् । उपजीव्यत्वेऽपि स्वतो दूषकत्वाभावात् । न ह्यन्यस्य साध्यव्यापकसाधनाव्यापकत्वाज्ञानमन्यस्य साध्यव्याप्यत्वज्ञाने स्वतःप्रतिबन्धकम् । व्यभिचाराज्ञानस्य तद्धेतुतया तज्ज्ञानस्य तथात्वात् । तथा च व्यभिचारज्ञानजनकतया स दूषक इति दूषकतायां परमुखनिरीक्षणत्वादसिद्ध्युपजीव्योऽप्युपाधिः सिद्धसाधनवन्न पृथक् हेत्वाभासः ।

अस्फुटश्चेति । यथोपाधेर्व्यभिचारोन्नायकत्वेन दूषकत्वं न तु स्वव्यतिरेकेण सत्प्रतिपक्षोत्थापकतया तथा वक्ष्यामः । ननु **तदभाव एवेति** । योग्यानामुपाधीनां योग्यानुपलब्ध्याऽभावनिश्चयेऽप्ययोग्यानां तेषां कथमभावः प्रत्येतव्यः । अनुमानान्तरेण तदवगमेऽनवस्थानादित्यर्थः ।

प्रमाणपदवीमिति । यद्यप्युपाध्यभावः कथं निश्चेय इति प्रश्ने नैतदुत्तरं प्रमाणपथावतीर्णस्योपाधेः शङ्कनीयत्वेऽप्युपाध्यभावानिश्चयस्य तादवस्थ्यात् । तथाप्युपाध्यभावनिश्चयाभावः किमुपाधिशङ्कया दुष्परिहरत्वेन तद्ग्राहकमानाभावेन वा । द्वितीयमग्रे दूषणीयम् ।

आद्यं दूषयति—**प्रमाणपदवीमिति** । ननु प्रमाणपथावतीर्ण एवोपाधिः शङ्क्यतां तथाप्यवान्तरविशेषो नास्ति व्यभिचारशङ्कायाम्, तथा च कथं व्यभिचारशङ्कयानुमानमित्यत आह—**तदयमिति** । **व्यभिचार एवेति** । व्यभिचारे साध्याभाववद्वृत्तित्व इत्यर्थः न त्वनैकान्तिके । तेन बाधविरुद्धयोरपि व्याप्त्यभावः सिद्ध्यति ।

यद्वा—उपाध्यभावो व्याप्तेर्लक्षणमित्युक्तं व्याप्तिस्त्वव्यभिचरितः संबन्धः । तथा च व्यभिचार इति प्रथमान्तमेव । **साधने सोपाधिरिति** । ननु साध्ये सोपाधिरप्युपाधिर्भवत्येव यथा पर्यवसितसाध्यव्यापकः, तत्र यद्यपि पर्यवसितं साध्यमप्रसिद्धं तथापि साध्ये यत्पर्वतीयत्वादिकं पर्यवस्यति तद्व्यापकः स्यात् तद्व्यतिरेकाच्च पर्वतीयत्वव्यतिरेक उन्नेतुं शक्यते ।

नैवम् । व्यभिचारोन्नायकस्योपाधेरत्र लक्षणीयत्वात् । व्यापकानामाकाशादीनामुपाधित्वे समव्याप्तिकोपाधिपक्षमाश्रित्य दूषणमाह—**वन्हेः सार्वत्रिकत्वेति** । एवमग्रेऽपि । विषमव्याप्तिकोपाधिपक्षे साधनव्यापकत्वं तेषामिति भावः । **नित्यानामिति** । परमाण्वादीनामित्यर्थः । अत्रापि विषमोपाधिपक्षे साधनव्यापकत्वमेव दोषोऽभिप्रेतः । **उभयेति** । साधनं साध्यं चेत्युभयम् । उभयव्याप्ता इत्यर्थः । यद्यप्युभयाव्यभिचार्यनित्यः प्रमाणपरिदृष्टो नैयायिकानामप्रसिद्धः महानसादीनामुभयव्यभिचारित्वात् वह्निमत्त्वस्य चोपाधेर्नित्यत्वात् । तथापि वह्निरेव वह्निव्यापकस्तथाभूतः प्रसिद्धः । अभेदेऽपि व्याप्यव्यापकभावादिति भावः ।

तत्रेति । प्रथमे साधनव्यापकत्वात् । द्वितीये साध्याव्यापकत्वादित्यर्थः । **धूममात्रेति** । मात्रशब्दोऽत्र सामान्यार्थो न तु व्यवच्छेदार्थः । वह्निधूमयोर्व्याप्त्यभावापत्तेः । **पूर्व इति** । साधनव्यापकत्वादित्यर्थः । **व्याप्यमात्रेति** । मात्रपदेन वह्निव्यापकत्वनिषेधः । तथा च साध्याव्यापकत्वमित्याह—**पूर्व इति** । **उभयरूपा इति** । साध्यव्याप्यत्वे सति साध्यव्यापक इत्यर्थः । सा चेति ।

यद्यपि स श्यामो मैत्रतनयत्वादित्यत्र शाकपाकजत्वं सामग्र्येवोपाधिः । तथापि यत्र साध्यसामग्र्या सह साधनव्याप्तिस्तत्र साधनव्यापकत्वात् सामग्री नोपाधिः । यत्र तु तन्नास्ति तत्र सामग्र्युपाधिरेव । न च तेनैव हेतुना शाकपाकजत्वमपि साध्यम् । तत्र श्यामत्वस्योपाधित्वात् । उभयस्यापि साधने चार्थान्तरत्वम् । श्यामत्वमात्र एव विप्रतिपत्तावुभयत्राप्यविप्रतिपत्तेः । ग्रन्थस्तु सामग्री क्वचिन्नोपाधिर्यत्र साधनव्यापिकाऽन्यत्र तूपाधिरेवेति योजनीयः ।

धूमस्येति । धूमाद्वह्न्यनुमाने न वह्निसामग्र्युपाधिः । वह्निनेव तत्सामग्र्यापि सह धूमस्यानौपाधिकत्वनिश्चयेन साधनव्यापकत्वनिश्चयात् । मैत्रतनयत्वं व्याप्य स्थातव्यं श्यामसामग्र्येत्यत्र च कार्यकारणभावादीनां व्याप्तिग्राहकाणामभावादित्यर्थः ।

वह्निजननेति । तथा च वह्निसामग्र्या उपाधित्वे वह्निरेवोपाधिरुक्तः स्यात् । सामग्र्यास्तावत्कारणात्मकत्वात् । वह्नेरपि च कारणत्वादित्यर्थः । यद्यपि वह्निद्व्यणुकं न वह्निजन्यं वह्नित्वस्य परमाणाववृत्त्यावयविमात्रवृत्तित्वात् । तथापि यदा प्रत्यक्षवह्निसामग्र्युपाधिरुच्यते तदा वह्निरेवोपाधिः स्यात् । साध्यं च नोपाधिः । व्यभिचारिसाधने साध्यावैशिष्ट्यप्रसङ्गादनुमानमात्रोच्छेदप्रसङ्गाच्चेति भावः । ननु वह्निरनुष्णः कृतकत्वादित्यत्र बाधोन्नीतपक्षेतरत्ववत् पर्वतेतरत्वमुपाधिः स्यादित्यत आह—**नचेति** । तत्र वह्न्यावुपजीव्यप्रत्यक्षेण साध्याभावप्रमया साधनस्य साध्यव्यभिचारनिश्चयाद्व्यभिचारे चावश्यमुपाधिसद्भावादन्यस्य

चोपाधेरभावात् पक्षेतरत्वमुपाधिः । प्रकृते च न तथा । अनुमानमात्रोच्छेदादित्यर्थः । यद्यपि सर्वत्र बाधे नोपाधिः, धूमेन जलह्रदेऽग्निसाधने तदभावात् । तथापि साधनवति पक्षाभिमते बाधे सत्युपाधिरस्त्येव ।

अत एवेति । यद्यपि बाधितत्वज्ञानाभावस्यानुमितिप्रयोजकतया विरोधिप्रमाणाभावनिश्चयोऽप्रयोजकस्तथापि विरोधिप्रमाणसंशयस्यानुमितिप्रतिबन्धकतया तदभावनिश्चयोऽपेक्षणीय इति भावः ।

नन्वेतावता प्रत्यक्षोपाध्यभावनिश्चयेऽप्यतीन्द्रियतदभावः कथं निश्चेयः, कथं वा साध्यव्यापकोऽयं साधनव्यापको न वेति संशयस्य देशान्तरकालान्तरयोर्व्यभिचारसंशयस्य च निवृत्तिरित्यत आह—**तर्कश्चेति** । यथा च तर्कस्य शङ्कानिवारकत्वं तथोक्तमधस्तात् ।

साधनाव्यापकत्व इति । नन्वेतत् साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्योरव्यापकम् । न च तयोरनुपाधित्वम् । दूषकताबीजसाम्यात् । बाधानुन्नीतपक्षेतरत्वेऽतिव्याप्तेश्च । न च यत्र पक्षे साध्यं नास्ति तत्र बाधोन्नीतः पक्षेतरत्वमुपाधिरिष्यत एव । यत्र च पक्षे तदस्ति तत्र साध्याव्यापकत्वान्न तस्योपाधित्वमिति युक्तम् । पक्षातिरिक्तसाध्यव्यापकत्वनिश्चयेनैवोपाधित्वात् तस्य च तत्र सत्त्वात् । अन्यथोपाधिमात्रोच्छेदापत्तेः ।

अथोपाधेः स्वव्यतिरेकेण सत्प्रतिपक्षीभूय दूषकत्वात् पक्षे-

तरत्वव्यतिरेकस्य चातन्त्रत्वात् । केवलान्वयिनि साध्यात्यन्ताभावाप्रसिद्धेः केवलव्यतिरेकिणि विरुद्धत्वात् । अन्वयव्यतिरेकिणि चासाधारणत्वात् ।

नैवम् । तथा सति सत्प्रतिपक्षे तदनुद्भावनापत्तेः । एकेनैव भूयसामपि प्रतिबन्धात् । संदिग्धोपाधेरदूषकतापत्तेश्च । पक्षे तदभावस्य संदिग्धत्वात् । बाधोन्नीतस्यापि तस्यानुपाधितापत्तेश्च । अथोपाधिलक्षणे विपक्षाव्यावर्तकविशेषणशून्यत्वं विशेषणं पक्षेतरे च विशेषणस्य पक्षमात्रे व्यावर्तकतया विपक्षाव्यावर्तकत्वात् आर्द्रेन्धनवत्त्वादेश्च विशेषणस्य विपक्षतप्तायःपिण्डादिव्यावर्तकत्वात् । एतच्च विशिष्टव्यतिरेकेऽप्यस्ति । बाधोन्नीते च नाव्याप्तिः । तस्य पक्षाभिमतस्यापि विपक्षत्वादित्युच्यते । तर्हि व्यभिचारावारकविशेषणवत्तया दूषकत्वमेवास्य नास्ति । ओमिति चेत् । न साध्यव्यापकसाधनाव्यापकत्वमात्रस्यैव तद्बीजत्वात् । न च व्यभिचारावारकविशेषणशून्य एव व्याप्तिग्रहः । न हि वस्तु व्यभिचारावारकविशेषणशून्यं भवति । प्रमेयत्वादेः सर्वत्र सत्त्वात् । नापि तत्रोपात्तविशेषणशून्यत्वं विवक्षितम् । न हि तत्रोपात्तं तेन शून्यं चेति संभवति । तस्मात्साध्यव्यापकत्वं साधनाव्यापकत्वं पक्षेतरत्वेऽप्यस्तीति तदभावात् साध्याभावः स्यादेवेति हेतोर्व्यभिचार एव । व्यभिचारे चावश्यमुपाधिरिति पक्षेतरत्वमेवापोधिः स्यात् । अत एवासाधकमिदं सोपाधित्वादित्यत्रापि पक्षेतरत्वोपाधेः संभवादनमानमात्रोच्छेदकतया न तदुपाधिरित्यपास्तम् । साध्यव्यापकतया तद्व्यतिरेकस्य दूषणसंबन्धत्वेन जातित्वाभावात् । नापि पक्षधर्मा-

वच्छिन्नसाध्यव्यापकत्वे साधनाव्यापक उपाधिरार्द्रेन्धनप्रभववह्निमत्त्वादेः केवलसाध्यव्यापकस्योपाधेरसंग्रहात् । को हि पक्षवृत्तिधर्मस्तदवच्छेदकः । शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वस्योपाधित्वप्रसङ्गाच्च । भवति हि शब्दत्वादिजातौ साध्याव्यापकमपि शब्दवृत्तिगुणत्वावच्छिन्नाभिधेयत्वस्याश्रावणत्वं व्यापकम् । एतेन साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमित्यपास्तम् । आर्द्रेन्धनप्रभवत्वादेरुपाधेरव्यापनात् । जलं प्रमेयं रसवत्त्वादित्यत्र रसवत्त्वावच्छिन्नप्रमेयत्वव्यापकस्य पृथिवीत्वस्योपाधित्वापाताच्च । नापि पक्षावृत्तित्वे सति साध्यव्यापकत्वम् । अन्धकारो द्रव्यं स्वातन्त्र्येण प्रतीयमानत्वादित्यत्राश्रावणत्वस्यानुपाधित्वापत्तेः । पक्षवृत्तित्वात् । नापि साध्यसाधनसंबन्धव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वम् । उपाधिना साध्यव्यभिचारानुमाने साध्यव्यापकव्यभिचारित्वस्यैव गमकत्वे व्यर्थविशेषणत्वात् । नापि साध्यसमव्याप्तत्वे सति साधनाव्यापकत्वमुपाधित्वम् । विषमव्याप्तस्यानुपाधितापत्तेः । व्यभिचारोन्नायकत्वस्य दूषकताबीजस्य तत्रापि सत्त्वात् । इदं साधनमेतत्साध्यात्यन्ताभाववद्वृत्ति एतत्साध्यव्यापकाव्याप्यत्वादिति प्रयोक्तुं शक्यत्वादिति ।

उच्यते । पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वम् । यद्धर्मावच्छेदेन साध्यं प्रसिद्धं तदवच्छिन्नं पर्यवसितं साध्यम् । तत्रार्द्रेन्धनवह्न्याद्युपाधौ महानसत्वाद्येव तादृशो धर्मः । तदवच्छेदेन साध्यस्य धूमस्य प्रसिद्धेः । पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधौ द्रव्यत्वं, साधनावच्छिन्नसाध्यव्यापकोपाधौ

साधनमेव तथा । तथा च तदवच्छिन्नसाध्यव्यापकोपाधिव्यभिचारेण साधनस्य साध्यव्यभिचारः स्यादेव । व्यापकव्यभिचारिणस्तद्व्याप्यव्यभिचारित्वानियमात् । न च पक्षधर्मावच्छिन्नसाधनावच्छिन्नोपाधिव्यभिचारेण साधनस्य साध्यव्यभिचारोन्नयनेऽर्थान्तरम् । विशेषणाव्यभिचारित्वेन निश्चिते साधने विशिष्टव्यभिचारस्य सिध्यतो विशेष्यसाध्यव्यभिचारमादाय सिद्धेः । पक्षधर्मताबलात् । अन्यथा प्रतीतेरपर्यवसानात् । न च पक्षधर्मताबललभ्यसाध्यसिद्धावर्थान्तरत्वम् । अतिप्रसङ्गात् । नापि स्वव्याघातकत्वेनानुपाधौ पक्षेतरत्वेऽतिव्याप्तिः । अनुकूलतर्काभावेन तस्य साध्यव्यापकत्वानिश्चयात् । बाधोन्नीते च पक्षेतरत्वे साध्यव्यापकताग्राहकस्यानुकूलतर्कस्य सत्त्वात् । उपाधिश्च न स्वव्यतिरेकद्वारा सत्प्रतिपक्षतया दूषकः । संदिग्धोपाधेरदूषकतापत्तेः । नापि साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया । साध्यव्याप्यसाधनाभिमताव्यापकत्वेनोपाधेरेव साध्यव्यापकत्वसाधनात् । नापि व्यभिचारोन्नायकत्वेन । साध्यव्याप्यव्यभिचारित्वेनोपाधेरेव साध्यव्यभिचारानुमानात् । तस्माद्विपक्षबाधकेन यावन्नोपाधेः साध्यव्यापकत्वं निश्चीयते तावदुपाधित्वाभावेन दूषणतैवास्य नास्तीति न दूषकताबीजचिन्ता । तन्निश्चये च साधनाभिमतस्य साध्यव्यापकत्वानिश्चयान्न तद्व्यभिचारित्वेन तदव्यापकत्वेनोपाधेः साध्यव्यभिचारित्वं साध्याव्यापकत्वं वानुमीयत इति संक्षेपः ।

दर्शनादर्शनेति । बाह्यस्य व्याप्तिरूपस्य ग्रहणे सहकारि

बाह्यसहकारि दर्शनादर्शनरूपं बाह्यसहकारिरूपं यस्य मनसस्तत्तथोक्तम् । दर्शनादर्शनयोरसाधारणतया मनःसहकारित्वं साधारणतया वा ? आद्ये । असाधारणनिमित्तेति । द्वितीये । किञ्चेति । तस्मादिति । ननु यत्र बहिरिन्द्रियोपरमे भूयोदर्शनजसंस्कारात् कारणान्तरेण व्याप्तिग्रहः तत्र बहिरिन्द्रियजन्यः सः । तस्मान्मनःसहकारी संस्कारः । न चैवं शब्दादेरिव संस्कारस्य मानान्तरत्वापत्तिः । तर्कावतारे तस्य प्रयोजकत्वात्तस्य चाप्रमात्वादतो निद्रादिवदप्रमाजनकत्वान्न मानान्तरत्वम् ।

ननु सर्वेषामेव सविकल्पकानां संज्ञास्मरणान्तरकालीनत्वनियमः । तटस्थस्यैव वाचकस्य वाच्यत्वोपलक्षकत्वात् । तच्च शब्दस्मरणं निर्विकल्पकेन कर्तव्यमिति व्याप्तावपि निर्विकल्पकापत्तिरित्यत आह—संज्ञास्मरणस्येति । क्वचिदिति । यथा यत्र सादृश्येन रूपेण सादृश्यं न ज्ञायते तत्र सादृश्ये निर्विकल्पकमेवं यत्र व्याप्तित्वेन रूपेण व्याप्तिज्ञानं तत्र व्याप्तौ न निर्विकल्पकम् । यत्र तु व्याप्तित्वेन ज्ञानं तत्र सविकल्पकवेद्यत्वमेव । व्याप्तित्वस्य केवलसविकल्पकवेद्यत्वात् ।

विस्फूर्जन्तामिति । यद्यपि हि विस्फुरणं नकुलकार्यमिति न विरोध्युदाहरणम् । तथाप्यहिनकुलयोर्विरोधेन तथात्वम् । पञ्चम्या हेतुत्वपरतानिराकरणाय व्याचष्टे—कथमेतदिति । न चैवं सतीति । एतेन संबन्धिनामतिप्रसक्तिं निवारयति न तु संबन्धानामित्यर्थः । तस्यैवेति । संबन्धमात्रस्येत्यर्थः । एतस्येति ।

कार्यास्वाभिधानस्येत्यर्थः । ननु कथमौं श्रावयन्नध्वर्युर्होतुर्लिङ्गम् । होतारं विनाप्यध्वर्योरौंशब्दकर्तृकत्वादित्यत आह–होतुरित्यनेनेति । तेन होतृसन्निहितायां यागभूमावौं श्रावयन्नध्वर्युर्होतृलिङ्गमिति वाक्यार्थ इत्यर्थः । ननु लिङ्गविशेषणत्वेन होतुः प्रागेव ज्ञानात् किमनुमेयमित्यत आह । **प्रयोगस्त्विति** । तेनाध्वर्योर्होतृसबन्धे साध्ये न सिद्धसाधनम् । होतुः सन्निहितयागभूमावित्यन्वयः ।

तदनन्तरभावित्वेति । अभ्युपगमवादोऽयम् । वस्तुतश्चन्द्रोदयसमुद्रवृद्ध्योः समयभावित्वमेव । **पूर्वरूपनिवृत्ताविति** । यद्यपि जलपरमाणौ रूपं नित्यमेव जलावयविनि कारणगुणप्रक्रमेणैवोत्पद्यते । तथापि पूर्वरूपनिवृत्ताविति पूर्वरूपवतः पार्थिवस्य निवृत्तौ रूपादीत्यतद्गुणसंविज्ञानबहुव्रीहिणा स्वच्छतां लक्षयति । सा चौपाधिकसंसर्गाभाव एव ।

सर्वमेवानुमानमिति । अनुमानमत्र लिङ्गं न तु फलम् । तस्य सर्वत्रादृष्टत्वात् । **सर्वमेवेति** । सामान्येन रूपेण व्याप्तिग्रहविषयतया सर्वमेवानुमानं सामान्यतो दृष्टं भवतीत्यर्थः ।

समानतन्त्रेति । तत्रोक्तस्य पारिभाषिकरूपान्तरस्यानाभिधानादित्यर्थः । **नञर्थेति** । तत्र सामान्यतो दृष्टपदस्य नञर्थान्तर्भावेन व्याख्यातत्वादित्यर्थः । **एकस्य हीति** । एकस्य पक्षस्य । व्याप्त्या व्याप्तिज्ञानेन । सामान्यलक्षणप्रत्यासत्त्या सामान्येन पक्षविषयकमपि साध्यज्ञानं वृत्तमित्यर्थः । **यथा गव्येवेति** । आद्यदर्शनादौ गोत्वमनुपलभ्यापि सास्नोपलब्धा । भूयोदर्शनादौ

तु गोत्वसास्नात्वयोर्व्याप्तिमुपलभ्य पूर्वदृष्टे गवि गोत्वानुमितिर्भवतीत्यर्थः । पक्षसपक्षयोर्जात्यभेदमभिधाय पक्षसपक्षवृत्तिसाध्ययोस्तदाह–**अथवेति** । येनैव साध्येन सह व्याप्तिर्गृह्यते तस्यैव यदनुमानं तद्दृष्टम् । यच्च सामान्यतो गृहीतव्याप्त्या तज्जातीयधर्मान्तरसाधकं तत् सामान्यतो दृष्टमिति संक्षेपः ।

पूर्वं हीति । गोव्यक्तौ गोत्वजातिवैशिष्ट्यमनुमितामिति पक्षसपक्षात्मकजातीयौ । **संप्रत्यपीति** । (सास्नादिमत्त्वे ?) गोव्यक्तिसंबन्धस्य साध्यत्वे भवति । साध्यस्यैकजात्यमित्यर्थः । **पूर्ववदिति** । प्रसिद्धं यत्पूर्वं लिङ्गेन सह दृष्टं साध्यं फलवत्त्वरूपं यच्च संप्रति फलानुमानं तयोरत्यन्तं जातिभेद इत्यर्थः । न तु पक्षसपक्षयोरत्यन्तं जातिभेदः । प्रयत्नत्वेनैकजात्यात् । फले च स्वर्गापवर्गादावैकजात्यभाव एव । अत एवाग्रे साध्यमात्रसाजात्यं वक्ष्यति ।

अत्र सस्यादिकमित्यादि । ननु हेयत्वोपादेयत्वमन्तरेण ज्ञानत्वमेव न संभवतीत्याह–**उपेक्षेति** । ननु स्वनिश्चितमात्मनि निश्चितं घटादिकं तदर्थं नानुमानं तस्य ज्ञानार्थत्वादित्यत आह–**भावे क्त इति** ।

नन्वनुमाने प्रमाणे शब्दान्तर्भावस्तदा संभाव्येत यदि शब्दः प्रमाणं स्यान्न तु तत्सिद्धमिति कुतस्तस्यानुमानान्तर्भावचिन्तेत्यत आह–**इह खल्विति** । न च शब्दः प्रमाणं न वेति न वा कोटेरप्रसिद्धिः । परामृष्यमाणलिङ्गकरणतावादिमते चरमध्वंसे प्रमाकरणत्वाभावप्रसिद्धेः । **भेदत इति** । शब्दोऽनुमानभिन्नो न वेत्यर्थः ।

लक्षणत इति । शब्दः प्रत्यक्षानुमानवृत्तिधर्मवान्न वेत्यर्थः ।

तत्प्रामाण्यमिति । वादिना शब्दाप्रामाण्यसाधनाय यत्प्रमाणशब्देनोपस्थाप्यं कुतस्ततः शब्दाप्रामाण्यं सिध्येदित्यर्थः । ननु शब्दाप्रामाण्येऽपि शब्दोपस्थापितैरगृहीतैः शब्दाप्रामाण्यबोधकमनुमानमुपस्थाप्यते न तु शब्देन तत् साध्यते । वादिनोऽनाप्तत्वात् ।

अत्राहुः । वादिवाक्यं स्वसमानविषयकप्रमाणोत्थापनद्वारा शब्दाप्रामाण्यं बोधयति न वा ? न चेदतिप्रसङ्गः । आद्ये । शब्दाप्रामाण्ये प्रमाणान्तरस्यापि न तत्समानविषयकत्वेन प्रामाण्यसिद्धिरिति कुतस्तदिष्टसिद्धिरिति भावः । ननु पुञ्जात्पुञ्जोत्पत्तिरिति न्यायेन चक्षुरपि रूपकार्यं, तथा च तदुत्पत्तिलक्षणस्तत्रास्तीत्यत आह–न च चक्षुरपीति । ननु चक्षुः कथं रसादिकार्यमित्यत आह–रूपरसादीति । तव दर्शने तेनैव न्यायेन रूपरसादिपुञ्जजन्यत्वं चक्षुष इति रसादिजन्यताप्यस्तीति रसादीनपि गमयेदित्यर्थः । यदि चाविनाभावाच्चक्षू रूपं गमयति तदा यत्राविनाभावस्य प्रयोजकत्वं तत्र ज्ञायमानस्यैवेति न चक्षुरज्ञाने तदविनाभावज्ञानमिति कथमज्ञायमानाच्चक्षुषो रूपज्ञानमित्याह–अविनेति । ज्ञानसमसमय इति । ज्ञानोत्पत्तिकालोत्पत्तिक इत्यर्थः । अनन्तरेति । अव्यवहितप्राक्कालीनो वेत्यर्थः । प्रत्यक्षज्ञानस्य संबद्धवर्तमानमात्रविषयकत्वनियमात् क्षणभङ्गनयेन च पूर्वोत्तरक्षणोत्पत्तिकयोरभावनियमादतितुच्छत्वेनायं पक्षः पृथङ् न दूषितः ।

आद्य इति । तुल्यकालोत्पत्तिकयोः कार्यकारणभावादि-

त्यर्थः । संबन्धमात्राभावादिति पक्षमुपसंहरन्नेव निराकरोति–तस्मादिति ।

ननु वैशेषिकाणामविनाभावबलेन शब्दोऽर्थं बोधयतीति चक्षुरादिवत् स्वभावसंबन्धेन शब्दस्यार्थप्रतिपादकत्वस्वीकारेऽपसिद्धान्तः स्यात् ।

अत्राहुः । नायं शब्दार्थयोरविनाभावनिराकरणपरो ग्रन्थः । किन्तु ये शब्दस्यार्थप्रतिपादकत्वान्यथानुपपत्त्याविनाभावमाहुस्तन्मतमनेन निराक्रियते ।

शब्दार्थयोः संबन्धमाह–तत्तत्सङ्केतेति । लक्षणं च तथेति । व्यावर्तको धर्म इत्यर्थः । अप्रमाणशब्दस्य व्यावर्तनामाह–सिद्धेति । ननु पूर्वं न कस्याप्यनुमानेऽन्तर्भाव उक्तो यदपेक्षयापि शब्द इत्यत आह–अपिशब्दश्चेति । साक्षादिति । साक्षात्संबन्धः संयोगसमवायाभ्याम् । तदन्यत्वेन परम्परासंबन्ध इत्यर्थः । अनैकान्तिकमिति । गौरश्व इति स्मारितेनेत्यर्थः । न ह्यत्रेति । पदपदार्थयोर्न संयोगो न वा समवायः संबन्ध इत्यर्थः । विशेषणेति । विशेषणविशेष्यभावो हि परस्परमन्वयो न पदार्थयोरित्यर्थः । न चेति । लिङ्गस्य लिङ्गतया यज्ज्ञापकत्वं तदेव तस्य विषयो वाच्य इति नेत्यर्थः । परस्पराश्रयं विवृणोति–तदुपलम्भे हीति । प्रकारान्तरेण शब्दस्य लिङ्गत्वासिद्धौ ततोऽनुमितिसिद्धौ लिङ्गतया ज्ञापकत्वे व्याप्तिः सिध्येत् । अनेनैव रूपेण ज्ञापकत्वे लिङ्गत्वमित्यर्थः । ज्ञापकत्वमात्रे क्वात्र प्रसिद्धिः । प्रमापकत्वे व्यभिचार इति भावः । तथापीति । एते पदार्थाः । मिथः संसर्गवन्त इति

साध्यं प्रागुक्तमनुवर्तते । विशेषासिद्धिः संसृज्यमानः प्रत्येकपदार्थ इत्यस्य विशेषस्यासिद्धिरित्यर्थः । **संसर्गस्येति** । पदार्थविशिष्टस्यैव संसर्गस्य ज्ञानविषयत्वादित्यर्थः । ननु मिथः संसर्गसिद्धावप्येकज्ञानविषयत्वादिरेव संसर्गोऽस्तु । यद्वा । गवा दण्डमभ्याजेत्येवान्वयोऽस्तु । न । वक्तृतात्पर्यविषयत्वेन संसर्गस्य विशेषणात् । योग्यतया लिङ्गविशेषणान्नानापुंवक्तृकपदस्मारिते व्यभिचार इति भावः ।

यद्वैतानीति । ज्ञानविशेषणत्वेनात्रापि पदार्थसंसर्गसिद्धिः । भ्रान्तप्रतारकवाक्येन न व्यभिचारः । तस्याप्याहार्यसंसर्गज्ञानोपगमात् । तथापि शुकोदीरिते संवादिवाक्ये व्यभिचारः । तत्रापीश्वरस्यैव वेद इव संसर्गज्ञानात् । न चैवं भ्रान्तभ्रान्तिज्ञसंकरापत्तिः । भ्रान्तिज्ञज्ञानस्य भ्रान्तिविषयविषयकत्वेन व्यधिकरणप्रकारकत्वाभावात् । व्यधिकरणप्रकारकत्वस्य भ्रमज्ञानस्य भ्रमे सत्त्वात् ।

संसृष्टा एवेति । यद्यपि संसृष्टा इति साध्यं न तु नियमोऽपि । तथापि संभावनासाध्यत्वव्यवच्छेदपरमेतत् । **तदुक्तेरपीति** । अविप्रलम्भकेन भ्रान्तेन यदुक्तं पदजातं तदर्थानां संसर्गाभावादित्यर्थः । **प्रागेवेति** । योग्यतयैव हेतुविशेषणेनेत्यर्थः । **न तावदिति** । विशेषणविशेष्यभावस्य संसर्गरूपतया प्रागसिद्धेरित्यर्थः । **नापि यद्योग्यतेति** । योग्यतयैव गतार्थत्वादित्यर्थः । **नाप्याविनेति** । नीलं घटमानयेत्यादौ तदभावादित्यर्थः । **नापि विशेषेति** । नीलेन विशेषेण व्याप्येन सामान्यगुणमात्रं व्यापकमाक्षिप्तं तथा सरोजेन तथैव द्रव्यमात्रं तदनयोरविनाभावोऽस्त्येवेत्यर्थः । एतच्च न । घटो भवतीत्यत्र

घटेन गुणिसामान्यस्याक्षिप्तस्याविनाभावेन साकाङ्क्षतया पर्यवसानप्रसङ्गात् । **नापि प्रतिपत्तुरिति** । घटो भवतीत्यत्र प्रतिपत्तुर्गुणादिजिज्ञासायां पर्यवसानप्रसङ्गादित्यर्थः । **किं तर्हीति** । घटो भवतीत्यत्र तु गुणादिजिज्ञासा न पदस्मारितविशिष्टविषयेति न साकाङ्क्षत्वमित्यर्थः । **सत्तामात्रेणेति** । तथा चाकाङ्क्षायां सत्यामेव शब्दस्य ज्ञानजनने संभृतसामग्रीकत्वाद्धेतुरेव विलम्बित इति भावः । तर्हि माभूदाकाङ्क्षा लिङ्गविशेषणमित्यत आह—**आसत्तियोग्यतेति** । **व्यभिचारादिति** । राजपदार्थपुरुषपदार्थयोः परस्परमन्वये वक्तृज्ञानाभावादित्यर्थः । **न त्वेतदस्तीति** । यद्यपि प्रतिपदार्थमुत्थिताकाङ्क्षा तत एव विनष्टा कथं कालान्तरे स्वरूपसती वाक्यार्थप्रत्ययजननी । तज्ज्ञानकारणत्वे तु ज्ञानस्यापि पूर्वं नाशे संस्कारादुपयोगस्तस्याः संभवति । तथापि समूहविषयैकैव जिज्ञासा स्वरूपसती वाक्यार्थबुद्धौ हेतुः संभवति । भवतु वाकाङ्क्षा ज्ञातैव कारणम् । तथापि तद्विशिष्टो हेतुरनैकान्तिक इत्याह—**न वाकाङ्क्षायामिति** । **सा च स्मारितेति** । क्वचिद्बहिरस्तु इत्यादौ शब्दस्मारितयोरेवाविनाभावः । क्वचित्तदाक्षिप्तयोर्नीलं सरोजमित्यादौ । एतावतैव कृते अहो विमलं जलं नद्यास्तीरे महिषश्चरतीत्यादावाकाङ्क्षासत्त्वादेव वाक्यता स्यादित्यत आह—**श्रोतरि तदुत्पाद्येति** । तेन वक्त्रानुत्पादितः स्मारितः इत्यादि तु प्रायिकत्वादुक्तम् । श्रोतृनिष्ठवक्तृविवक्षितसंसर्गावगमप्रागभाव इत्यर्थः । **प्रतियोगीति** । अयं प्रागभावो यदि ज्ञात उपयुज्यते तदा प्रतियोगिन्यवगमे ज्ञाते

ज्ञातव्यः । स च स्वविषयसंसर्गे ज्ञाते निरूप्य इति संसर्गस्य पूर्वमेव ज्ञानाद्वाक्यमनुवादकं स्यादित्यर्थः । **नियम एवेति** । यद्यपि नियमस्य न साध्यता । न हि वाक्यान्नियमः प्रतीयते । तथापि संभावनासाध्यतानिराकरणपरमिदम् ।

शब्दमात्रादिति । आप्तोक्तानाप्तोक्तसाधारणादित्यर्थः । **विवक्षितार्थेति** । वक्तृतात्पर्यविषयवाक्यार्थप्रतीतिरित्यर्थः । **ननु तत्रापीति** । योग्यतादिज्ञानमात्रस्य प्रमाऽप्रमासाधारणस्य शाब्दज्ञानमात्रकारणत्वादित्यर्थः । **प्रवृत्तिसंकल्प इति** । प्रवृत्तिजनकः संकल्प इच्छा । **तदानीमिति** । आप्तोक्तत्वानिश्चयदशायामित्यर्थः । **न हीति** । व्याप्तत्वेनाप्रतिसंहृतमित्यर्थः । **अबाधितविषयत्वेति** । यद्यपि बाधाभावः स्वरूपसन्नेव प्रयोजको न तु ज्ञातस्तथापि बाधस्य हेत्वाभासतया ज्ञातस्यानुमितिप्रतिबन्धकत्वान्न ह्यज्ञाने यन्न भवति तत्तदभावज्ञानसाध्यं यथोपाध्यभावज्ञानाधीनानुमितिरिति । **व्याप्तेरिति** । बाधाभावज्ञानमनुमितिहेतुः । **प्रामाण्येति** । विशेषदर्शने सति शङ्काया अनुदयादित्यर्थः । **शब्दमात्रमिति** । संकेतज्ञानानपेक्षमित्यर्थः । **शब्दापशब्देति** । अर्थप्रतिपादकत्वस्यार्थस्मारकत्वस्यापशब्देऽपभ्रंशेऽपि सत्त्वादित्यर्थः । **किन्तु यः शब्द इति** ।

नन्वेतावता पदार्थमात्रे आप्तत्वमायाति न तु वाक्यार्थे । पदार्थमात्रे चाप्तत्वमनाप्तवाक्येऽप्यस्ति । अत्राहुः । तत्रापि सुग्रहमेवाप्तत्वम् । तथा हि । वेदे तावदीश्वरस्य धर्मिग्राहकमानेनैव दोषाभावः सुग्रहः । लोकेऽपि भ्रमाभावोऽत्यन्ताभ्यस्तकाननानां काननविभाग-

परवाक्यत्वात्सुग्रहः । विप्रलिप्साद्यभावोऽपि प्रकरणादिना ज्ञायते । अन्यथाप्तत्वज्ञानं विना लक्षणा न स्यात् । अप्रमाणत्वेनाप्युपपत्तेः । अथ शाब्दप्रतीतौ यद्याप्तत्वं ज्ञातं प्रयोजकं स्यात्तदा तेन लिङ्गं विशेष्येत । न त्वेवम् । आप्तत्वानाप्तत्वसंशयेऽपि वाक्यार्थज्ञानदर्शनात् । अन्यथा वेदादपौरुषेयत्वाभिमानिनां वाक्यार्थप्रत्ययो न स्यादिति चेत् । न । अनाप्तोक्तत्वनिश्चये वाक्यार्थप्रतीत्यनुदयात् । यद्व्यतिरेकनिश्चयश्च शाब्दज्ञानप्रतिबन्धकस्तान्निश्चयः शाब्दज्ञानजनकः । यथा योग्यतादौ । तथा चाप्तोक्तत्वज्ञानमवश्यं शाब्दज्ञानप्रयोजकम् । न च दृष्टान्तासिद्धिः । शाब्दाभासोच्छेदापत्तेः ।

अन्यथा त्विति । यद्यप्याप्तोक्तमशक्यनिश्चयमेवेत्यर्थः । **दुष्परिहरमिति** । आप्तोक्तत्वनिश्चये वाक्यार्थप्रत्ययः वाक्यार्थप्रत्यये च तत्राप्तत्वं निश्चेयमित्यर्थः । **स्वशिरसीति** । अन्योन्याश्रयस्य दुष्परिहरत्वादित्यर्थः । **उभयोरिति** । शब्दस्यानुमानान्तर्भावानन्तर्भाववादिनोरित्यर्थः । **क्वचिदिति** । योग्यतादिशून्य इत्यर्थः । **न चायमपीति** । येनाकाङ्क्षया हेतुर्न विशेषणीय इति शेषः । **तथा सतीति** । ननु योग्यतादिमच्छब्दज्ञाने भवत्येव सर्वत्र वाक्यार्थप्रत्ययः । उच्यते । यद्याकाङ्क्षा स्वरूपसती वाक्यार्थज्ञाने हेतुस्तदाकाङ्क्षाभ्रमादनाकाङ्क्षेऽन्वयबोधो न स्यात् । किञ्चाकाङ्क्षासंशयविपर्यययोरन्वयबोधाभावात्तन्निश्चयस्तद्धेतुः । नन्वाकाङ्क्षासंसर्गावगमप्रागभावः प्रतियोगिज्ञाननिरूप्यः ज्ञानं च संसर्गनिरूप्यमिति ज्ञाताया आकाङ्क्षायाः प्रयोजकत्वे प्रागेव संसर्गनिरूपणं स्यादित्यत आह—**स्मारितेति** । तेन स्मारितसंसर्गा-

वगमप्रागभावस्तदाक्षिप्तसंसर्गावगमप्रागभावो वाकाङ्क्षा इति सामान्येनैव रूपेण तन्निरूपणमिति न प्रागेव संसर्गविशेषसिद्धिदोष इत्यर्थः। आकाङ्क्षायोग्यतासत्तीनां च निर्वचनमन्वीक्षातत्त्वबोधे तात्पर्यपरिशुद्धिप्रकाशे च सम्यङ्निरूपितमिति विस्तरभयान्नेह प्रतायते॥

संदिग्धेति। वक्तुः संदेहादयमाप्तोक्तत्वसंदेहो द्रष्टव्यो न तु वक्तुराप्तत्वसंदेहः। धर्मिग्राहकमानेनैव तन्निश्चयात्। आप्तोक्ता वेदा इति। आप्तोक्तत्वं च वेदसमानविषयानित्यज्ञानातिरिक्तकारणीभूतयथार्थज्ञानसमानविषयत्वम्। ननु महाजनपरिगृहीतत्वादिति हेतुः साध्यसाधनयोरगृहीतव्याप्तिकतया नान्वयी न वा व्यतिरेकी प्रामाण्ये साध्येऽसाधारणः। मैवम्। अन्वयेन दृष्टान्तस्यायुर्वेदस्य सत्त्वात्। व्यतिरेकिण्यपि महाजनपरिगृहीतान्यलौकिकार्थानि वाक्यानि स्वार्थे प्रमाणानि एतादृग्वाक्यत्वादित्यत्रासाधारण्याभावात्। न चाप्रयोजकत्वम्। महाजनपरिगृहीतत्वस्यैव विपक्षबाधकत्वात्।

स्वतन्त्रेति। आनुपूर्वीज्ञानजन्यानुपूर्वीज्ञानविषयत्वमेव स्वतन्त्रपुरुषप्रणीतत्वम्। **सर्वदर्शनेति**। अत्रान्वये व्याकरणवैद्यकादिर्दृष्टान्तः। ननु वैद्यके कर्मण्यनुष्ठीयमानेऽपि फलाभावादप्रामाण्यमपि स्यादित्यत आह—सिद्धे चेति। ननु नास्माकं महाजनपरिग्रहात् प्रामाण्यं, किन्तु नित्यत्वेनापौरुषेयत्वादित्यत आह—तदेवमिति। अन्यथापीति। नित्यत्वग्राहकं प्रत्यभिज्ञानं तज्जातीयत्वविषयत्वेनाप्युपपद्यत इत्यर्थः। ननु चास्मर्यमाणकर्तृकत्वाद्वेदानामपौरुषेयत्वं

साध्यमित्यत आह—अस्मर्यमाणेति। न हि वयमस्येति। ननु मौनिश्लोकवत् कण्ठाद्यभिघाताभावेऽपि वेदकर्तृत्वं भविष्यति।

अत्राहुः। तथापि मौनी यथा लिप्यादिना परं श्लोकं बोधयति तथेश्वरोऽपि परं बोधयिष्यतीत्यायातमीश्वरस्य शरीरम्। न च मन्वादिभिः सर्गाद्यकालीनैरतीन्द्रियदर्शित्वेन स्वयमेव तज्ज्ञानम्। तेषामतीन्द्रियार्थदर्शित्वे मानाभावात्।

यद्वा। शब्दकर्तावश्यं शरीरीति नियमः। आयतनतयेति। तेन भोक्तुर्भोगायतनं शरीरमिति लक्षणं शरीरविशेषस्येति द्रष्टव्यम्।

ददातिशब्दो हीति। ननु संप्रदानमनभिधायापि रजकस्य वस्त्रं ददातीत्यादौ ददातिशब्दप्रयोगादिदमयुक्तम्। ददातिकर्मणा चाभिप्रेतो न वक्ता। ददातिशब्दाप्रयोगे संप्रदानाभावापत्तेः। नापि कर्ता। वक्तरि तदापत्तेः।

मैवम्। वेदे ब्राह्मणाय गां दद्यादित्यादौ संप्रदानसमभिव्याहृतो ददातिशब्दः संप्रदानबुद्धिं विना न भवतीत्येवंपरत्वात्।

तथा हीति। ननु प्रमेयाज्ञानत्वेन तद्धेत्वतिरिक्तहेतुजन्यतया साध्यबाधः, ज्ञानाजनकजन्यत्वे विरोधः, अप्रमायां तदसिद्धिश्च। किं च। यत्किञ्चिज्ज्ञानहेत्वपेक्षया सर्वतद्धेत्वपेक्षया वातिरिक्तत्वे इन्द्रियादिभिः सिद्धसाधनम्। न च ज्ञानत्वावच्छिन्नकार्यत्वान्यकार्यत्वप्रतियोगिककारणजन्येति साध्यम्। ज्ञानत्वस्य नित्यवृत्तितया कार्यतानवच्छेदकत्वात्। अनित्यज्ञानत्वेतिकरणे इन्द्रियादिभिर्यथायथं सिद्धसाधनम्। तेषां प्रत्येकं ज्ञानमात्राहेतुत्वात्।

एतेन प्रमात्वं ज्ञानत्वावच्छिन्नकार्यत्वानिरूपितकारणताभिन्न-कारणताप्रातियोगिककार्यतावच्छेदकं ज्ञानत्वं साक्षाद्व्याप्यधर्मत्वाद-प्रमात्ववदिति निरस्तम् । प्रमात्वस्य नित्यवृत्तित्वात् । अनित्य-प्रमात्वं तथा कार्यमात्रवृत्तित्वादित्यपि नीलघटत्वादिना व्यभिचारि । अनित्यप्रमा प्रमाऽप्रमोभयहेतुभिन्नहेतुजन्या जन्यत्वादप्रमावादिति चेत् । न । दोषस्य पित्तादेः स्वविषयप्रमाहेतुत्वेनाप्रमायां तदसिद्धेः ॥

उच्यते । यत्कार्यं यत्कार्यविजातीयं तत् तत्कारणविजातीय-कारणजन्यं यथा घटविजातीयः पटः । अन्यथा कार्यवैचित्र्यस्या-कस्मिकतापत्तेः । घटज्ञानजातीयमपि कार्यं तद्विजातीयकार्यकारण-विजातीयघटेन्द्रियसन्निकर्षादिजन्यमिति । एवञ्च प्रमाऽप्रमाकारण-विजातीयकारणजन्या अप्रमाविजातीयकार्यत्वात् घटवत् । किञ्चा-नित्यप्रमात्वं कार्यतावच्छेदकं, बाधकं विना कार्यमात्रवृत्तिधर्मत्वाद-प्रमात्ववत् । नीलघटत्वं तु विशिष्टं न कार्यतावच्छेदकम् । प्रत्येक-मनुगतद्वयादेव विशिष्टबुद्धेरार्थः समाज इति भावः ।

यदि त्विति । यावती प्रमासामग्री तावन्मात्रप्रयोज्या यद्य-प्रमा स्यात् प्रमा स्यादित्यर्थः । असिद्धमात्रापादकमप्रमायाः प्रमि-त्यजनकदोषजन्यत्वादित्याह—ज्ञानत्वेऽपीति । एवं तर्हीति । तथाच ज्ञानसामग्रीमात्रजन्यत्वरूपं प्रामाण्यस्य न स्वतस्त्वमित्यर्थः । ननु चास्तु प्रमायां दोषाभावो हेतुः । तथाचागन्तुकभावानपेक्षज्ञान-सामग्रीजन्यत्वमेव स्वतस्त्वं दोषाभावस्य तदनुविधानादित्याह—अस्तु दोषाभाव इति । विशेषादर्शनादेव भावस्यापि दोषत्वे

तदभावे विशेषदर्शनं भावस्तद्धेतुः स्यादिति नोक्तरूपं स्वतस्त्व-मित्याह—भवेदप्येवमिति । किञ्च । दोषाभावस्येव भूयोऽवयवे-न्द्रियसंनिकर्षविशेषदर्शनादिसमवधाने प्रमा, तदभावे त्वप्रमेति गुण-स्याप्यन्वयव्यतिरेकयोः सत्त्वाद्गुणोऽपि तद्धेतुरित्याह—प्रामाण्यं प्रतीति । अन्वयव्यतिरेकतुल्यत्वेन प्रमायां गुणोऽप्रमायां तदभावो हेतुरिति वैपरीत्यमेव किं न स्यादिति भावः । प्रमामात्रे च नानुगतो गुणः, किन्तु तत्तत्प्रमायां भूयोऽवयवेन्द्रियसंनिकर्ष-यथार्थलिङ्गसादृश्यवाक्यार्थज्ञानानां प्रत्येकमेव गुणत्वमन्वयव्यति-रेकात् । प्रत्यक्षविशेषदर्शनमपि गुणस्तदनुविधानात् । यद्यपि स्थाणुत्वव्याप्यवक्रकोटराद्यारोपविशेषगुणदर्शनेऽपि स्थाणुत्वभ्रमो भवत्येव । तथापि विशेषदर्शनं प्रमारूपं गुणो विवक्षितः ।

एवं प्रामाण्यमिति । प्रामाण्यस्य स्वतो ग्रहेऽनभ्यासदशो-त्पन्नज्ञाने तत्संशयो न स्यात् । ज्ञानग्रहे प्रामाण्यनिश्चयात् । अनि-श्चये वा न स्वतः प्रामाण्यग्रहः । ज्ञानाग्रहे च धर्मिज्ञानाभावान्न संशय इत्यर्थः । ननु स्वग्राह्यत्वेऽपि परग्राह्यत्वात् स्वस्याप्यन्यापेक्षया परत्वात्, भट्टमते परग्राह्यत्वाच्च सिद्धसाधनम् । न च ग्राह्यप्रामाण्या-पेक्षया परत्वं ग्राहकस्यापि । ग्राह्यप्रामाण्यत्वेन तदपेक्षया परत्वा-भावात् । अग्राह्यप्रामाण्यापेक्षयाऽप्रमाणत्वप्रसङ्गात् । अर्थेऽनैका-न्तिकश्च । उच्यते । अनभ्यासदशोत्पन्नज्ञानप्रामाण्यं न स्वाश्रयग्राह्यं स्वाश्रयातिरिक्तग्राह्यं वा । आश्रये सत्यपि तदुत्तरतृतीयक्षणवर्त्ति-संशयविषयत्वात् । अप्रामाण्यसंशयाजन्यसंशयविषयत्वाच्च । अप्रा-माण्यवत् । अर्थे निश्चितेऽपि न निश्चयानन्तरतृतीयक्षणेऽर्थ-

संशयो न वाऽप्रामाण्यसंशयं विनेति नार्थेन व्यभिचारः ।

ज्ञानत्वसंशयवदिति । यथा ज्ञानत्वे निश्चिते तत्र संशयो न भवति तथा प्रामाण्येऽपि निश्चित इत्यर्थः ।

अथ प्रामाण्यवदिति । प्रामाण्यज्ञानमात्रं न संशयविरोधकं किन्तु प्रामाण्यमेवेति साधारणं ज्ञानमिति शङ्कितुरभिप्रायः । तात्किमिति । प्रामाण्यस्य ज्ञानं प्रामाण्याश्रयो ज्ञानमित्यर्थः । प्रमाणज्ञानमिति पाठे प्रमाणरूपं ज्ञानमित्यर्थः । निश्चयमात्रमेव संशयप्रतिबन्धकं न तु तद्विशेष इत्याशयेन परिहारः । तदप्रतीतेरिति । प्रामाण्याप्रतीतेरित्यर्थः ।

झटितीति । लिङ्गज्ञानापेक्षायां विलम्बः स्यादित्यर्थः । प्रवृत्तौ न प्रामाण्यग्रहस्य सर्वत्रोपयोगः । तथात्वेऽपि झटित्यभ्यासापन्नलिङ्गानुसंधानादप्युपपत्तिरित्याह—अन्यथैवेति । ननु पक्षलिङ्गव्यापारज्ञानानां प्रामाण्यानवधारणे स्वाश्रयाद्यसिद्धिरवधारणे चानवस्था । न च लिङ्गादिज्ञानं स्वविषयनिश्चये कर्तव्ये स्वप्रामाण्यज्ञानं नापेक्षते, प्रामाण्यसंशये लिङ्गस्य संदिग्धत्वादित्यत आह—न चानवस्थेति । चरमप्रामाण्यज्ञानस्य ज्ञानाभावेन कोटिस्मरणभावेन विषयान्तरसंचारेण वा प्रामाण्यसंशयानवश्यम्भावादित्यर्थः । अन्यथा भट्टपक्षेऽपि प्रामाण्यस्य ज्ञानानुमितिग्राह्यत्वेऽनवस्था स्यादित्याह—तथात्वे चेति । प्राभाकरेऽपि मते प्रामाण्यस्य स्वग्राह्यत्वं न स्वग्राह्यम् । स्वरूपप्रामाण्यबहिर्भूतत्वात् । किन्तु परग्राह्यत्वेऽनवस्थानात् परिशेषानुमानेन मानान्तरेण वा ग्राह्यम् । तथाच तत्प्रामाण्यस्यापि स्वग्राह्यत्वमन्येनैवेत्यनवस्थेति भावः । प्रामाण्यानुमानं च

प्रथमं व्यतिरेकिणा । अयं पृथिवीत्वेनानुभवो न पृथिवीत्वाभाववति पृथिवीत्वप्रकारकः गन्धवद्विशेष्यकपृथिवीत्वप्रकारकनिश्चयत्वात् यन्नैवं तन्नैवं यथा पृथिवीभ्रमः । तथाच पृथिवीभ्रमे पृथिवीत्वाभाववति पृथिवीत्वप्रकारकत्वगन्धवद्विशेष्यकपृथिवीत्वप्रकारकत्वाभावयोर्व्याप्तिग्रहादप्रामाण्यव्यापकहेत्वभावाभावरूपाद्धेतोरप्रामाण्याभावाभावरूपं प्रामाण्यं सिध्यति । यद्व्यापकतया हेत्वभावो गृहीतस्तदभावस्यैव हेतुना साध्यमानत्वात् । व्यतिरेक्यनन्तरं तज्जातीयत्वेनान्वयिना प्रामाण्यानुमानम् । यथेदं पृथिवीज्ञानं प्रमा गन्धवद्विशेष्यकपृथिवीज्ञानत्वात् । तत्त्वेन मतवत् । अधिकस्तु पल्लवोऽन्वीक्षातत्त्वबोधे प्रदर्शित इति नेह प्रतायते ॥

समयबलेति । अर्थविशेषे चेष्टाविशेषस्य संकेते गृह्यमाण एव ततोऽर्थप्रतीतिः । सङ्केतज्ञानपुरस्सरं प्रवृत्तप्रमाणस्यैव च शब्दत्वाच्चेष्टाया अपि तथात्वात्तत्रान्तर्भावश्चेष्टाया इत्यर्थः । एवं सति चेष्टायां शब्दव्यवहारमुपपादयति—शब्द एव त्विति । न ह्यत्रेति । पुमभिप्रायस्यानियतत्वादित्यर्थः । नापीति । ऐश्वरस्याधुनिकस्य वा नियतस्य संकेतस्याभावादित्यर्थः । अतः क्लृप्तप्रमाणवैधर्म्या चेष्टा मानान्तरमेवेति भावः । द्विविधेति । यद्यपि सर्वा चेष्टा कृतसमयैव । इयांस्तु विशेषः । स्वनियतोऽपि क्वचिद्देवदत्तादिपदवदाधुनिको यथा हट्टादौ तर्जनीस्पर्शे । क्वचिद्घटादिपदवदैश्वरः । पटादिपदवच्चेष्टाविशेषस्याप्यनादित्वाविशेषात् । यथाङ्गुलीपञ्चकबुद्धिभावे पञ्चेति । तथाप्याधुनिकसंकेतमाश्रित्य कृतसमयत्वाकृतसमयत्वव्यवहारः ।

तत्र कृतसमयेति । नन्वभिप्रायस्थः शब्दो न तावत् सम-

यग्राहकादन्यो वाच्यः, तस्य नियमेनोपस्थितौ मानाभावात् । नापि समयग्राहक एव शब्दः । स हि तदा स्याद्यदि चेष्टायां शब्दादेव परं समयग्रहः स्यात् । न चैवं चेष्टान्तरेणैव व्यवहारश्चेष्टायामपि समयग्रहात् ।

मैवम् । यत्र शब्देनार्थविशेषे चेष्टाविशेषस्य संकेतग्रहस्तदभिप्रेत्योक्तम् ।

तत्रेति । तत्र चेष्टातः शब्द एव स्मर्यते । स एव स्मृतः संसर्गबोधको न चेष्टेत्यर्थः । लिपिवदिति । यद्यपि लिपेः शब्दसङ्केतो नार्थेऽर्थविशेषमजानतोऽपि लेखकादेः शब्दस्वरूपज्ञानादिति वैषम्यम् । तथापि यथा वाक्यार्थसङ्केतितानां पदानां वाक्यार्थस्मारकत्वं तथा यत्र विशिष्टेऽर्थे चेष्टायाः सङ्केतो गृहीतस्तत्र विशिष्टार्थस्य ततः स्मृतिरेव नानुभव इति कुतः स्मृतिमात्रोपयोगिन्याश्चेष्टायाः प्रमाणत्वमित्यभिप्रेत्योक्तम्—न चेति । स्मृतिश्च न प्रमेति भावः ।

यदि हीति । यं जनयित्वैव यं प्रति यस्य नियतपूर्वभावस्तस्यैव तद्व्यापारत्वादिति भावः । न चैवमिति । चेष्टां विनाप्याकाङ्क्षादिमतः शब्दाद्व्युत्पन्नस्यार्थप्रत्ययाद्व्यभिचार इत्यर्थः । नन्वेवमिति । तथाच व्यभिचारान्न सर्वत्र चेष्टायाः शब्दोपजीवनमिति भावः । अत एवेति । शब्दव्युत्पत्त्यभावादित्यर्थः । तथाच त्वदीयं लक्षणं चेष्टासाधारणं न तत्रास्तीति चेष्टापि तत्र प्रमाणं न स्यात् । मानान्तरं च तत्र संकेतग्राहकं नास्त्येवेति भावः । व्यवहारश्चेति । न च शब्देऽप्येवमभिप्रायानुमानादेव

प्रवृत्तिरस्त्विति वाच्यम् । शब्दादिदं निश्चिनोमीत्यनुव्यवसायात्तस्यानुभवजनकत्वे स्थिते तदनुकूलकल्पनादिति भावः ।

अकृतेति । यत्र हट्टादावाधुनिक एव संकेतः क्रियत इत्यर्थः । अविनाभावेति । व्याप्तिं विना चान्येनान्यस्य स्मरणेऽतिप्रसङ्ग इत्यर्थः । तस्मात् क्वचिच्छब्दस्मृत्या क्वचिदभिप्रायानुमानेनान्यथासिद्धा न पदार्थस्मारिकेति न चेष्टा विशिष्टानुभवे प्रमाणमिति भावः । ननु यथा घटादिपदानां शक्तिग्रहे प्रयोजकवाक्योच्चारणानन्तरं प्रयोज्यस्य प्रवृत्तिदर्शनाद्वाक्यार्थज्ञाने वाक्यस्य कारणतां गृहीत्वा पश्चादावापोद्वापाभ्यां तत्तत्पदानां तत्तदर्थज्ञाने शक्तिर्गृह्यते तथा चेष्टासमूहस्य विशिष्टार्थज्ञाने हेतुत्वं ग्रहीष्यत इति चेष्टा प्रमाणं स्यादित्यत आह—स्मारयतु वेति । प्रकारभेदमाह—कृत्यन्वयिनीति । यस्यां सङ्केतयितुः कृतावभिप्रायः सा कृत्यन्वयिनी । यथा शङ्खध्वनौ यास्यसीति । यस्यां ज्ञाने तस्याभिप्रायः सा ज्ञप्त्यन्वयिनी । यथोर्ध्वतर्जनीकरणे दश संख्या ज्ञास्यसीति । कारकेष्विति । प्रातिपदिकार्थमात्रं स्मर्यते न त्वन्वयप्रकारः कर्मत्वाद्यपीत्यर्थः । वर्तमानेति । क्रियास्वरूपप्रधानेत्यर्थः । ननु चेष्टाया अभिप्रायमात्रद्योतनेऽन्वयप्रकारेषु कर्मत्वादिषु सुकरः सङ्केतः । न च पूर्वैरन्वयप्रकारेषु काचिच्चेष्टा सङ्केतितेति वाच्यम् । इदानीमपि तत्करणसंभवात् । कथं वाऽपभ्रंशेऽन्वयप्रकारोपस्थापकविभक्त्यभावेऽन्वयबोधः । मैवम् । गामानयेत्यत्रेव गौः कर्मानयनमित्यत्र वाक्यार्थप्रत्ययाभावादन्वयव्यतिरेकाभ्यां विभक्त्युपस्थापितकर्मत्वादेरेवान्वयबोधकत्वात् । अपभ्रंशे

तु विभक्तिसंकेतारोपादेव संसर्गबोध इति स्वतन्त्रपदार्थोपस्थितौ गौरश्व इति वन्नान्वयबोधः स्यादिति भावः।

प्रकरणादयस्त्विति। नानार्थादौ सामान्यशब्दस्य विशेषपरत्वमात्रं प्रकरणादितः स्यान्न तु कारकविशेषान्वयप्रकारोपस्थितिरपि। तथात्वे वा स्वतन्त्रपदार्थोपस्थितावपि प्रकरणादिनान्वयप्रकारोपस्थापकविभक्त्युन्नयनादन्वयबोधः स्यादित्यर्थः। कथं तर्हीति। व्यवहारस्य संसर्गज्ञानसाध्यत्वादित्यर्थः। स्वरूपत इति। असाधारणप्रमाकरणत्वेनेत्यर्थः। ननु सादृश्यमेवोपमानस्य विषयत्वेन परिच्छेद्यं भविष्यतीत्यत आह–तथाहीति। सामान्यं च यथायथं प्रत्यक्षादिपरिच्छेद्यमेवेति न तद्ग्रहे मानान्तरापेक्षेत्यर्थः।

यद्यपि सादृश्यं सप्रतियोगि न तु निष्प्रतियोगि सामान्यमेकं तथापि तद्भिन्नत्वे सति तद्गतभूयःसामान्यवत्त्वं सादृश्यम्। तत्र च भेदः सप्रतियोगिक इति तद्घटितस्य सादृश्यस्यापि सप्रतियोगिकत्वम्।

यद्यपि चैकमेव सामान्यं न सादृश्यं भूयःसामान्यात्मकतयाङ्गीकारे च सादृश्यमनेकं स्यात्। तथापि तावत्सु भूयःसामान्येष्वेकत्वमौपाधिकम्। ननु गोसदृशो गवय इति प्रत्यक्षानन्तरमेतत्सदृशो गौरिति ज्ञानमुपमानफलं स्यात्, तस्येन्द्रियासंनिकृष्टविषयत्वेनाप्रत्यक्षत्वादेतत्सदृशत्वेन पूर्वमननुभूतविषयत्वेनास्मृतित्वादित्याह–न चैतदिति। एवं च सति तद्विधर्मेयं व्यक्तिरित्यवगते एतद्विधर्मा सा व्यक्तिरित्यपि ज्ञानमुपमानफलं स्यादुक्तयुक्तेरित्याह-तथा सतीति।

अथैतदिति। ननु नैयायिकानामर्थापत्तिरनुमानम्। न चात्र तत्सम्भवति। सा व्यक्तिरेतत्सदृशी एतन्निष्ठसादृश्यप्रतियोगित्वादिस्यस्यागमकत्वात्। तत्प्रतियोगिकैतन्निष्ठसादृश्यग्रहे तद्विशेष्यकस्य तृतीयलिङ्गपरामर्शस्याभावात्। विशेष्यस्येन्द्रियासंनिकर्षात्। न च तत्प्रतियोगिकसादृश्ये गृहीते तस्यैव तत्प्रतियोगित्वे संशयाभावात् समानसंवित्संवेद्यत्वेनैतत्सादृश्यप्रतियोगित्वमपि भातमेवेति वाच्यम्। इन्द्रियसंनिकर्षाभावेन समानसंवित्संवेद्यत्वाभावात्।

अत्राहुः। प्रत्यक्षज्ञानस्येन्द्रियार्थसंनिकर्षजत्वे नियमो न तु यावन्तोऽर्थास्तद्विषयास्तावन्तः सर्वेन्द्रियसंनिकृष्टाः। अयं स इति विपरीतप्रत्यभिज्ञायां व्यभिचारात्। न च विशेष्ये तथा नियम एवेति वाच्यम्। तथापि मनसैव परामर्शजननात्।

अथ गवयशब्दः कस्यचिद्वाचकः शिष्टैः प्रयुज्यमानत्वादिति नागरकेण निश्चिते विशेषं जिज्ञासमानेन कीदृग्गवय इत्यारण्यके पृष्टे तेन च गोसदृशो गवय इत्युक्ते यदा नागरको वनं गतः पिण्डं तादृशमनुभवन् वाक्यार्थस्मरणसहकृतात् सादृश्यज्ञानादयं गवयशब्दवाच्य इति प्रमिणोति तदा संज्ञासंज्ञिसंबन्धपरिच्छेद उपमानफलमित्याह–संज्ञासंज्ञिसंबन्धेति। नैवं वाक्यादेव नागरकेण यो गोसदृशः स गवय इति प्रतीतेर्न तदुपमानफलमित्याह–वाक्यादेवेति। केवलमिति। य एवाप्तवाक्याद्गोसदृशो धर्मी गवयपदवाच्यतयावधृतस्तमिदानीं पश्यामीति प्रत्यभिज्ञानमात्रं दृष्टे गवये भवतीत्यर्थः। गवयपदे गवयत्वं प्रवृत्तिनिमित्तं तन्न पूर्वं प्रमितम्। प्रमितं च गोसादृश्यं तन्न प्रवृत्तिनिमित्तमतः प्रवृत्ति-

निमित्ताज्ञानान्न शब्दात्तत्फलमित्याह—भवेदेवमिति । तदुपपादयति—तथासतीति । गोरज्ञाने तन्निरूपितसादृश्याज्ञानादित्यर्थः । वस्तुतो गोसादृश्यापेक्षया गवयत्वस्य लघुत्वादिति भावः । स्वयं प्रतीतेति । यस्मिन् प्रवृत्तिनिमित्ते स्वयं व्युत्पन्नस्तत् परस्य बोधनीयम् आवश्यकश्च गवयत्व एव गवयपदप्रवृत्तिनिमित्ततया व्युत्पन्नस्ततस्तदेव तत्पदप्रवृत्तिनिमित्तं बोधयेदित्यर्थः । तथाप्यापातत इति । गोसादृश्यं वा प्रवृत्तिनिमित्तं तदुपलक्षितधर्मान्तरमिति संशये क्व प्रवृत्तिनिमित्तानिश्चय इत्यर्थः । अफलमिति । प्रवृत्तिनिमित्तविशेषानिश्चायकमित्यर्थः । फलिष्यतीति । प्रवृत्तिनिमित्तं बोधयिष्यतीत्यर्थः । तात्पर्यसंदेहादिति । यदापि सादृश्यस्यैव शब्दोपस्थितस्य प्रवृत्तिनिमित्तत्वानिश्चयस्तदापि न वाक्यपर्यवसानम् । तात्पर्यविषयाज्ञानात् । न हि भ्रान्त्यान्यादृशान्वयबोधे वाक्यं पर्यवस्यतीत्यर्थः । उपलक्षणतायामिति । गवयत्वे प्रवृत्तिनिमित्ते तात्पर्यविधारणाल्लक्षणया शब्दस्तद्बोधक इत्यर्थः । यथाश्रुतपदार्थान्वयेनैव वाक्ये फलिते लक्षणा न कल्प्यते । यत्र तु गङ्गायां घोष इति वदन्वय एव मुख्यार्थे न संभवति तत्र तत्कल्पनम् । इह तु गोसादृश्यसमानाधिकरणं गवयपदवाच्यत्वमिति शब्दादवगतस्याग्रेऽपि न बाध इत्याह—नन्वेवमिति । विशेषसंदेहः प्रवृत्तिनिमित्तसंदेहः । अन्यथेति । यदि मानान्तरोपनीतरक्तत्वाद्यपेक्षं पटो भवतीति वाक्यं पर्यवसन्नं तदा पटभवनरक्तत्वयोर्विधेयत्वेऽर्थभेदाद्वाक्यभेदः स्यादित्यर्थः ।

शाब्दं समानविभक्तिकतामात्रम् । आर्थं वक्तृतात्पर्यविषयीभूतार्थप्रतिपादकत्वम् । परस्परापेक्षामात्रेणेत्यत्रान्वयोपपत्तिरित्यनुषज्यते । तस्माद्वास्तवेति ।

ननु यत्र गोसादृश्यगवयपदवाच्यतयोः सामानाधिकरण्यमात्र एव तात्पर्यं न तु गवयत्वप्रवृत्तिनिमित्तकतायामपि तत्र शब्दस्य पर्यवसन्नत्वात् प्रमाणान्तरं गवयत्वप्रवृत्तिनिमित्तताग्राहकं वाच्यम् । अथ गौरवाख्यतर्केणेतराप्रवृत्तिनिमित्तकत्वेऽवधृतं गवयपदं गवयत्वप्रवृत्तिनिमित्तकम् इतराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्तिनिमित्तकत्वात् यन्नैवं तन्नैवमिति व्यतिरेकी स्यात् । न । इतराप्रवृत्तिनिमित्तकत्वस्य केवलतर्कस्यानिश्चायकत्वेनासिद्धेः । तस्माद्यस्य तर्कः सहकारी तन्मानान्तरं वाच्यम् ।

अत्राहुः । सप्रवृत्तिनिमित्तकताग्राहकसामान्यतो दृष्टमेव गौरवाख्यतर्कसहकृतं गवयपदस्येतराप्रवृत्तिनिमित्तकत्वे गवयत्वप्रवृत्तिनिमित्तकतां परिच्छिनत्ति क्लृप्तमान एव तर्कस्य सहकारित्वे संभवति कल्पनीयप्रमाणे तथात्वस्यान्याय्यत्वाद्गौरवादिति ॥

दृढतरप्रमाणेति । योग्यानुपलम्भसहकृतेन्द्रियग्राह्यत्वेन गृहासत्त्वस्य निश्चितत्वमुक्तम् । एवं जीवनमपि ज्योतिःशास्त्रात्प्रमितमिति मरणं न कल्प्यते । अन्यथेति । बहिः सत्त्वं विना गृहासतो जीवित्वमनुपपद्यमानमर्थापत्तिफलमित्यर्थः । विरोध्येवेत्यनेन प्रकृतोपयुक्तं नोक्तमित्यत आह—विरोधीति । तथापीति । यद्यपि जीवनबहिःसत्त्वयोर्मिथो विरोधे तदुभयमेकत्र देवदत्ते न वर्तत इति केन बहिःसत्त्वं साध्यम् । तथापि जीवता क्वापि स्थातव्यमिति यदि गृहविषयकं स्यात्तदा विरोधः स्यादिति

तर्कितेन विरोधिनानयोर्विरोधित्वम् । अत एव यथाश्रुतापरितोषात्तात्पर्यार्थमाह—इदमत्रेति । न तावदिति । अनियम्यानियामकयोरव्याप्यव्यापकभूतयोर्न परस्परमुपपाद्योपपादकभावः । न ह्यव्याप्यमव्यापकं विनानुपपन्नम् अपि तु व्याप्यं व्यापकं विनानुपपन्नमित्यनुपपत्तौ व्याप्तिरस्त्येवेति तत्प्रतिसंधानात्कल्पनमनुमानमेवेत्यर्थः । व्यतिरेकेति । बहिःसत्त्वेन विना जीवतो गृहाभाव एव न भवतीति व्यतिरेकव्याप्तिरेवेत्यर्थः । कृतमिति । अर्थापत्तिरूपप्रमाणस्य कृतमनुमानादर्थान्तरत्वग्रहणेत्यर्थः । यथानुमानं व्याप्तिज्ञानाद्भवति, अन्यथानुपपत्तिस्तु कल्प्यकल्पकयोर्व्याप्तावपि तज्ज्ञानं विनैव प्रवर्तत इति नेयमनुमानमित्याशङ्क्य निराकरोति—न चेति । अन्यथेति । अनुपपत्तिज्ञानं विनापि कल्पना स्यादित्यर्थः । अर्थापत्त्याभासेति । सत्तावस्थितव्याप्त्यैव कल्पने वस्तुतो यदुपपादकं तत्कल्पनैव परं स्यादित्यर्थः । अन्वयव्यतिरेकाभ्यां व्याप्तिग्रहोपायमाह—यदाहमिहेति । ननु जीवतो गृहासत्त्वेन बहिःसत्त्वे साध्ये बहिःसत्त्वं व्यापकं गृहासत्त्वं व्याप्यमिति व्यतिरेकव्याप्तौ बहिरसत्त्वं व्याप्यं जीवतो गृहसत्त्वं व्यापकमिति यद्योगप्राथम्याभ्यां व्याप्यस्य निर्देशाद्यदाहं नान्यत्र तदाहमिहेति वक्तुं युज्यते । एवमन्वयव्याप्तावपि यदाहमिह तदा नान्यत्रेति वक्तुमर्हति । सत्यम् । यदाहं नान्यत्र तदाहमिहेति व्यतिरेकव्याप्तौ यदा नाहमिह तदान्यत्रेत्यन्वयव्याप्तौ यत्तदोर्व्यत्यासेन योजनात् । समव्याप्तिकत्वस्फोरणार्थमेवमुक्तमित्यन्ये ।

ननु देशान्तरस्येन्द्रियासंनिकृष्टत्वात्कथं तत्र स्वव्यतिरेको ग्राह्यः । न । स्वात्मन्येव देशान्तरसंसर्गाभावग्रहात् । ननु व्याप्तिसत्त्वेऽपि गृहासत्त्वस्य देवदत्तावृत्तित्वादपक्षधर्मतया नानुमानमित्यत आह—न चेति । गृहनिष्ठाभावप्रतियोगित्वस्य लिङ्गस्य पक्षधर्मत्वादित्यर्थः । उपरि सविता भूमेरालोकवत्त्वादित्यत्रापि यदा तदेति कालगर्भैव व्याप्तिर्गृह्यते । भूमेरुपरि संनिहितसवितृकत्वं वा साध्यम् । ननु व्याप्तस्य पक्षधर्मत्वमनुमानत्वम्, व्यतिरेकिणि तु व्यतिरेकयोर्व्याप्तिरन्वयस्य च पक्षधर्मत्वमतो नानुमानत्वम् ।

अत्राहुः । व्याप्तिपक्षधर्मतोपजीवनेन यद्बोधकं तदनुमानम् । व्यतिरेकिणोऽपि साध्याभावव्यापकाभावप्रतियोगिनः पक्षधर्मतया तद्विशेषत्वं स्यात् । व्यतिरेकव्याप्त्या वान्वयव्याप्तिरनुमीयते । यथा च विशेष्यासंनिकर्षे तृतीयलिङ्गपरामर्शस्तथा तृतीयलिङ्गपरामर्शस्थल एव व्युत्पादितमधस्तात् । न चात्रेति । जीवी देवदत्तः क्वाप्यस्तीत्येकं प्रमाणं गेहे नास्तीत्यपरमनयोर्विरोधज्ञानं करणमविरोधज्ञानं फलमपि नेत्यर्थः । तथाचेति । एकस्मिन्धर्मिणि मिथो विरुद्धार्थग्राहिणोरेकस्य मिथ्यात्वावश्यकत्वात्तयोर्मानत्वमसिद्धमित्यर्थः । विभिन्नेति । प्रमाणत्वे वा भिन्नविषयत्वमावश्यकमित्यर्थः । ननु क्वचिदस्तीत्यस्य क्वचित्त्वेन गृहस्यापि विषयीकरणाद्गेहेऽस्तिनास्तीतिवदेकविषयतया विरोधः स्यादित्याह—सामान्यत इति । विभिन्नदेशतयेति । विषयभेदेन यदुपपादनं तत्प्रमाणयोर्वैषयिकभेदप्रतिसन्धानात् । तच्च भावाभावयोर्भिन्नदेशतयैवोपलम्भात् । तथाच व्याप्तिज्ञानमावश्यकमित्यर्थः । प्रसिद्धानुमानेति । धूमा-

द्वह्निसत्त्वेऽनुपलब्धेश्च तदसत्त्वे भावाभावग्राहकयोर्विरोधेऽर्वाग्भागपरभागयोस्तद्व्यवस्थापनमर्थापत्तिफलमेव स्यादिति नानुमानं स्यादित्यर्थः। **अनुमानाभाव इति**। धूमाद्वह्निना भाव्यमित्यनेन सममनुपलब्धेर्विरोधस्तदा यादि धूमो वह्नेरनुमापकः स्यात्। तथाच सिद्धमनुमानमित्यर्थः। **व्याप्तिग्राहकेणेति**। अनुमानेन समं विरोधो नोक्तः किन्तु धूमवह्निव्याप्तिग्राहकमानेन सहेत्यर्थः। अथ सामान्यग्राहकमानस्य विशेषतोऽनुपलब्धिर्बाधिकैव तदा क्वचिदस्तीत्यस्यापि गेहे नास्तीत्यनेन सह न विरोध इति तुल्यमिति भावः। **केवलव्यतिरेक्यादिवदिति**। यथा केवलव्यतिरेक्यनुमानान्तरात्केनापि वैधर्म्येण पृथक् तथा श्रुतार्थापत्तिरपि दृष्टार्थापत्तेः पृथगस्त्वित्यर्थः। **एकस्येति**। पीनो देवदत्तो दिवा न भुङ्क्त इत्यत्राप्रसिद्धरात्रिभोजनस्य भोजनसाध्यपीनत्वज्ञापनमनुपपन्नं रात्रिभोजनमादाय सिध्यति। तथाहि। यथाऽभोजी पीन इत्यत्र न योग्यताज्ञानं तथा पीनो देवदत्तो दिवा न भुङ्क्त इत्यत्रापि दिवाभोजनस्य योग्यताघटकरात्रिभोजनस्याप्रतीतेः। अतो योग्यताघटकोपस्थितिं विनान्वयमलभमानमिदं वाक्यं योग्यताघटकरात्रिभोजनोपपादकं रात्रौ भुङ्क्त इति वाक्यं कल्पयित्वा तेन सहान्वयबोधं जनयति। एवञ्च श्रूयमाणस्यान्वयबोधजनकत्वं योग्यताघटकोपस्थापकेन शब्देन विनानुपपद्यमानं तं कल्पयित्वा यत्रान्वयबोधं जनयाति तत्र श्रुतार्थापत्तिरित्यर्थः। ननु लाघवाद्रात्रिभोजनमेव कल्पयितुं युक्तं, शब्दस्यापि तदुपस्थापनद्वारा योग्यताघटकत्वादित्यत आह—**शाब्दी हीति**। तथाच शब्दोपस्थापितमेव पदार्थमादायान्वयबोधकत्वामिति शब्द

एव कल्प्यत इत्यर्थः। तदुपपादयति—**न हीति**। ननु यत्र किं पचतीत्युक्ते कलायं दर्शयति तत्र शब्दं विनापि भवत्येवान्वयबोध इत्यत आह—**क्वचिदिति**। अन्यत्र तथा कल्पनादित्यर्थः।

ननु पचतीत्युक्ते स्वयं स्मृतेनान्योदीरितेन वा कलायमिति शब्देनापि नान्वयबोधः। अथ तस्य पचतीत्यन्वयपरत्वं न ज्ञातमित्यन्वयबोधस्तर्ह्यर्थकल्पनेऽपि तदर्थान्वयपरोपस्थितिरन्वयबोधाङ्गमित्यस्तु। एवं द्वारमित्यत्रापि लाघवात्पिधानमेव कल्प्यते न तु पिधेहिशब्दः।

अत्राहुः। द्वारमित्यत्र पिधेहिशब्दाध्याहारं विना द्वितीया न स्यात्। क्रियावाचकसमभिव्याहारं विना तत्साधुत्वाभावात्। किञ्च। यद्यन्यथोपस्थितेरेवान्वयबोधस्तदा घटमानयेत्यत्रैव घटः कर्मत्वमानयनं कृतिरित्यत्र कुतो नान्वयबोधः। अथ तथाविधपदोपस्थापितपदार्थे परस्परमाकाङ्क्षैव नास्ति तर्हि पदार्थोपस्थितिमात्रं नान्वयबोधाङ्गम्। किन्तु पदविशेषोपस्थितः पदार्थः शब्दोपस्थापितपदार्थेनान्वयप्रतियोगीति सिद्धम्। एवञ्च तत्र शब्दकल्पनात्पीनो देवदत्तो दिवा न भुङ्क्त इत्यत्रापि रात्रौ भुङ्क्त इति शब्द एव कल्प्यते।

अनुमितेनेति। यद्यपि पीनत्वं पदार्थतया नानुमेयम्। तथापि दिवसाभोजनविशिष्टं पीनत्वं वाक्यार्थतयानुमेयमेव।

ननु वाक्यार्थस्यानुमेयत्वेऽपि योग्यतादिकं लिङ्गविशेषणमिति भाविनः कथं पदार्थसंसर्गोऽनुमेयः।

उच्यते। बाधकमानाभावो योग्यता। अतो दिवा भोजन-

बाधेऽपि भोजनसामान्यं बाधितं नास्ति। यावद्विशेषबाध हि सामान्यबाधो, न चेह रात्रिभोजनमपि बाधितम्। एवञ्च भोजनसामान्यमादाय योग्यताज्ञानं भविष्यति रात्रिभोजनाज्ञानेऽपि।

यत्पुनरिति। यथाभूतस्य यस्य गमकत्वं तथाभूतस्यैव लिङ्गत्वं स्यादिति भावः। **न हि कार्यमिति**। यद्यपि शतसंख्या कार्या न सहस्रसंख्या। तथापि शतारम्भकैकत्वारभ्यत्वं सहस्रस्यास्तीति शतसहस्रसंख्ययोः कार्यकारणभाव उक्तः॥

क्वचित्प्रत्यक्षमिति। इन्द्रियव्यापारान्वयाद्यनुविधानादित्यर्थः। ननु चाभावो न प्रत्यक्षः। इन्द्रियेण संनिकर्षाभावात्। न च विशेषणताप्राप्तिः। समवायानभ्युपगमेनात्र तदकल्पनात्। नाप्यभावोऽनुमानम्। तस्याप्रत्यक्षस्याज्ञायमानतयाऽलिङ्गत्वादित्याह—**नन्वभावस्येति**। तस्याभावस्येत्यर्थः। **स चाभाव इति**। अभावप्रतीतेः साक्षात्कारित्वेनैहैव प्रत्यासत्त्यन्तराभावेन विशेषणतायाः प्रत्यासत्तेः कल्पनादित्यर्थः। **न त्विहेति**। तथाच साक्षात्कारित्वासिद्धौ न ततो विशेषणताकल्पनमित्यर्थः। **वैजात्यादिति**। प्राङ्नास्तितायामभावधारानुमानिकी न प्रत्यक्षा। तथाच प्रत्यक्षाभावप्रतीतौ नेन्द्रियव्यभिचार इत्यर्थः। अन्यथातिप्रसङ्गमाह—**तथा व्यभिचार इति**। एकजातीयत्वाभावेऽपि व्यभिचार्येवेत्यर्थः। **तस्येति**। तस्येन्द्रियस्य। वज्रलेपायमानत्वादव्यभिचारित्वादित्यर्थः। **एकज्ञानेति**। चैत्रेण सममेकग्रहणयोग्यस्य ज्ञायमानत्वेऽपीत्यर्थः। संयुक्तविशेषणतया मनःसंनिकर्षेण स्मरणार्हस्य चैत्रस्य स्मरणाभावं गृहीत्वा तेन लिङ्गेन भूतले तदानीं चैत्राभावय

नमिति भावः।

नन्वेकग्रहणज्ञानयोग्यतायामपि संस्कारोद्बोधकवशात्किञ्चिदेव स्मर्यते न सर्वमित्यस्मरणमन्यथासिद्धम्।

अत्राहुः। यद्भूतलं घटादितुल्यपरिमाणवद्द्रव्यवत्तत्काले भवति तद्द्रव्यवत्तया तद्भूतलं मया स्मर्यत एव परमिति व्याप्तिः। तथाच स चैत्रो न तत्काले भूतलवर्ती घटादितुल्यपरिमाणत्वे सति तत्काले तद्भूतलवर्तितया मयेदानीमस्मर्यमाणत्वात् मैत्रवत्। न चाप्रयोजकत्वम्। यदि स चैत्रो घटादितुल्यपरिमाणत्वे सति तत्काले तद्भूतलवर्ती स्यात्तदेदानीं तद्भूतलवर्तितया घटवत् स्मर्येतेति तर्कसद्भावात्।

न चैवमिति। भूतलस्य पक्षत्वे ज्ञानाभावो व्यधिकरणो न लिङ्गम्। तस्य प्रतियोगिसमानदेशत्वे नानात्मवृत्तित्वादिति शङ्कार्थः। **भूतलेति**। यद्यप्यभावस्य सविषयकत्वं नास्ति। तथापि भूतलविषयकज्ञाननिरूप्यत्वमेव भूतलज्ञानाभावयोः सम्बन्धः। **परस्य त्विति**। तन्मते त्वनुपलब्धिर्लिङ्गतया न प्रमाणं येन व्यधिकरणिका न गमिका। किन्त्वात्मन्येव वर्तमाना स्वातन्त्र्येण प्रमायां करणमित्यर्थः। **वस्तुगत्येति**। नाभाववत्तया ज्ञायमानेन। येनोक्तदोषः स्यादित्यर्थः। तदेव विशदयति—**न चेति**। वस्तुतो घटवद्भूतलं घटाभावाभावादित्यर्थः। **सत्तामात्रेणेति**। अभावस्येति शेषः। ननु घटाभाववता भूतलेनानुपलब्धिर्निरूप्यतां नाभाव इत्यत आह—**यदि त्विति**। **तच्च जात्युत्तरमेवेति**। अनुपलब्ध्यैव घटसत्त्वप्रसङ्गोऽनुपलब्धिसमा जातिः स्यादित्यर्थः। **न चेदेवमिति**। अनुपलब्धि-

प्रमाणत्वपक्षेऽपि कीदृशेन भूतलेन सा निरूप्येतेत्यर्थः । नन्वभावधीर्न प्रत्यक्षा येन वैजात्यान्न व्यभिचारः । न चेन्द्रियान्वयव्यतिरेकानुविधानात्तथा। इन्द्रियेण प्राप्त्यभावात्तयोराश्रयग्रहोपक्षीणत्वमनुमिताविवेत्याह—**स्यादेतदिति** । एवं तर्हि रूपादिधीरपीन्द्रियजन्या न स्यादाश्रयग्रह एवेन्द्रियोपयोगात् । अथ साक्षात्करोमीत्यनुव्यवसायात्तत्र तथा तुल्यमिहापीत्याह—**भवेदेवमिति**। अत एव नेन्द्रियायोग्यत्वमपीत्याह—**न च योग्यताया इति** । **तथा सतीति** । योग्यताव्यतिरेके सति साक्षात्कारव्यतिरेकः तस्मिंश्च सति योग्यताव्यतिरेक इत्यन्योन्याश्रय इत्यर्थः । **तर्हि यत्रेति** । अभावेनापि सहेन्द्रियाव्यवधानात् सोऽपि साक्षात्कारविषय इत्यर्थः। नन्वक्तमिन्द्रियेण प्राप्तिर्नास्ति । न चेन्द्रियं प्राप्तविशेषणमप्राप्तमपि गृह्णाति । न च विशेषणताप्राप्तिः । समवायानभ्युपगमेनान्यत्र तदकल्पनात् । न चाभावस्यैन्द्रियकत्वादिहैव तत्कल्पनम् । अन्योन्याश्रयात् । विशेषणताकल्पनायां तत्सिद्धेस्तत्सिद्धौ च विशेषणताकल्पनमिति । तस्मादिन्द्रियमाश्रयग्रह एवान्यथासिद्धम् । योग्यानुपलब्धिधीरेवाभावधीकरणम् । त्वयापीन्द्रियसहकारित्वे तस्या हेतुत्वोपगमात् । तदुपलम्भे तदभावाग्रहादित्यत आह—**यदि चेति** । इन्द्रियस्याश्रयग्रहेणान्यथासिद्धावर्थस्य नीले पटे रक्ताभावोपलम्भः स्यात् । आश्रयग्रहणप्रतियोगिस्मरणयोग्यानुपलब्धीनां सत्त्वादित्याह—**अर्थस्यापीति** । **ममापीति** । अर्थस्य तु रूपग्राहकेण चक्षुषा न पटस्योपलब्धिरिति नातिप्रसङ्ग इत्यर्थः ।

वायाविति। प्रतियोगिग्राहकेण चक्षुषा वायोरग्रहात् । किन्तु त्वचा त्वन्नये तद्ग्रहः । वायौ रूपाभाव इति धीरनुपलब्धेर्न स्यादित्यर्थः ।

ननु यथा नीरूपो वायुरिति धीर्वायुविशेष्यका भवतामानुमानिकी विशेष्ययोग्यतामाश्रित्येन्द्रियाणां प्रवृत्तेः तथा वायुविशेषणकाभावविशेष्यकमपि ज्ञानमनुपलब्धिलिङ्गमतः साक्षात्कारित्वाभिमताभावप्रतीतावियं सामग्रीति नोक्तदोषः ।

मैवम् । वायौ रूपाभाव इति धीः साक्षात्कारिण्येव । या हि प्रतियोगिसत्त्वविरोधिनी साऽनुपलब्धिः । सा योग्यानुपलब्धिरभावग्राहिका । सा चक्षुःसंनिकृष्टे महति वायावस्त्येवेति वायावपि चक्षुर्ग्राह्यैव रूपाभावप्रतीतिः । युक्तं चेदम् । अज्ञातयोग्यानुपलब्धिसहितादन्वयाद्यनुविधायिन इन्द्रियादेव भूतले घटाभावप्रतीतिवद्वायौ रूपाभावप्रतीतिसम्भवात् । अन्यथा घटादावपि गन्धरसविशेषाभावप्रतीतिरपि योग्यानुपलब्धिलिङ्गादेव स्यात् । विनिगमकाभावात् । वस्तुतो वायौ रूपाभावधीर्नानुपलब्धिलिङ्गजन्या । आप्तवाक्यादेस्तद्बोधकस्याभावात् । न चाज्ञातैव रूपोपलब्धेरनुपलब्धिस्तद्बोधिका । ततो (त्रो) पलब्धेरतीन्द्रियतया योग्यानुपलब्ध्या तदभावस्याग्रहात् । अनुपलब्धिमात्रस्य चाभावाग्राहकत्वात् । किञ्च । वस्तुतो घटवत्युपलब्धिप्राक्काालेऽनुपलब्ध्या घटस्मृतिः कुतो नाभावधीः । घटाभावाभावादिति चेत् । तर्ह्यभावबुद्धेरर्थजत्वात् साक्षात्कारितयेन्द्रियजत्वमेव । इन्द्रियं च नाप्राप्तग्राहकमिति तत्प्राप्तिरपि विशेषणता कार्यदर्शनात्कल्प्या संयोगवत् ।

तथापीति। तदिन्द्रियम्। तत्र रूपाभावानुभवे। संनिकृष्टमित्यर्थः।

प्राभाकरं समुत्थापयति—**यत्पुनरिति**। व्यभिचारमेवाह—**पटद्वितीय इति**। यद्यप्यद्वितीयत्वं द्वितीयाभावस्तथाचाभावः सिद्ध एव। यद्यपि च पटज्ञानभूतलस्वरूपज्ञानाभ्यां पटाभावव्यवहारः क्रियते तत्र भूतले ज्ञातेऽपि पटो न ज्ञात इति न भवति पटाभावव्यवहारः। तथाप्येतस्मिन् बाधके सत्येव बाधकान्तरमुक्तम्। न च केवलं भूतलं तदालम्बनम्। घटविरोधिनोऽतिरिक्तकैवल्यस्यानङ्गीकारात्। अङ्गीकारे वा स एवाभावः। प्रतियोगित्वं विरोधित्वम्। विरोधश्च सहानवस्थाननियमो वा वध्यघातकत्वं वा। आद्ये। **न तावदिति**। द्वितीये। **परस्परमिति**। **नाप्यभावेति**। व्यवहर्तव्यस्याधिकस्याभावे तस्य भाववत्यपि प्रसञ्जितत्वेनानिरासकत्वादित्यर्थः। नन्वतिरिक्ताभाववादिनाप्यभावः साश्रयो वाच्यः, देशादिनियमेन व्यवहारात्। तथाचाश्रयो भूतलविशेषो वाच्य इति स एवाभावव्यवहारहेतुरित्याह—**यत्पुनरिति**। यद्घटाश्रयस्येव विशेषस्यैवाभावाश्रयत्वम्। अन्यथा गोत्वादिकमपि न स्यात्। तदाश्रयविशेषादेव तद्व्यवहारोपपत्तेरित्याशयेनाह—**भावव्यवहारस्यापीति**। **व्यवस्थेति**। येन केनापि द्वितीयेन घटवद्व्यवहारापत्तेरित्यर्थः।

ननु घटवद्भूतलबुद्धिभिन्ना भूतलबुद्धिरभावव्यवहारहेतुः। न चैवं घटवति घटवत्त्वाज्ञाने भूतलबुद्धिरभावः। वस्तुतो घटवतो भूतलस्य ज्ञानाद्भिन्नस्य भूतलज्ञानस्याभावत्वात्। बुद्ध्योश्च भेदः स्वरूपविशेषावेव। घटवद्भूतलभिन्नभूतलमेव वाऽभावव्यवहारहेतुः।

मैवम्। भूतलबुद्ध्योर्निष्प्रतियोगिकत्वेन सप्रतियोगिकाभावस्वभावत्वाभावात्। न चाभावो न सप्रतियोगिकः किन्त्वभावव्यवहार इति युक्तम्। इह घटो नेति प्रतीत्या नञर्थस्यैव सप्रतियोगिकतया विषयीकरणात्। न त्वभावज्ञानोत्तरकालभाविनस्तद्व्यवहारस्य। तस्याभावज्ञानकालेऽप्रतीतेः व्यवहर्तव्यज्ञानस्य सत्यामिच्छायां व्यवहारेऽधिकापेक्षाया अदृष्टचरत्वात्। किञ्च। ज्ञानाभावस्याचाक्षुषत्वादभावश्चाक्षुषो न स्यात्। अपि चाधिकरणज्ञानयोरभावत्वे आधाराधेयप्रतीत्यनुपपत्तिः। स च यस्मिन्कालविशेषे भूतलादावभावः स्वीक्रियते तत्कालविशेषयोग एव भूतलस्याभाव इति तदुपपत्तिः, तत्कालयोग्यस्य भूतलवृत्तित्वादिति वाच्यम्। इदानीं भूतले घटाभाव इति प्रतीत्यनुपपत्तेः। तत्कालविशेषे तत्कालविशेषयोगाभावात्। **संसृज्यमानेति**। संसर्गावच्छिन्नप्रतियोगिकोऽभावः संसर्गाभावः। तादात्म्यावच्छिन्नप्रतियोगिकोऽभावस्तादात्म्याभावः। प्रतियोगिनमारोप्य यत्र निषेधधीः स संसर्गाभावः। प्रतियोगितावच्छेदकमारोप्य यत्र निषेधज्ञानं स तादात्म्याभाव इत्यस्मत्पितृचरणाः। चरमसामग्रीप्रागभावग्राहकं रूपमुपन्यस्तम्। लक्षणं स्पन्दवत्। कालमात्रवृत्त्यभावत्वं प्रागभावत्वम्। प्रागभावप्रतियोग्यभावः प्रध्वंसः। एतद्द्वयातिरिक्तः संसर्गाभावोऽत्यन्ताभावः। **घटवत्संसर्गेति**। घटस्य तत्समवायस्य चात्यन्ताभावो यदि विषयः स्यात् घटवत्यपि भूतले प्रसङ्ग इत्यर्थः। **संसर्गविशेषेति**। संसर्गविशेषः संयोगलक्षणः। तदत्यन्ताभावालम्बनत्वमित्यर्थः।

नन्विह घटो नास्तीति बुद्धेर्यदि संयोगात्यन्ताभावो विषयस्तदा घटसंयोगो नास्तीति प्रतीतेराकारः स्यात् ।

मैवम् । यथा हि भूतले घटास्तित्वव्यवहारस्तत्संयोगेन तथा तदभावेन घटाभावव्यवहृतिः । यत्पुरस्कारेण यत्र यद्भावव्यवहारः, तत्संबन्धाभावात्तत्र नास्तिताव्यवहारात् ।

केचित्तु । घटात्यन्ताभाव एव तद्विषयः । उत्पादविनाशप्रत्ययस्तु तत्संबन्धतथात्वप्रयुक्तः । स च संयोगध्वंसरूपः । न चैव घटात्यन्ताभावसंबन्धस्य संयोगध्वंसरूपतया नित्यत्वात्तत्र घटधीः कदापि न स्यादिति वाच्यम् । न हि घटसंयोगोऽस्ति तत्र तत्संयोगध्वंसः । सामान्यध्वंसस्य यावद्विशेषध्वंसव्याप्यत्वादेकविशेषवति सामान्यध्वंसस्याभावेन तदुपपत्तिरित्याहुः ।

अन्ये तु । यथा प्रतियोगिभेदेनाभावभेदस्तथा तदवच्छेदकभेदेनापीति । तत्र संयुक्तघटस्याभावः । स चान्याविशिष्टभाववदुत्पादविनाशशीलोऽन्य एवेति वदन्ति ।

यथानादिसंसर्गाभाववैधर्म्येऽपि प्रतीतेरनन्यथासिद्धत्वादुत्पादनशीलो ध्वंसः स्वीकृतस्तथा तत एवोत्पादविनाशशीलस्तुरीयः संसर्गाभावो घटस्येत्यप्याहुरेके । **स चायमिति** । संसर्गाभावश्चायमित्यर्थः ॥

अबाधिताकारमित्यनेन प्रमाणत्वमुक्तम् । **आचाराच्चेति** । वटे वटे यक्षः प्रतिवसतीत्यैतिह्यात् सतां पूजनाचारः । तस्मात् स्मृतिः । ततश्च श्रुतिरनुमीयत इत्यर्थः । **आप्तोपदेश एवेति** । यद्यपि विशिष्य वक्तृज्ञानं नास्ति तथापि महाजनपरिग्रहात् प्रामाण्ये आप्तोक्तत्वमनुमीयते ॥

ननु विपर्यस्ताव्युत्पन्नयोरजिज्ञासुत्वात् कथं व्युत्पाद्यत्वमित्यत आह—**प्रकृतमिति । तदनेनेति** । तथाच परार्थानुमाने पञ्चावयववाक्यं विना न समस्तरूपोपेतलिङ्गप्रतिपादनमिति न व्यभिचार इति भावः । ननु पञ्चावयववाक्यं स्वार्थानुमितौ न यदि प्रयोजकं तत्कथं परार्थानुमितौ तथेत्यत आह—**न हीति । पदानि पुनरिति** । व्यवहाराच्छक्तिग्रहे तत्कारणतयोपस्थिते इतरान्विते स्वार्थे पदानां शक्तिग्रहादितरान्वितं स्वार्थं स्मारयन्ति पदानि वाक्यार्थज्ञाने लिङ्गम् ।

यद्वा पदार्थमात्रज्ञानशक्तिग्रहात्तन्मात्रं स्मारयन्तीति विचारोऽस्माकं निष्प्रयोजनो न निराक्रियत इत्यर्थः । यद्यपि शब्दस्यास्वातन्त्र्येण प्रामाण्यानभ्युपगमेऽपीतरान्वितानन्वितपदार्थयोः शक्तिरस्त्येव । तथापि स्वातन्त्र्येण प्रामाण्यानभ्युपगम आर्द्रकवणिक्त्वे हेतुः । **अन्यथापीति** । इतरानन्वितपदार्थमात्रशक्त्यापीत्यर्थः । पदार्थशक्तत्वेन ज्ञातानि पदान्याकाङ्क्षादिसाचिव्यादन्वितं स्वार्थं बोधयन्तीति नान्वये शक्तिः । किञ्चान्विते शक्तिरित्यस्य यत्र शक्तिस्तत्पदार्थान्वितमित्यर्थः । तदास्मत्पक्षेऽपि तत्संभव इत्याह—**यत्र व्युत्पत्तिरिति** । व्युत्पत्तिः शक्तिः । **न हि सामान्यत इति** । न च पदादन्यदन्वितसामान्योपस्थापकमस्तीति भावः । **आक्षेपतोऽपीति** । क्रियाकारकयोर्मिथो व्याप्यत्वादेकेनापरस्यानुमानात् सामान्यतोऽन्वितज्ञानमस्तीति तद्विशेषे जिज्ञासा स्यादित्यर्थः । अपि च पदानां स्वार्थान्वये वा शक्तिरन्वितस्वार्थे वा । आद्ये सर्वपदार्थाना-

मुपसर्जनापत्तिर्विशेष्यालाभश्च । द्वितीये स्वार्थविशेष्यकप्रतीत्यजननाद्वाक्यभेदापत्तिः । किञ्चान्वये पदानां शक्तिर्यदि बोधकतामात्रं तदा सिद्धसाधनम् । अथान्वितत्वेनैव शक्तिः । तन्न । आकाङ्क्षाद्युपेतपदार्थान्तरोपसंदानत एवान्वयज्ञानोपपत्तावन्यलभ्यत्वात् । अनन्यलभ्यपदार्थमात्रे शक्तिकल्पनात् । इदं च त्वयापि वाच्यम् । पदादन्वयमात्रोपस्थितावपि तद्विशेषज्ञानार्थं तदपेक्षणात् । अवश्यं चान्वयबोधे आकाङ्क्षादीनामसाधारणी निमित्तता वाच्या । वाक्यैकवाक्यतादौ प्रतीयमानान्वये पदशक्तेरभावात् । एवञ्चावश्यकपदार्थशक्तेरेवान्वयविषयतोपपत्तौ प्रतिवाक्यार्थमन्वयशक्तिभेदस्वीकारे गौरवमित्यन्यत्र विस्तरः । ननु यदि पदानामन्विते शक्तिर्नास्ति किन्तु पदार्थ एव (परम्) । तथाच यतः कुतश्चिदुपस्थितेषु पदार्थेष्वन्वयबोधः स्यादिति पदानामेवान्वयबोधे शक्तिरास्थेयेत्याह—शब्दमहिमानामिति ।

भट्टमतेन परिहरति—आधुनिकेति । शब्दव्यतिरेकेऽपि संस्कारादुपस्थितानां पदार्थानामन्वयबोधादन्वयबोधे पदार्था एव ज्ञाताः करणम् । पदानि पुनः स्वार्थोपस्थितावेवान्यथासिद्धानीत्युपेयम् । अन्यथा नवकाव्यसंसर्गबोधात्पदरचना न स्यादित्यर्थः । न चावश्यकपदशक्तेरेव पदार्थवदन्वयोऽपि विषयोऽस्तु न तत्र शक्त्यन्तरमुचितमिति वाच्यम् । श्रुतेऽपि पदे यावन्न पदार्थ उपतिष्ठते तावदन्वयाप्रतीतेरुपस्थितेषु पदार्थेष्वन्वयावगमादवश्यं पदार्थानां कारणत्वेन शक्तत्वात् ।

ननु पदार्थानामतीतानागतत्वाद्बोधकतैव नास्ति । दूरे ज्ञाता

शक्तिः । तज्ज्ञानानां कारणत्वेऽपि न तत्राभिधाशक्तिकल्पनम् । तस्याज्ञातस्यैव हेतुत्वात् ।

मैवम् । लिप्यादिस्मृतानामप्यतीतानागतत्वादबोधकत्वापत्तेः । स्वमतेन बोधकमाह—न च येनेति । गौरवस्येति । यथाभिहितान्वयवादिनां शक्तिस्वीकारे गौरवं तथान्विताभिधानवादिनां वाक्यार्थे संसर्गविशेषे पदानां शक्त्यन्तरस्वीकारे गौरवमित्यर्थः । ज्ञातानां पदार्थानामकारणत्वे तु बीजं व्युत्पत्तिकाल एव प्रयोजकवाक्यश्रवणानन्तरं प्रयोज्यव्यापारदर्शनादर्थादन्वितज्ञानोपपत्त्यर्थमन्वितबोधकत्वं शब्दस्यैव गृह्यते । तदर्थं तन्निर्वाहार्थमर्थोपस्थितिरपि सहकारिणी कल्प्यत इति न तथैव शब्दस्यान्यथासिद्धिः । शब्दतदर्थयोरुपस्थितयोरन्वयबोधकत्वात् । कुत्र करणत्वमिति संशये प्रथमोपस्थितत्वादन्वितस्वार्थप्रतिपादनपरत्वात्पदानामन्वयबोधकत्वम् । पदार्थस्मृतिस्तद्व्यापारः कल्प्यत इति ॥

अर्थप्रतिपादकत्वं शब्दत्वं न पञ्चावयववाक्यस्य, किन्तु तदभिव्यक्तस्य स्फोटस्येति पञ्चावयवबोधकमिति मतमुत्थापयति—स्यादेतदिति । तत्र चतुर्णां प्रत्येकं मिलितानां वा नान्वयबोधकत्वमित्यर्थापत्तिर्न मानमन्योन्याश्रयादित्याह—यद्यपीति । तथापीति । गोपदमेकमित्यनुभवः पदैकगोचरो न नानावर्णविषयक इति तद्भिन्नमेकं स्फोटाख्यं पदं बोधयति । अभिन्नार्थमभिन्नमेकमर्थं साधयतीत्यर्थः । अत एवेति । [अर्थः ?] पदार्थस्तस्य संबन्धः संकेतस्तस्याख्यानं बोधनमप्युपाधिर्नास्त्यत एव परस्पराश्रयस्यानुपूर्वीविशेषविशिष्टस्य पदत्वात् । तस्याश्चाननुभवत्वादित्यत आह—एकार्थेति ।

प्रत्येकमानुपूर्वीविशेषविशिष्टस्य पदत्वात् तस्याश्चाननुभवत्वादित्यत आह–एकार्थेति। प्रत्येकमानुपूर्वीविशेषविशिष्टवर्णानुभवजनितसंस्कारेभ्यस्तादृशवर्णगोचरायाः समूहालम्बनैकस्मृतेः संभवात्। पदार्थप्रत्ययस्यान्यथानुपपत्तेस्तावत्संस्काराणां युगपद्बोधकल्पनात्। पदत्वप्रतिसन्धानं विनैकवर्णमात्रग्रहात् संकेतस्मृतेरभावात्तां विना पदार्थस्मृतेरभावात्। न च वर्णानुभवेऽपि तत्तदानुपूर्व्यनुभवान्न पदत्वप्रतिसंधानम् पूर्ववर्णध्वंसविशिष्टापरवर्णस्यानुपूर्वीत्वात्तस्यापरवर्णानुभवकाल एवानुभवात्। वाक्यार्थज्ञाने च पदार्थानामानुपूर्वी न कारणमित्यर्थः। अन्यथा स्फोटस्य वर्णाभिव्यक्तत्वपक्षे किमेकैकं वर्णानां स्फोटाभिव्यञ्जकत्वमथवा मिलितानामिति विकल्पे यथोक्तदोषापत्त्यानन्यगत्या त्वयाप्येषैव रीतिरनुगन्तव्येत्याह–अन्यथा त्विति। एवं वाक्यमपि पदान्येकस्मृतिसमारूढानि जनयन्तीत्यनन्यगत्या स्वीकर्तव्यं नानापदानामेकपदत्वानुभवादित्याह–पूर्वपूर्वेति। तत्र प्रकारान्तरेणापि प्रतीत्युपपत्तिमुपन्यस्य निराचष्टे–तथाचेत्यादि। लब्धेति। श्रोत्रसंस्काराभ्यां सदसद्वर्णावगाही स्मृत्यनुभवो विचित्रप्रत्यय एवार्थप्रत्ययहेतुरित्यर्थः। समानतन्त्रादीति। अयमर्थः। स्मृतिनिचयसहितस्यान्त्यवर्णानुभवस्यैककालासंभवात् अन्त्योपान्त्यवर्णस्मृत्यनुभवयोरेकदा न संभवः। अन्त्यवर्णानुभव एवोपान्त्यस्मृतिरुत्पद्यते। एवं विनश्यदवस्थोपान्त्यवर्णानुभवाद्विनश्यदवस्थान्त्यवर्णानुभवयोरपि नार्थप्रतीतिहेतुत्वम्। अन्त्यवर्णानुभवकाले पूर्ववर्णानुभवाभावात्। स्मृत्यनुभवरूपमेकं ज्ञानं जातिसाङ्कर्यादेव नास्तीति॥

तेन चेति। वर्णज्ञानेन यद्यप्युत्पद्यमानतोत्पत्तिकारणसान्निध्यं विनश्यत्ता च विनाशकारणसान्निध्यं द्वितीयज्ञानमेवेति न कार्यकारणभावस्तस्या (था?) प्युत्पादविनाशौ। कारणत्वमाविष्कर्तुं तृतीयानिर्देशः। एवमुत्तरत्रापि। स्मरणानुभवयोरिति। अन्त्यवर्णानुभवस्य पदस्मरणादिः सर्वोऽयं व्यापार इति न व्यापारेण व्यापारिणो व्यवधानमिति न विरोध इत्यर्थः। तच्छून्यं साधनशून्यमित्यर्थः। असाधनाङ्गत्वादिति। लिङ्गव्याप्तिपक्षधर्मतानुपदर्शकत्वादित्यर्थः। अथेति। हेतुप्रयोगार्थमेव प्रतिज्ञार्थ उपयुक्तोऽन्यथा किमुद्दिश्य हेतुः प्रयुज्येतेत्यर्थः। आद्य इति। प्रतिज्ञार्थानुपयोगे विप्रतिपत्तेरनुपयोगः। तस्याः प्रतिज्ञासमानार्थत्वात्। अथ पक्षप्रतिपक्षपरिग्रहं विना कथकत्वाभावाद्विप्रतिपत्तेरुपयोगो न प्रतिज्ञार्थस्येत्युच्यते तर्हि साध्यानुपयुक्तत्वे हेतोरप्यनुपयोग इति प्रतिपत्तिमात्रपर्यवसितैव कथा स्यात्। यदि च विप्रतिपत्तेरेव –––मेव हेत्वाद्युपयुक्तं तर्हि प्रतिज्ञार्थ उपयुक्त एवेति भावः। विवादाद्वेत्यस्यैव विकल्पद्वये विवादादपि व्यवहिताद्वेति विकल्पं दूषयति—न तावदिति। आसत्तेरिति। अनासन्नेन विवादवाक्येन हेत्वादिवाक्यस्यैकवाक्यतानापत्तेरित्यर्थः। अनिग्रहे वेति। निग्रहानुद्भावने वेत्यर्थः। अवयवान्तरैकवाक्यतापन्नाद्वेत्यत्राह–द्वितीये त्विति।

नन्वेवमपि शब्दो ऽनित्य इति विप्रतिपत्त्यनन्तरं पुनः शब्दोऽनित्य इति कोट्युपनयो व्यर्थ एव। विप्रतिपत्तेरेव तथाभूतत्वात्।

मैवम्। हेत्वाकाङ्क्षा हि न वस्तुस्वरूपे किन्तु तत्प्रमितौ।

विप्रतिपत्तिश्च स्वरूपविषयैव । अत एव शब्दोऽनित्यतया प्रतिपत्तव्य इत्येव प्रतिज्ञार्थो लक्षणया शब्दोऽनित्य इत्यनेनोच्यते । तथाच वस्तुस्वरूपाद्विवादार्थादन्यः प्रतिज्ञार्थः पुनरभिधेय एवार्थभेदात् । अवयवान्तरादपि साक्षाद्वेति पक्षं प्रतिक्षिपति—**तृतीय इति** । आक्षेपतो वेति पक्षं निरस्यति—**नापीति** । अपेक्षाकाले आकाङ्क्षाकाले । **अन्यस्येति** । तत्कल्पने आक्षेपकस्यावयवान्तरस्यैवाभावादित्यर्थः । ननु साध्यमप्रतिज्ञायापि साध्यप्रतिपत्त्यनुकूलहेत्वाद्यभिधानेऽपेक्षितासिद्धिः स्यादित्यत आह—**अपेक्षितकरणेऽपीति**। यदि च प्रतिपाद्याकाङ्क्षाक्रममनपेक्ष्याभिधानं तदान्यत्रापि तदपेक्षा न स्यादित्याह—**वाक्यसामग्रीति** । पक्षमुद्दिश्य साध्यविधानात् पक्षं प्रथमं निर्दिशति—**वायुर्द्रव्यमिति** । **अनुमानादेवेति** । अनुमानमन्वयि साध्यप्रसिद्धौ स्यात् । व्यतिरेक्यपि यदि वह्निं पक्षीकृत्य क्रियते तदा सिद्धसाधनमन्यस्य पक्षत्वे बाध इत्यन्धपरम्परार्थः ।

अत एव हीति । अनैकान्तिकापक्षधर्मत्वोपजीव्यत्वादेव सर्वत्र यदुपजीव्यं स्वतो दूषकं च तदेव पृथक् हेत्वाभास इत्यर्थः ।

ननूपजीव्यत्वं न बाधमवगम्यैवावगमः । तमनवगम्यापि शब्दानुमानाभ्यां तद्ग्रहात् । वस्तुत एकत्र धर्मिणि साधनसाध्याभावाविति समूहालम्बनरूपैकैव प्रतीतिः साधनसाध्याभावयोः सामानाधिकरण्योल्लेखिनी। अन्यथा धर्मिणि साध्याभावप्रमादशायां यदि साधनस्य ज्ञानं तर्ह्यसिद्धिः स्यादित्येकवित्तिवेद्यत्वं तयोरिति नोपजीव्यत्वम् । नापि बाधमुपजीव्यैवोद्भावनं तत् । असिद्धेः ।

न हीदमनैकान्तिकमित्युक्तेः परस्य कथन्तावश्यकी ।

अथ प्रत्यक्षादौ प्रमामात्रं प्रति स्वातन्त्र्येण बाधकस्य दूषणत्वेन क्लृप्तत्वादनुमितावपि स एव दोषः ।

मैवम् । तथा सति बाधस्य हेत्वाभासत्वव्याघातः । अनुमित्यसाधारणदोषस्यैव तत्त्वात् ।

अथ पक्षाभिमते साध्याभावग्रहवत् साध्याभावव्याप्यग्रहोऽपि दूषकः विरोधित्वाविशेषात् । एवञ्च साध्याभावसामानाधिकरण्यमनैकान्तिकत्वम् । साध्याभावव्याप्यसामानाधिकरण्यं बाधः ।

मैवम् । पक्षाभिमते साध्याभावग्रहस्य दूषकत्वासिद्धौ दृष्टान्तानुपपत्तेः । सिद्धौ वा तस्योक्तरूपबाधानन्तर्भावे षष्ठहेत्वाभासापत्तेः ।

उक्तरूपश्च बाधः पक्षाभिमतविषयकसाध्याभावबुद्धौ सत्यामसत्यां वा । आद्येऽनैकान्तिकत्वमेव । साध्याभावसामानाधिकरण्यग्रहात् । अन्त्ये लिङ्गत्वाभिमतसाध्याभावव्याप्ययोरगृह्यमाणविशेषतया सत्प्रतिपक्ष एव दोषो न बाधः ।

उच्यते । पक्षत्वाभिमते धर्मिणि साध्याभावज्ञानस्य प्रमात्वमनिश्चित्य व्यभिचारादि ज्ञातुमुद्भावयितुं च न शक्यमित्युपजीव्यत्वाद्बाधः पृथक् । तथाहि । साध्याभाववद्वृत्तित्वनिश्चयः साध्याभावनिश्चयाधीनः । तन्निश्चयश्च न साध्याभावज्ञानमात्रात् । विशेषदर्शनेऽपि भ्रमादर्थनिश्चयापत्तेः प्रामाण्यानुसरणवैयर्थ्यापत्तेश्च । किन्तु साध्याभावज्ञानस्य प्रमात्वनिश्चयात् । न चैवमसिद्ध्युपजीव्यत्वेन सिद्धसाधनमपि पृथक् स्यादिति वाच्यम्। उपजीव्यत्वेऽपि

स्वतो दूषकत्वाभावात् । पक्षत्वविघटनद्वारा तस्य दूषकत्वात् । एवमसिद्धेरपि बाध एवोपजीव्यः। साध्याभावज्ञानप्रमात्वानिश्चयादेव संदेहघटितपक्षत्वपरिघटनात् । अधिकं तु न्यायनिबन्धप्रकाशे तत्त्वबोधे च विपञ्चितमस्माभिः ।

घनमिति । निबिडमित्यर्थः । धर्मिग्राहकानुमानानामपि विरोधित्वमुपपादयति—**आकाशमिति** । अभ्युपगतविरुद्धत्वमुपपादयति—**क्षीरेति** । ननु वैशेषिकशास्त्रविशेषोऽचेतनं तस्य चेतनधर्माभ्युपगमो न सम्भवतीति व्याचष्टे—**विशेष इति**। ननु सत्कार्यपक्षे मानाभावात् कथं तेन विरोध इत्यत आह—**विवादेति**।

ननु दूषणान्तरदुष्टत्वादत्र व्याघातः कथं दूषणमुच्यत इत्याशयेन दूषणान्तरमुद्धर्तुमाह—**यद्यपीति** । कृतिविषयत्वं कार्यत्वं न सतः, असत एव कार्यत्वादिति न दूषणम् । क्रियाविषयत्वस्य कार्यत्वात् । क्रियात्वस्य चोत्पत्तिसाधारणत्वात् । **करणेति** । करणव्यापारात्प्रागपीति साध्यविशेषणेन विशिष्टस्य साध्यत्वात् सपक्षाभावान्न ततो व्यावृत्तिरिति नासाधारण्यमित्यर्थः । **नापीति** । घटो जायत इत्यस्य जनिक्रियां प्रति कर्ता भवतीत्यर्थादसतश्चाकर्तृत्वात् कारकव्यापारात्प्राक् सत्त्वमवश्यवाच्यमिति नाप्रयोजकत्वमित्यर्थः ।

एतच्चोपलक्षणम् । असच्चेत् कारणव्यापारात्पूर्वं कार्यं, न तर्हि तस्य सत्त्वं कर्तुं शक्यम् । न हि नीलं शिल्पिसहस्रेणापि पीतं कर्तुं शक्यम् । असत्त्वं चेत्कार्यधर्मस्तथाप्यसति धर्मिणि न तस्य धर्म इति कार्यस्य सत्त्वं लब्धमित्यपि विपक्षबाधकं द्रष्टव्यम् ।

न चेदमिति । जनिक्रियां प्रति कर्तृत्वमित्यर्थः । **अन्योन्याश्रयादिति** । सत्कार्यदूषणे सति जनिक्रियाप्रतीतिर्भ्रान्ता । तस्याश्च भ्रान्तत्वे सत्कार्यदोषा इत्यर्थः । तस्मात् कारणव्यापारादूर्ध्वमिव प्रागपि ततः सदेव कार्यम् । करणं चास्य सतोऽभिव्यक्तिरेव । यथा यन्त्र निष्पीडनेन तिलेषु तैलस्येति भावः । **तथापीति** । सत्त्वकारकव्यापारविषयत्वयोरेकत्रासंभवेन मिथो विरोधात् प्रतिज्ञापदयोर्व्याघात इत्यर्थः । **न हीति** । कार्यस्वरूपस्य प्रागपि सत्त्वादित्यर्थः। **असत्यपीति** । असत्यपि व्यापारविषयत्वं न संभवतीत्यर्थः । **स चेति** । कारणव्यापारेणासत आद्यकालयोग एव क्रियत इत्यर्थः । **तत्क्रियेति** । उत्पत्तिक्रियाविषय इत्यर्थः। **अतिप्रसक्तिरिति**। असत्त्वाविशेषात् सर्वं सर्वेण जन्येतेतिवत् सत्त्वपक्षेऽपि सत्त्वाविशेषात् सर्वं सर्वेणाभिव्यज्येतेति तुल्यमित्यर्थः । **कारणेति** । कारणस्वभावनियमान्नियमस्तुल्य इत्यर्थः। **कर्तव्येति**। कर्तव्यरूपं वस्तु घटादि तत्कालाविद्यमानम् । तत्साधकत्वे क्रियानिमित्तविरहात् । क्रिया घटरूपा कारकपदप्रवृत्तिनिमित्तं तद्विरहात् कारकाभावेऽकारककार्योत्पत्तिः स्यादित्यर्थः । **कृतीति** । घटस्यासत्त्वकाले घटानुकूलकृतिविषयस्यापि ज्वालनादेः क्रियात्वम् । तदादाय च कारकत्वमित्यर्थः । **धात्वर्थेति**। धात्वर्थ एव क्रिया । धात्वर्थस्य च सार्वत्रिकत्वाद्भवति क्रियायाः कारणत्वम् । **अन्यथेति** । सत्कार्यवादेऽभिव्यक्तिमादाय कारकत्वम्। सा यद्यसती कथं तस्याः प्राक्कारकत्वं निरूप्यमथ सती तर्हि कुत्र कारकत्वमित्यर्थः । **उपादानेति**। घटार्थी हि घटोपादाने

प्रवर्तते । तत्र घटस्योपलक्षणत्वेऽतिप्रसक्तिः । विशेषणत्वे च प्रागपि घटसत्त्वं प्रसक्तमित्यर्थः। सर्वसंभवेति। असत्त्वाविशेषेण घटसामग्रीतो घटवत् पटस्यापि सत्त्वप्रसङ्गादित्यर्थः। शक्तस्येति। शक्तत्वं शक्यनिरूप्यमिति शक्यस्य कार्यस्य प्रागपि सत्त्वप्रसङ्गादित्यर्थः। कारणभावादिति । कारणत्वं कार्यनिरूप्यमिति कार्यस्य प्राक्सत्त्वं सिद्धमित्यर्थः ॥

यस्तर्कतन्त्रशतपत्रसहस्ररश्मि-
र्गङ्गेश्वरः सुकविकैरवकाननेन्दुः ।
तस्यात्मजोऽतिगहनां किरणावलीं तां
प्राकाशयत्कृतिमुदे बुधवर्धमानः ॥

इति महामहोपाध्यायश्रीवर्द्धमानकृतो
गुणकिरणावलीप्रकाशः संपूर्णः ॥

THE PRINCESS OF WALES SARASVATI BHAVANA TEXTS.

Edited by

GOPINATH KAVIRAJ, M. A.

No. 1—The Kiraṇāvalī Bhāskara, (किरणावलीभास्कर) [वैशेषिक], a commentary on Udayana's Kiraṇāvalī, Dravya section, by Padmanābha Miśra. Edited with Introduction and Index by M. M. Pt. Gopinātha Kavirāja, M. A. Rs. 1-12

No. 2—The Advaita Chintāmaṇi, (अद्वैतचिन्तामणि) [वेदान्त], by Raṅgoji Bhaṭṭa, Edited with Introduction etc. by Nārāyaṇa Śāstri Khiste Sāhityāchārya. Rs. 1-12

No. 3—The Vedānta Kalpalatikā, (वेदान्तकल्पलतिका) [वेदान्त], by Madhusūdana Saraswatī. Edited with Introduction etc. by Rāmājnā Pāṇḍeya Vyākaraṇāchārya. Rs. 1-12

No. 4—The Kusumāñjali Bodhinī, (कुसुमाञ्जलिबोधिनी) [न्याय], a Commentary on Udayana's Theistic Tract, Nyāya Kusumāñjali, by Varadarāja. Edited with Introduction etc. by M. M. Pt. Gopinātha Kavirāja, M. A. Rs. 2-0

No. 5—The Rasasāra (रससार) [वैशेषिक], a Commentary on Udayana's Kiraṇāvalī, Guṇa Section, by Bhaṭṭa Vādīndra. Edited with Introduction etc. by M. M. Pt. Gopinātha Kavirāja, M. A. Rs. 1-2

No. 6—(Part I)-The Bhāvanā Viveka (भावनाविवेक) [मीमांसा], by Maṇḍana Miśra, with a Commentary by Bhaṭṭa Umbeka. Edited with Introduction etc. by M. M. Gaṅgānātha Jhā, M. A., D. Litt. Rs. 0-12

No. 6-(Part II)— Do. Do. Rs. 0-12

No. 7-(Part I)-The Yoginīhṛdaya Dīpikā, (योगिनीहृदयदीपिका [तन्त्र], by Amṛtānanda Nātha, being a

Commentary on Yoginīhṛdaya, a part of Vāmakeśvara Tantra. Edited with Introduction etc. by M. M. Pt. Gopinātha Kavirāja, M. A. Rs. 1-8

No. 7—(Part II) Do. Do. Rs. 1-4

No. 8—The Kāvyaḍākinī (काव्यडाकिनी) [काव्यशास्त्र], by Gaṅgānanda Kavīndra. Edited with Introduction etc. by Jagannātha Śāstri Hoshing Sāhityopādhyāya. Rs. 0-10

No. 9—(Part I)-The Bhakti Chandrikā (भक्तिचन्द्रिका) [भक्ति], a Commentary on Śāṇḍilyas Bhaktisūtras, by Nārāyaṇa Tīrtha. Edited with a Prefatory Note by M. M. Pt. Gopinātha Kavirāja, M. A. Rs. 0-15

No. 10-(Part I)-The Siddhāntaratna (सिद्धान्तरत्न) [गौडीयवैष्णवदर्शन], by Baladeva Vidyābhūṣaṇa. Edited with a Prefatory Note by M. M. Pt. Gopinātha Kavirāja, M. A. Rs. 1-2

No. 10-(Part II)— Do. Do. Rs. 2-12

No. 11-The Śrī Vidyā Ratna Sūtras, (श्रीविद्यारत्नसूत्र) [तन्त्र], by Gauḍapāda, with a Commentary by Śaṅkarāraṇya. Edited with Introduction etc. by Nārāyaṇa Śāstrī Khiste, Sāhityāchārya. Rs. 0-9

No. 12-The Rasapradīpa, (रसप्रदीप) [अलङ्कार], by Prabhākar Bhaṭṭa. Edited with Introduction etc. by Nārāyaṇa Śāstri Khiste Sāhityāchārya. Rs. 1-2

No. 13-The Siddhisiddhānta Saṅgraha, (सिद्धिसिद्धान्तसंग्रह) [नाथमार्ग], by Balabhadra. Edited with Introduction by M. M. Pt. Gopinātha Kavirāja, M. A. Rs. 0-14

No. 14-The Triveṇikā, (त्रिवेणिका) [अलङ्कार], by Āśādhar Bhaṭṭa. Edited with Introduction by Baṭukanātha Śarmā Sāhityopādhyāya, M. A. and Jagannātha Śāstri Hoshing Sāhityopādhyāya. Rs. 0-14

No 15-(Part I)-The Tripurārahasya. (Jñāna-Khaṇḍa) (त्रिपुरारहस्य, ज्ञानखण्ड) [तान्त्रिकदर्शन],

Edited with a Prefatory Note by M. M. Pt. Gopinātha Kavirāja, M. A. Rs. 0-14

No. 15-(Part II)—Do. Do. Rs. 2-4

No. 15-(Part III) - Do. Do. Rs. 2-0

No. 15-(Part IV)—Do. with Introduction, etc. by M. M. Pt. Gopinātha Kavirāja, M. A.

No. 16-The Kāvya Vilāsa, (काव्यविलास) [अलङ्कार], by Chirañjīva Bhaṭṭāchārya. Edited with Introduction etc. by Baṭukanātha Śarmā Sāhityopādhyāya, M. A. and Jagannātha Śāstri Hoshing Sāhityopādhyāya. Rs. 1-2

No. 17-The Nyāya Kalikā, (न्यायकलिका) [न्याय], by Bhaṭṭa Jayanta. Edited with Introduction by M. M. Gaṅgānātha Jhā, M. A., D. Litt. Rs. 0-14

No. 18-(Part I)-The Gorakṣa Siddhānta Saṅgraha, (गोरक्ष-सिद्धान्तसंग्रह) [नाथमार्ग], Edited with a Prefatory Note by M. M. Pt. Gopinātha Kavirāja M. A. Rs 0-14

No. 19-(Part I)-The Prākṛta Prakāśa (प्राकृतप्रकाश) [प्राकृतव्याकरण], by Vararuchi with the Prākrita Sañjīvanī by Vasantarāja and the Subodhinī by Sadānanda. Edited with Prefatory note etc. by Baṭukanātha Śarmā, M. A. and Baladeva Upādhyāya, M. A. Rs. 2-4

No. 19-(Part II) Do. Do. Rs. 2-12

No. 19-(Part III) Introduction etc. (In Preparation.)

No. 20-The Mānsatattvaviveka (मांसतत्त्वविवेक) [धर्मशास्त्र], by Viśvanātha Nyāyapañchānana Bhaṭṭāchārya. Edited with Introduction etc. by Pandit Jagannātha Śāstri Hoshing Sāhityopādhyāya, with a Foreword by M. M. Pt. Gopinātha Kavirāja, M. A., Principal, Government Sanskrit College, Benares. Rs. 0-12

No. 21-(Part I) The Nyāya Siddhānta Mālā (न्यायसिद्धान्तमाला) [न्याय], by Jayarāma Nyāya Pañchānana Bhaṭṭāchārya. Edited with Introduction etc. by Dr. Mangal Deva Śāstrī, M. A., D. Phil. (Oxon), Librarian, Govt. Sanskrit Library, Saraswati Bhavana, Benares. Rs. 1-4

No. 21-(Part II) Do. Do. Rs. 2-0

No. 22-The Dharmānubandhi Ślokachaturdaśī (धर्मानुबन्धिश्लोकचतुर्दशी) [धर्मशास्त्र], by Śri Śeṣa Kṛṣṇa with a Commentary by Rāma Paṇḍit. Edited with Introduction etc. by Nārāyaṇa Śāstri Khiste Sāhityāchārya, Assistant Librarian, Government Sanskrit Library, Saraswati Bhavana, Benares. Rs. 1-0

No. 23-The Navarātrapradīpa (नवरात्रप्रदीप) [धर्मशास्त्र], by Nanda Paṇdit Dharmādhikārī. Edited with Introduction etc. by Vaijanātha Śāstrī Varakale Dharmaśāstra-Śāstrī, Sādholāl Research Scholar, Sanskrit College, Benares, with a Foreword by M. M. Pt. Gopinātha Kavirāja, M. A., Principal, Government Sanskrit College, Benares. Rs. 2-0

No. 24-The Śrī Rāmatāpinīyopaniṣad (रामतापिनीयोपनिषद्) [उपनिषद्] with the Commentary called Rāma Kāśikā in Pūrvatāpinī and Ānandanidhi in Uttaratāpinī by Ānandavana. Edited with Introduction etc. by Anantarāma Śāstrī Vetāla Sāhityopādhyāya, Post-Āchārya Scholar, Govt. Sanskrit College, Benares, with a Foreword by M. M. Pt. Gopinātha Kavirāja, M.A., Principal, Government Sanskrit College, Benares. Rs. 3-12

No. 25-The Sāpiṇḍyakalpalatikā (सापिण्ड्यकल्पलतिका) [धर्मशास्त्र], by Sadāśivadeva alias Āpadeva with a Commentary by Nārāyaṇa Deva. Edited with Introduction etc. by Jagannātha Śāstri Hośinga, Sāhityopādhyāya, Sādholal Research Scholar, Govt. Sanskrit College, Benares. Rs. 1-4

No. 26-The Mṛgāṅkalekhā Nāṭikā (मृगाङ्कलेखानाटिका) [नाटिका], by Viśvanātha Deva Kavi. Edited with Introduction etc. by Nārāyaṇa Śāstri Khiste Sāhityāchārya, Asst. Librarian, Government Sanskrit Library, Benares. Rs. 1-0

No. 27-The Vidvaccharita Pañchakam (विद्वच्चरितपञ्चकम्) [निबन्ध], by Nārāyana Śāstri Khiste, Sāhityāchārya, Assistant Librarian, Govt. Sanskrit College, Sarasvati Bhavana Library, Benares. With an Introduction by M. M. Pt. Gopinātha Kavirāja, M. A., Principal, Govt. Sanskrit College, Benares. Rs. 2-0

No. 28-The Vrata Kośa (व्रतकोश) [धर्मशास्त्र], by Jagannātha Śāstri Hośinga Sāhityopādhyāya, Sādholal Research Scholar, Sanskrit College, Benares. With a Foreword by M. M. Pt. Gopinātha Kavirāja, M. A., Principal, Govt. Sanskrit College, Benares. Rs. 4-0

No. 29-The Vṛttidīpikā (वृत्तिदीपिका) [व्याकरण], by Mauni ŚrīKṛṣṇa Bhaṭṭa. Edited with Introduction etc. by Pt. Gaṅgādhara Śāstri Bhāradvāja, Professor, Govt. Sanskrit College, Benares. Rs. 1-2

No. 30-The Padārtha Maṇḍanam (पदार्थमण्डनं) [वैशेषिक], by Śrī Veṇīdatta. Edited with Introduction etc. by Paṇḍit Gopāla Śāstri Nene, Professor, Govt. Sanskrit College, Benares. Rs. 0-14

No. 31-(Part I)-The Tantraratna (तन्त्ररत्न) [मीमांसा], by Pārtha Sārathi Miśra. Edited by M. M. Dr. Gaṅgānātha Jhā, M.A., D. Litt, Vice-Chancellor, Allahabad University, Allahabad Rs. 1-14

No. 31-(Part II) Do. Do. Edited by Pt. Gopāla Śāstri Nene, Govt. Sanskrit College, Benares.

No. 32–The Tattvasāra (तत्त्वसार) [न्याय], by Rākhāldāsa Nyāyaratna. Edited with Introduction etc. by Harihar Śāstri, Benares Hindu University. Rs. 1–0

No. 33–(Part I) The Nyāya Kaustubha (न्यायकौस्तुभ) [न्याय], by Mahādeva Puntāmkar. Edited with Introduction etc. by Umeśa Miśra, M. A., Allahabad University, Allahabad. Rs. 3–4

No. 34–(Part I) The Advaita Vidyātilakam (अद्वैतविद्यातिलकम्) [शाङ्करवेदान्त], by Śri Samarapuṅgava Dīkṣita. With a Commentary by Śri Dharmayyā Dīkṣita Edited with Introduction, etc. by Gaṇapati Lāl Jha, M. A., Sādholal Research Scholar, Govt. Sanskrit Library Benares. Rs. 1–4

No. 35–The Dharma Vijaya Nāṭaka (धर्मविजयनाटक) [नाटक], by Bhūdeva Śukla. Edited with Introduction etc. by Paṇdit Nārayaṇa Śāstri Khiste, Asst. Librarian, Govt. Sanskrit Library, Benares. Rs. 1–4

No. 36–The Ānanda Kanda Champū (आनन्दकन्दचम्पू) [चम्पू], by Mitra Miśra. Edited, with a Foreword by M. M. Pt. Gopinātha Kavirāja, M.A., by Nanda Kiśora Sāhityāchārya, Research Scholar, Sanskrit College, Benares. Rs. 3–8

No. 37–The Upanidāna Sūtram (उपनिदानसूत्रम्) [वेद], Edited with Introduction by Dr. Maṅgaladeva Śāstri, M. A., D. Phil. Rs. 1–0

No. 38–The Kiraṇāvalī Prakāśa Dīdhiti (Guṇa), (किरणावलीप्रकाशदीधिति) [वैशेषिक], by Raghunāth Śiromaṇi. Edited by Pandit Badrinātha Śāstri, M. A., Lucknow University. Rs. 1–12

No. 39.–The Rāma Vijaya Mahākāvya. (रामविजयमहाकाव्य) [काव्य], by Rūpanātha. Edited by Pt. Gaṇapatilāl Jha, M. A. Rs. 2–0

No. 40–(Part I) The Kālatattva Vivechana (कालतत्त्वविवेचन) [धर्मशास्त्र], by Raghunātha Bhaṭṭa. Edited, with a Foreword by M. M. Pt. Gopinātha Kavirāja, M. A., by Nanda Kiśora Śarmā Sāhityāchārya, Research Scholar, Sanskrit College, Benares. Rs. 4–0

No. 40–(Part II) Do. Do.

No. 41–(Part I) The Sidhānta Sārvabhauma (सिद्धान्तसार्वभौम) [ज्योतिष], by Śrī Muniśvara. Edited with Introduction etc. by Jyautiṣāchārya Paṇdit Murlīdhara Thakkura, late Sādholal Scholar, Sanskrit College, Benares. Rs. 3–0

No. 42–The Bheda Siddhi (भेदसिद्धि) [न्याय] by Viśvanātha Pañchānana Bhaṭṭāchārya. Edited with notes etc., by Nyāya Vyākaraṇāchārya Pandit Sūrya Nārāyaṇa Śukla, Professor, Govt. Sanskrit College Benares.

No. 43–(Part I) The Smārtollāsa (स्मार्तोल्लास) [कर्मकाण्ड], by Śiva Prasāda. Edited with Introduction, notes, etc. by Vedāchārya Pandit Bhāgavata Prasāda Miśra, Professor, Govt. Sanskrit College, Benares.

No. 43–(Part II) Do. Do.

No. 44–(Part I) Śūdrāchāra Śiromaṇi (शूद्राचारशिरोमणि) [धर्मशास्त्र], Edited by Sāhityāchārya Pandit Nārāyaṇa Śastri Khiste.

No. 44–(Part II) Do. Do.

No. 45–(Part I) Kiraṇāvalī Prakāśa (Guṇa) (किरणावलीप्रकाश-गुण) [वैशेषिक], by Vardhamāna. Edited, with a Foreword by M. M. Pt. Gopinātha Kavirāja M. A., by Pandit Badrinātha Śastri, M. A., Lucknow University.

No. 45–(Part II) Do. Do.

No. 46–(Part I) Kāvyaprakāśa Dīpikā (काव्यप्रकाश-

दीपिका) [अलङ्कार], by Śrī Chaṇḍī Dāsa. Edited by Śrī Śivaprasāda Bhaṭṭāchārya, M. A., Professor, Presidency College, Calcutta.

No. 47–Bhedajayaśrī (भेदजयश्री) [माध्ववेदान्त], by Śrī Tarkavāgīśa Bhaṭṭa Venīdattāchārya. Edited with Introduction etc. by Pandit Tṛbhuvana Prasāda Upādhyāya, M. A., Inspector of Sanskrit Pāṭhaśālās, United Provinces, Benares.

No. 48–Samyak Sambuddhabhāṣitaṃ Buddhapratimālakṣaṇam (सम्यक्संबुद्धभाषितं प्रतिमालक्षणम्) [शिल्पशास्त्रम्], With the Commentary Sambuddhabhāṣita-pratimā-lakṣaṇa Vivarṇī. Critically edited with Introduction etc. by Haridāsa Mitra, M. A. Viśvabhāratī, Śāntiniketana.

No. 49–Bhedaratna (भेदरत्न) [न्याय], by Śankara Miśra. Edited with introduction, etc. by Pt. Sūrya Nārāyana Śukla, Asst. Professor, Govt. Sanskrit College, Benares.

No. 50–Mātrikā Chakra Viveka (मातृकाचक्रविवेक) [तन्त्र], by Śvatantrānanda Nātha, with a commentary. Edited with an Introduction by P. Lalitā Prasāda Dabral Vyākaraṇāchārya, Goinkā Scholar, Govt. Sanskrit College, Benares & with a foreword by M. M. Pt. Gopinātha Kavirāja, M. A.

No.51-52-(a) Advaita Siddhānta Vidyotana (अद्वैतसिद्धान्त विद्योतन) [शाङ्कर वेदान्त], by Brahmānanda Saraswatī.

(b) Nṛsinha Vijñapana (नृसिंह विज्ञापन) [शाङ्कर वेदान्त], by Nṛsinha Āśrama. Edited with Introduction by Pt. Sūrya Nārāyana Śukla, Asst. Professor Govt. Sanskrit College, Benares.

No. 53—Nṛsinha Prasāda-Vyavahāra Sāra (नृसिंहप्रसादः व्यवहार सारः) [धर्मशास्त्र], by Śri Dalapati Rāja. Edited with Introduction by Pt. Vināyaka Śastri Tillū.

No. 54—Nṛsinha Prasāda Prāyaśchitta Sāra (नृसिंहप्रसादः—प्रायश्चित्तसारः) [धर्मशास्त्र], by Śri Dalapati Rāja. Edited with Introduction by Pt. Nanda Kiśora Śarmā Sāhityāchārya and Pt. Nandakumāra Śarmā Sāhityāchārya.

No. 55—Nṛsinha Prasāda—Śrāddha Sāra (नृसिंह प्रसादः श्राद्धसारः) [धर्मशास्त्र], by Dalapati Rāja. Edited with Introduction by Pt. Vidyādhara Miśra.

No. 56—Bhagawannāma Māhātmya Sangraha with Commentary Sudha by Editor (भगवन्नाममाहात्म्यसंग्रहः सुधा टीका सहितः) [भक्तिशास्त्र], Edited with Introduction by Pt. Ananta Gopāl Śāstri Phadke, Asst. Professor, Govt. anskrit College, Benares.

No. 57—(Part I) Gaṇita Kaumudī (गणित कौमुदी) [गणित], by Nārāyana Paṇḍita. Edited by Pt. Padmākara Dvivedī, Professor, Govt. Sanskrit College, Benares.

No. 58—Khyātivāda (ख्यातिवाद) [शाङ्करवेदान्त] by Śankara Chaitanya Bhāratī. Edited by Śankara Chaitanya Bhārati with a foreword by M. M. Pt. Gopināthа Kavirāja, M. A.

No. 59—Sānkhya Tattvāloka (सांख्यतत्त्वालोक) [सांख्य], by Hariharānanda Araṇya. Edited with an Introduction by Prof. Jajñeśwar Ghosh, M. A. and a foreword by M. M. Pt. Gopinātha Kavirāja, M. A.

No 60—(Part I) Śāṇḍilya Saṃhita (शाण्डिल्य संहिता) [पाञ्चरात्र], Edited by Pt. Ananta Gopāl Śāstri Phadke, Asst. Professor, Government Sanskrit College, Benares.

No. 61—Dakṣiṇāmūrti Saṃhitā (दक्षिणामूर्तिसंहिता [तन्त्र], Edited by Pt. Nārāyana Śāstri Khiste Sāhityāchārya, Asst. Librarian, Govt. Sanskrit College, Benares.

No. 62—Nṛsinha Prasāda, Tīrtha Sāra (नृसिंहप्रसादः—तीर्थसारः) [धर्मशास्त्र], by Śri Dalapati Rāja. Edited by Sūrya Nārāyana Śukla, Asst. Professor, Govt. Sanskrit College, Benares.

No. 63—Bhaktyadhikaraṇamālā (भक्त्यधिकरणमाला) [भक्तिशास्त्र], by Nārāyaṇa Tīrtha, with Commentary by Editor. Edited by Pt. Ananta Gopāla Śāstri Phadke, Asst. Professor, Govt. Sanskrit College, Benares.

No. 64—Vāsiṣṭha Darśana (वासिष्ठ दर्शनम्) [वेदान्त], Compiled & edited with an Introduction by Dr. B. L. Atreya, M. A., Ph. D., Lecturer, Benares Hindu University. With a foreword by M. M. Pt. Gopinātha Kavirāja, M. A.

No.65-67-(a) Tristhalī Setu (त्रिस्थलीसेतुः) [धर्मशास्त्र], by Bhattoji Dīkṣita.

(b) Tīrthendu Śekhara (तीर्थेन्दु शेखर) [धर्मशास्त्र], by Nāgeśa Bhatta.

(c) Kāśi Mokṣa Vichāra (काशी मोक्ष विचारः) [वेदान्त], by Sureśvarāchārya. Edited with Introduction by Pt. Sūrya Nārāyana Śukla, Asst. Professor, Govt. Sanskrit College, Benares.

No. 68—Madhva Mukhālankāra (मध्वमुखालङ्कारः) [माध्व वेदान्त], by Vanamāli Miśra. Edited with an Introduction by P. Narasinhāchārya Varakhedkar, Asst. Professor, Sanskrit College, Benares, with a foreword by M. M. Pt. Gopinātha Kavirāja, M. A.

Works in the Press.

No. 1—Āśvalāyana Śrauta Sutra with Sidhhānti Bhāshya (सिद्धान्तिभाष्यसहित आश्वलायनश्रौतसूत्र) [वेद]

No. 2—Nīti Mañjarī (नीतिमञ्जरी) [वेद], by Dyā Dvivedī.

No. 3—Nyāya Kaustubha (Part II) Anumānakhaṇḍa (न्यायकौस्तुभ-अनुमानखण्ड) [न्याय], by Mahādeva Puntāmkar.

No. 4—Mīmāṃsā Chandrikā (मीमांसाचन्द्रिका) [मीमांसा], by Brahmānanda Saraswatī.

No. 5—Tantraratna (Part III) (तन्त्ररत्न) [मीमांसा], by Pārtha Sārathī Miśra.

No. 6—Kāvya Prakāśa Dīpikā (Part II) (काव्यप्रकाश दीपिका) [अलङ्कार], by Śrī Chaṇḍīdāsa.

No. 7—Iśvara Pratyabhijñā Kārikās of Utpala with the Vimarśinī of Abhinava Gupta and commentary on Vimarśinī by Bhāskara Kāṇṭha.

No. 8—Nyāyamrita Saurabha Saugandha by Vanamāli Miśra.

No. 9—Upendra Vijñāna Sūtra with commentary.

No. 10—Śāṇḍilya Samhitā (Part II).

No. 11—Tattvachintamaṇi with Āloka, Darpana, etc.

No. 12—Saṅkṣepa Śariraka with Subodhini by Nrisiṇha Āsrama.

No. 13—Dvaita Nirnaya Siddhānta Sangraha by Bhānu Bhaṭṭa.

No. 14—Bhakti Chandrika (Part II) by Nārāyaṇa Tīrtha.

THE PRINCESS OF WALES SARASWATI BHAVANA STUDIES;

Edited by

GOPINATH KAVIRAJ, M. A.

Vol. I—(a) Studies in Hindu Law (1): its Evolution, by Gaṅgānātha Jhā.
(b) The View-point of Nyāya Vaiśeṣika Philosophy, by Gopinātha Kavirāja.
(c) Nirmāṇa Kāya, by Gopinātha Kavirāja. Rs. 1-12

Vol. II—(a) Paraśurāma Miśra alias Vāṇī Rasāla Rāya, by Gopinātha Kavirāja.
(b) Index to Śābara's Bhāṣya, by the late Col. G. A. Jacob.
(c) Studies in Hindu Law (2)—its sources, by Gaṅgānātha Jhā.
(d) A New Bhakti Sūtra, by Gopinātha Kavirāja.
(e) The System of Chakras according to Gorakṣanātha, by Gopinātha Kavirāja.
(f) Theism in Ancient India, by Gopinātha Kavirāja.
(g) Hindu Poetics, by Baṭukanātha Śarmā.
(h) A Seventeenth Century Astrolabe, by Padmākar Dvivedī.
(i) Some aspects of Vīra Śaiva Philosophy, by Gopinātha Kavirāja.
(j) Nyāya Kusumāñjali (English Translation), by Gopinātha Kavirāja.
(k) The Definition of Poetry, by Nārāyaṇa Śāstri Khiste.
(l) Sondala Upādhyāya, by Gopinātha Kavirāja. Rs. 5-0

Vol. III—(a) Index to Śābara's Bhāṣya, by the Late Col. G. A. Jacob.
(b) Studies in Hindu Law (3): Judicial Procedure: by Gaṅgānātha Jhā.
(c) Theism in Ancient India, by Gopinātha Kavirāja.

(d) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinātha Kavirāja.
(e) Naiṣadha and Śrī Harṣa by Nīlakama Bhaṭṭāchārya.
(f) Indian Dramaturgy, by P. N. Pāṭankar. Rs. 5-0

Vol. IV—(a) Studies in Hindu Law (4): Judicial Procedure; by Gaṅgānātha Jhā.
(b) History and Bibliography of Nyāya Vaiśeṣika Literature by Gopinātha Kavirāja.
(c) Analysis of the Contents of the Ṛgveda-Prātiśākhya, by Maṅgal Deva Śāstrī.
(d) Nārāyaṇa's Gaṇitakaumudī, by Padmākara Dvivedi.
(e) Food and Drink in the Rāmāyanic Age, by Manmatha nath Roy.
(f) Satakāryavāda; Causality in Sāṅkhya, by Gopinātha Kavirāja.
(g) Discipline by Consequences, by G. L. Sinha.
(h) History of the origin and expansion of the Aryans. by A. C. Ganguly.
(i) Punishments in Ancient Indian Schools, by G. L. Sinha. Rs. 5-0

Vol. V—(a) Ancient Home of the Aryans and their migration to India, by A. C. Ganguly.
(b) A Satrap Coin, by Shyāmlal Mehr.
(c) An Estimate of the Civilisation of the Vanaras as depicted in the Rāmayaṇa, by Manmatha nāth Roy.
(d) A Comparison of the contents of the Ṛgveda, Vājasaneya, Taittirīya & Atharvaveda Prātiśākhyas, by Maṅgala Deva Śāstri.
(e) Formal Training and the Ancient Indian Thought, by G. L. Sinha.
(f) History and Bibliography of Nyāya Vaiśeṣika Literature by Gopinātha Kavirāja.

(g) A Descriptive Index to the names in the Rāmāyaṇa, by Manmathanāth Roy.

(h) Notes and Queries, (1) Virgin Worship, by Gopinātha Kavirāja. Rs. 5-0

Vol. VI—(a) Index to Śābaras Bhāṣya, by the late Col. G. A. Jacob.

(b) Some Aspects of the History and Doctrines of the Nāthas, by Gopinātha Kavirāja.

(c) An Index etc. to the Rāmāyana, by Manmathanātha Roy.

(d) Studies in Hindu Law by M. M. Gaṅgānātha Jhā.

(e) The Mimāṁsā manuscripts in the Govt. Sanskrit Library, Benares, by Gopinātha Kavirāja.

(f) Notes and Queries, by Gopinātha Kavirāja.

Vol. VII—(a) Bhāmaha and his Kāvyālankāra, by Baṭukanātha Śarmā and Baladeva Upādhyāya.

(b) Some variants in the readings of the Vaiśeṣika Sūtras, by Gopinātha Kavirāja.

(c) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinātha Kavirāja.

(d) An attempt to arrive at the correct meaning of some obscure Vedic words, by Sitāram Jośi.

(e) A comparison of the contents of the Ṛg Veda, Vājasaneya, Taittirīya, and Atharva Veda (Chāturādhyāyikā) Prātiśākhyas, by Mangal Deva Śāstri.

(f) An Index to the Rāmāyaṇa, by Manmatha Nath Roy.

(g) An Index to Śābaras Bhāṣya, by Col. G. A. Jacob.

(h) Gleanings from the Tantras, by Gopinātha Kavirāja.

(i) The date of Madhusūdana Saraswatī, by Gopinātha Kavirāja.

(j) Descriptive notes on Sanskrit Manuscripts, by Gopinātha Kavirāja.

(k) A Note on the meaning of the word Parārdha, by Umeśa Miśra. Rs. 5-0

Vol. VIII—(a) Indian Philosophy, by Tārakanātha Sānyal.

(b) An Index to the Rāmāyaṇa, by Manmatha Nath Roy.

(c) Index to Śabara's Bhāṣya, by the late Col. G. A. Jacob.

(d) Hari Svāmi, the commentator of Śatapatha Brāhmana and the date of Skanda Svāmi the commentator of the Ṛgveda, by Mangaladeva Śāstri.

(e) Mysticism in Veda, by Gopinātha Kavirāja.

(f) The Devadāsī; a brief history of the Institution, by Manmatha Nātha Roy. Rs. 5-0

Vol. IX—(a) The Life of a Yogin, by Gopinātha Kavirāja.

(b) The antiquity of the Indian art canons, by Haridāsa Mitra.

(c) Prāchya Vargīkaraṇapaddhati, by Satiśachandra Guha.

(d) Yoga Vāsiṣṭha and some of the minor Upaniṣads, by B. L. Atreya.

(e) An index to the proper names occurring in in Vālmiki's Rāmāyana, by Manmatha Nātha Roy.

(f) The Philosophy of Tripurā Tantra, by Gopinātha Kavirāja, M. A.

(g) Notes on Pāśupata Philosophy, by Gopinātha Kavirāja. Rs. 5-0

THE PRINCESS OF WALES SARASWATI

BHAVANA STUDIES

(SANSKRIT)

SARASVATALOKA

Edited by

GOPINATH KAVIRAJ, M.A.

Kiraṇa I (In progress)

(a) Mangalam, etc by Nārāyaṇa Śāstri Khiste.

(b) Mimāṃsakamatasaṃgraha, by Hārānchandra Bhaṭṭācharya.

(c) Śrimad Āchārya Manḍana Miśra by Chinna Swāmī Śāstrī.

(d) Bhagavato Buddhasya Chaitama Upadeśaścha, by Gopinātha Kavirāja.

Kiraṇa I (Supplement)

Sanskrita Kavi Parichaya-(Bhāravi) by Nanda Kiśora Śarma.

Kiraṇa II (In progress)

(a) Śāradā Prasādanam by Nārāyana Śāstri Khiste.

(b) Chūḍāmaṇi Darśanam by Śaśadhara Tarkachūḍāmaṇi.

To be had of—

The Superintendent

Government Press, U. P.,

Allahabad.